(*i*) The author, as noted previously, has himself thrice alluded to his own other work entitled *Vis'vāsarayayuddhavarṇana*, which, like the *Alankāramañjuṣā*, seems to have been composed by him with a view to winning additional patronage from the Peshwas. As the work has not yet been traced anywhere independently, it is not possible to surmise exactly its scope, bulk and extent. Possibly, Visvāsarao's celebrated heroic fighting in three different battles, viz., those of Sindkhed, Udgir and Panipat, was glorified in the various portions of the epic.

(*ii*) Luckily, we know[1] of one more work composed by Devas'ankara, viz., *Amarus'atakavyākhya* i. e. a Commentary on Amaru's *Celebrated Century of Verses*. The work was discovered by R. L. Mitra through an undated and incorrect Devanāgarī MS. and was noticed by him in his *Notices of Sanskrit Manuscripts*, Vol. X. (Calcutta, 1892), Pages 81-82. The Notice has been reproduced in our Appendix A. Even a cursory glance at the portions extracted would leave no doubt that the Commentary comes from the pen of the author of the *Alankaramañjuṣa* himself and not from that of any other Devas'ankara. Its first [illegible] (चन्द्रविभूषितभालं etc.), embodying a benediction to Ganes'a, is wholly identical with Verse 1 of the *Alankaramañjūṣā*. Its second verse (सीतास्ये सकुतूहलं etc.) confirms the above-suggested probability of the author personally being a devotee of

1. Aufrecht : *Catalogus Catalogorum*, Vol. II, Page 5 *b*.

Rāma. Its third verse (क मन्दा मे etc.) is practically the same as Verse 4 or 282 of the *Alankāramañjuṣā* and repeats the author's devotion to his guru and to Mother Tarā. Its fourth verse (रानेरपुरनिवासी etc.), again, declares that Ranera was the native-place of Devas'aṅkara. Its two concluding verses (ग्रन्थो ऽयं etc. and निर्मलमपि etc.) are parallel in spirit to the concluding Verse 389 of the *Alankāramañjūṣā*. Its concluding colophon also notes the author's title 'Bhaṭṭa', surname 'Purohita' and father's name 'Nāhanābhāi'. The reading 'राजनपुरसज्ञात' in that colophon is obviously the scribe's mistake for 'रानेरपुरसज्ञात' and the missing letters there prior to 'कृतनिवास etc.' were in all probability 'उर:पत्तन'. From the extracts before [redacted] the Commentary seems to have nothing to do with the Peshwas or with any other ruling chiefs. Possibly it was written by Devas'aṅkara prior to his composition of the *Alankāramañjuṣā*.

# अलङ्कारमञ्जूषायाः

## विषयानुक्रमणिका


| विषयाङ्काः | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| I. | ग्रन्थकर्तुरुपोद्घातः | १–४ |
| II. | अर्थालङ्कारविवेचनं | ४–२२२ |
| १ | उपमा | ४ |
| | (अ) पूर्णोपमा | ४ |
| | (आ) लुप्तोपमा | ६ |
| २ | ललितोपमा (पदार्थवृत्ति-निदर्शना) | ९ |
| ३ | अनन्वयः | ११ |
| ४ | उपमेयोपमा | १२ |
| ५ | प्रतीपं | १२ |
| | (अ) प्रथम | १२ |
| | (आ) द्वितीयं | १३ |
| | (इ) तृतीयं | १४ |
| | (ई) चतुर्थं | १५ |
| | (उ) पञ्चमं | १६ |
| ६ | रूपकं | १६ |
| ७ | परिणामः | २४ |
| ८ | उल्लेखः | २५ |
| ९ | स्मृतिमान् | २७ |
| १० | भ्रान्तिमान् | |
| ११ | सन्देहवान् | |
| १२ | अपह्नुतिः | २८ |
| | (अ) शुद्धापह्नुतिः | २८ |
| | (आ) हेत्वपह्नुतिः | ३० |
| | (इ) पर्यस्तापह्नुतिः | ३१ |
| | (ई) भ्रान्तापह्नुतिः | ३३ |
| | (उ) छेकापह्नुतिः | ३४ |
| | (ऊ) कैतवापह्नुतिः | ३५ |
| १३ | उत्प्रेक्षा | ३९ |
| १४ | अतिशयोक्तिः | ४८ |
| | (अ) रूपकातिशयोक्तिः | ४८ |
| | (आ) भेदकातिशयोक्तिः | ५१ |
| | (इ) सम्बन्धातिशयोक्तिः (प्रथमा) | ५२ |
| | (ई) सम्बन्धातिशयोक्तिः (द्वितीया) | ५५ |
| | (उ) अक्रमातिशयोक्तिः | ५६ |
| | (ऊ) चपलातिशयोक्तिः | ५६ |
| | (ऋ) अत्यन्तातिशयोक्तिः | ५८ |
| १५ | तुल्ययोगिता | ५९ |
| | (अ) प्रथमा | ५९ |
| | (आ) द्वितीया | ६१ |
| १६ | दीपकं | ६२ |
| १७ | आवृत्तिदीपकं | ६३ |
| १८ | प्रतिवस्तूपमा | ६४ |
| १९ | दृष्टान्तः | ६५ |
| २० | निदर्शना | ६६ |
| | (अ) वाक्यार्थवृत्तिनिदर्शना | ६६ |
| | (आ) पदार्थवृत्तिनिदर्शना | ७० |
| | (इ) सदसदर्थनिदर्शना | ७१ |
| २१ | व्यतिरेकः | ७४ |
| २२ | सहोक्तिः | ७५ |

| विषयाङ्काः | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| २३ | विनोक्तिः | ७६ |
| २४ | समासोक्तिः | ७८ |
| २५ | परिकरः | ८२ |
| २६ | परिकराङ्कुरः | |
| २७ | श्लेषः | ८७ |
| २८ | अप्रस्तुतप्रशंसा | ९५ |
| २९ | प्रस्तुताङ्कुरः | १०४ |
| ३० | पर्यायोक्तं | १०८ |
| | (अ) प्रथमं | १०८ |
| | (आ) द्वितीयं | १०९ |
| ३१ | व्याजस्तुतिः | ११० |
| ३२ | व्याजनिन्दा | ११४ |
| ३३ | आक्षेपः | ११६ |
| | (अ) प्रथमः | ११६ |
| | (आ) द्वितीयः | ११८ |
| | (इ) तृतीयः | १२० |
| ३४ | विरोधाभासः | १२३ |
| ३५ | विभावना | १२४ |
| | (अ) प्रथमा | १२४ |
| | (आ) द्वितीया | |
| | (इ) तृतीया | १२६ |
| | (ई) चतुर्थी | १२७ |
| | (उ) पञ्चमी | |
| | (ऊ) षष्ठी | १२७ |
| ३६ | विशेषोक्तिः | १२८ |
| ३७ | असम्भवः | १२८ |
| ३८ | असङ्गतिः | १२९ |
| | (अ) प्रथमा | १२९ |
| | (आ) द्वितीया | १३० |
| | (इ) तृतीया | |
| ३९ | विषमं | १३१ |
| | (अ) प्रथमं | १३१ |
| | (आ) द्वितीयं | १३२ |
| | (इ) तृतीयं | १३३ |
| | (ई) चतुर्थं | १३४ |
| | (उ) पञ्चमं | १३४ |
| ४० | समं | १३५ |
| | (अ) प्रथमं | १३५ |
| | (आ) द्वितीयं | १३६ |
| | (इ) तृतीयं | १३७ |
| | (ई) चतुर्थं | १३७ |
| | (उ) पञ्चमं | १३८ |
| ४१ | विचित्रं | १३९ |
| ४२ | अधिकं | १३९ |
| | (अ) प्रथमं | १३९ |
| | (आ) द्वितीयं | १४० |
| ४३ | अल्पं | १४१ |
| ४४ | अन्योन्यं | १४१ |
| ४५ | विशेषः | १४३ |
| | (अ) प्रथमः | १४३ |
| | (आ) द्वितीयः | १४४ |
| | (इ) तृतीयः | १४४ |
| ४६ | व्याघातः | १४५ |
| | (अ) प्रथमः | १४५ |
| | (आ) द्वितीयः | १४६ |
| | (इ) तृतीयः | १४७ |
| ४७ | कारणमाला | १४७ |
| | (अ) प्रथमा | १४७ |
| | (आ) द्वितीया | |
| ४८ | एकावली | १४८ |
| | (अ) प्रथमा | १४८ |
| | (आ) द्वितीया | |
| ४९ | मालादीपकं | १४९ |
| ५० | सारः | १५० |

| विषयाङ्काः | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| ५१ | यथासङ्ख्यं | १५१ |
| ५२ | पर्यायः | १५१ |
| | (अ) प्रथमः | १५१ |
| | (i) शुद्धपर्यायः | १५२ |
| | (ii) सङ्कोचपर्यायः | १५२ |
| | (iii) विकासपर्यायः | १५२ |
| | (आ) द्वितीयः | १५३ |
| ५३ | परिवृत्तिः | १५३ |
| ५४ | परिसङ्ख्या | १५४ |
| ५५ | विकल्पः | १५५ |
| ५६ | समुच्चयः | १५६ |
| | (अ) प्रथमः | १५६ |
| | (आ) द्वितीयः | १५८ |
| ५७ | कारकदीपकं | १५८ |
| ५८ | समाधिः | १५९ |
| ५९ | प्रत्यनीकं | १६१ |
| ६० | काव्यार्थापत्तिः | १६१ |
| ६१ | काव्यलिङ्गं | १६३ |
| | (अ) वाक्यार्थहेतुकं | १६४ |
| | (आ) पदार्थहेतुकं | १६४ |
| | (इ) वाक्यार्थपदार्थोभयहेतुकं | १६५ |
| ६२ | अर्थान्तरन्यासः | १६७ |
| ६३ | विकस्वरः | १७४ |
| ६४ | प्रौढोक्तिः | १७५ |
| ६५ | सम्भावनं | १७६ |
| ६६ | मिथ्याध्यवसितिः | १७७ |
| ६७ | ललितं | १७७ |
| ६८ | प्रहर्षणं | १७९ |
| ६९ | विषादनं | १८१ |
| ७० | उल्लासः | १८२ |
| ७१ | अवज्ञा | १८५ |
| ७२ | अनुज्ञा | १८७ |
| ७३ | लेशः | १८७ |
| ७४ | मुद्रा | १८९ |
| ७५ | रत्नावली | १९० |
| ७६ | तद्गुणः | १९१ |
| ७७ | पूर्वरूपं | |
| ७८ | अतद्गुणः | १९२ |
| ७९ | अनुगुणः | १९३ |
| ८० | मीलितं | १९५ |
| ८१ | सामान्यं | |
| ८२ | उन्मीलितं | १९८ |
| ८३ | विशेषकः | |
| ८४ | गूढोत्तरं | २०० |
| ८५ | चित्रं | २०२ |
| ८६ | सूक्ष्मं | २०३ |
| ८७ | पिहित | २०५ |
| ८८ | व्याजोक्तिः | २०७ |
| ८९ | गूढोक्तिः | २०८ |
| ९० | विवृतोक्तिः | २०९ |
| ९१ | युक्तिः | २१० |
| ९२ | लोकोक्तिः | २१० |
| ९३ | छेकोक्तिः | |
| ९४ | वक्रोक्तिः | २१२ |
| ९५ | स्वभावोक्तिः | २१५ |
| ९६ | भाविकं | २१५ |
| ९७ | उदात्तं | २१६ |
| ९८ | अत्युक्तिः | २१७ |
| ९९ | निरुक्तिः | २१८ |
| १०० | प्रतिषेधः | २१९ |
| १०१ | विधिः | २२१ |
| १०२ | हेतुः (प्रथमः, द्वितीयश्च) | २२२ |

| विषयाङ्काः | विषयाः | पृष्ठाङ्काः |
|---|---|---|
| III. प्रमाणालङ्कारविवेचनं | | २२२–२२६ |
| १०३ | प्रत्यक्षं | २२३ |
| १०४ | अनुमानं | २२४ |
| १०५ | उपमानं | २२४ |
| १०६ | शब्दः | २२५ |
| | (अ) स्मृतिः | २२५ |
| | (आ) श्रुतिः | |
| | (इ) लौकिकशब्दः | २२५ |
| IV. ध्वनिरूपरसवदाद्यलङ्कार-विवेचनं | | २२६–२३३ |
| १०७ | रसवत् | २२८ |
| १०८ | प्रेयः | |
| १०९ | ऊर्जस्वि | २२९ |
| ११० | समाहितं | २३० |
| १११ | भावोदयः | २३१ |
| ११२ | भावसन्धिः | २३२ |
| ११३ | भावशबलता | २३३ |
| V. संसृष्टिसङ्करविवेचनं | | २३३–२४० |
| ११४ | संसृष्टिः | २३३ |
| ११५ | सङ्करः | २३४ |
| | (अ) अङ्गाङ्गिभावसङ्करः | २३५ |
| | (आ) समप्राधान्यसङ्करः | २३७ |
| | (इ) सन्देहसङ्करः | २३८ |
| | (ई) एकवाचकानुप्रवेश-सङ्करः | २३९ |
| VI. काव्यालङ्कारलक्षणं | | २४०–२४३ |
| VII. ग्रन्थकर्तुरुपसंहारः | | २४३–२४४ |

श्रीः

# अलङ्कारमञ्जूषा

## I. ग्रन्थकर्तुरुपोद्घातः

[1]श्रीगणेशाय [illegible] ॥

श्रीगुरुभ्यो नमः ॥

चन्द्रविभूषितभालं गौरीबालं गलेऽच्छमणिमालम् ।
विघ्नविघातायालं स्मरामि हतदेवरिपुजालम् ॥१॥

[2]रामचन्द्रसुकलामृतपाने
लालसं निभृतपक्ष्म सुकान्ति ।
जानकीनयनरम्यचकोर-
द्वन्द्वमादिशतु मे कमनीयम् ॥२॥

देवशङ्करनामा यो[3] रानेरनगरस्थितिः
काव्यालङ्कारमञ्जूषा क्रियते तेन कौतुकात् ॥३॥

---

1. For the purpose of removal of obstacles I again and again call to mind Gauri's child (i.e. God Ganes'a) whose forehead is decorated by the moon, who has a string of pellucid jewels on his neck and who has killed the hosts of gods' enemies.

2. May the pair of charming Cakora birds in the form of Jānaki's eyes that possesses exquisite beauty has its eye-lids steady and is absorbed in drinking the nectar in the form of the lovely digits of Rāma-moon (i.e. the moon in the form of Rāma), grant me my desire.

3. This Kavyālaṅkāramañjūṣā (lit. a casket of poetic ornaments or figures of speech) is being prepared by him whose name is Devas'ankara and who has his residence in the town of Rānera.

---

१. 'श्रीगणेशाय नमः' इति नास्ति अ पुस्तके.

२. अत्र [illegible] पुस्तकस्था टिप्पणी— 'अत्र परिणामोऽलङ्कारः ।' इति.

३. '०नामार्यं'—अ.

कं मन्दा मे बुद्धिः क ■ लसदलङ्कारकविता
जरन्नावा तर्तुं तरलमनसोऽगाधजलधिम् ।
सहायो मे श्रीमद्गुरुचरणपाथोजयुगलं
तथा ताराम्बायाः पदकमलयोर्धूलिपटलम् ॥४॥
प्राचीनोक्तेष्वलङ्कारकदम्बेषूपमादयः ।
प्रसिद्धास्तेऽत्र कथ्यन्ते बालव्युत्पत्तिहेतवे ॥५॥
[2]श्रीयुतो बहु चकार यो द्विषां
पेषणं युधि समुद्यतखड्गः[3] ।
याति पेषमिति पेशलमर्थं
'पेषवा'पदमुपैति वदन्तम् ॥६॥

---

4. How contrasted with each other are my dull intellect and Poetry flashing with Alaṅkāras (=1. ornaments; 2. poetic figures)! Of me whose mind is wavering to cross the unfathomable ocean by means of ■ decayed boat, the companion is the pair of lotus-like feet of (my) revered guru and the leap of dust of the lotus-like feet of Mother Tārā.

5. Upamā, etc., ■ prominent among the groups of poetic figures enunciated by the old (rhetoricians). They are being detailed here for the understanding of the beginners.

6. The word 'Peṣava', denoting him who, endowed with wealth (or dignity) and with his sword raised, immensely carried on the crushing of his enemies, has attained a charming meaning, viz., one who carries on the crushing of one's enemies

---

१. अत्र ■ पुस्तकस्था टिप्पणी—'"क मन्दा मे—" अस्मिन् श्लोके विषमललिता-लङ्कारयोः संसृष्टिः । अनुरूपयोर्द्वयोर्घटना विषमः "प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम् । ललितालङ्कृतिस्तत्र कथिता काव्यकोविदैः " इति तल्लक्षणात् अप्रस्तुतप्रशंसायामप्रस्तुते वर्ण्यमाने विशेषणसाधारण्येन प्रस्तुतस्य परिस्फूर्तिः । ललिते तु सरूपादप्रस्तुतवृत्तान्तादेव प्रस्तुतवृत्तान्तस्य गम्यमानत्वम् इति विवेकः ।' इति.

२. अत्र अ पुस्तकस्था टिप्पणी—'अत्र वक्ष्यमाणो निरुक्तिरलङ्कारः संज्ञाशब्दस्यार्थान्तरं प्रकल्प्य वर्णनं निरुक्तिः । यद्वा, "निरुक्तिः पदमञ्जनम्" इति कोशः ' इति.

३. 'पेषणं रिपुगणस्य महाजौ यश्चकार बहुभोग्यतखड्गः '— इति पाठः; पञ्चपूर्वार्धस्य आ पुस्तके.

पेषवा इति पैदं लभमानो
बाजिराय इति कोऽपि महीन्द्रः ।
नाकनाथ इव देवसमूहै-
र्वन्दितोऽभवदहो नरदेवैः ॥७॥
तस्य शुद्धतमवंशकरीराः
सूदयाः परविभेदसमर्थाः
राघवो रघुपतेः समतेजा
बाजिरायतनयः किल साक्षात् ॥
माधवः प्रथमसूनुजनु-
र्नारायणोऽपि च तथाद्भुतवीर्यः ।
प्रायशोऽत्र त इमे नरदेवा
वर्णनाविषयतां किल नेयाः । ८-९॥

---

7. A certain king named Bājirāya attained the position of Peṣvā and, how wonderful was adored by (other) kings like the lord of the heaven (viz., Indra) by groups of gods.

8–9. The करीरs (=1. shoots; 2. offsprings) of his purest वंश (=1. bamboo; 2. race or lineage), that had a brilliant rise and are powerful enough to destroy their adversaries, are Rāghava, who is an equal of the lord of Raghus (viz. Rāma) in majesty and is Bājirāya's own son, Mādhava and also Nārayaṇa who are of (Bājirāya's) first son and are endowed with wonderful prowess. Indeed, those very kings are to be subjected here to description.

---

१. 'पेशवा'—आ.

२. अत्र पुस्तकस्था टिप्पणी— 'पदमास्पदम् यद्वा, पदं शब्दात्मकं लभमानः प्रतिपाद्यप्रतिपादकभावसम्बन्धेन ' इति.

३. 'स्पृहन्वरी'—आ. ४. 'वाजिराव'—अ, बाजिराव'—इ.

५. 'तस्य शुद्धतमवंशकरीरौ सूदयौ परविभेदसमर्थौ माधवो मधुरिपोः समतेजा राघवो रघुपतेः समकीर्तिः ८ यौ विलोक्य हरिणा इव सिंह शत्रवो हि विदिशो विभजन्ते तानिमाविह महीनरदेवौ प्रायशः प्रतिपदं किल वर्ण्यौ ९।'— इति पाठः ८-९ पद्यद्वयस्य आ पुस्तके.

६. 'वाजिराव०'—अ, 'बाजिराव०'—इ.

रम्यमन्यदपि वस्तु तदीयं
वाजिहस्तिभटवीरशरादि ।
वर्णनीयमिह सम्भवदुक्त्या-
भ्यर्हितत्वमनपायि तथापि[2] ॥१०॥

## II. अर्थालङ्कारविवेचनम्

### १. उपमा

#### (अ) पूर्णोपमा

धर्मोपमानसादृश्योपमेयवाचकैः पदैः ।
परिस्फुरति सादृश्यं स्पष्टं पूर्णोपमा हि सा ॥१॥

यथा—

माधव ! नरेन्द्रमौले प्रौढस्तीव्रः परः प्रतापस्ते ।
दावानल इव दुर्हृदां चेतोविपिनान्यरं दहति ॥११॥

---

10. Other charming objects belonging to them, e. g, horses, elephants, warriors, heroes, arrows etc, too, along with their unfailing excessive respectability, are to be related here by means of possible expression.

***Karikā 1.*** *Pūrnopamā is that in which similarity manifests itself distinctly by means of words denoting the (common) quality, the standard of comparison, the resemblance and the subject of comparison.*

11. O Mādhava, the head of kings ! thy valour, violent, intense and surpassing, like a forest-conflagration excessively burns the forest-like hearts of thy enemies

---

१. '०भ्यर्हितत्वमनय'°वितथा'पि'—अ, '०भ्यर्हितत्वमनयोस्तु तथा'पि'—आ.

२. अत्र अ पुस्तकस्था टिप्पणी— 'हस्त्यश्वादीनामपि तदीयत्वेन वर्णनात्प्रकृतराज्ञो मुख्यत्वं न गतमित्यर्थः ' इति.

३. 'उपमानोपमेये द्वे धर्मसादृश्यवाचके यत्रचतुरुपादाने शुद्धा पूर्णोपमा मता ॥' इति पाठः [illegible] पुस्तके.

४. 'माधवरायं नरेश'— आ, 'राघवराव नरेश'— इ.

अत्र प्रताप उपमेयं, दावानल उपमानम्, 'इव'शब्दो वाचकः, प्रौढत्वादि विपिनदाहकर्तृत्वं च साधारणो धर्मः चतुर्णामप्युपादानात्पूर्णोपमा ।

यथा वा—

श्रीपेषवामाधवरार्यबाणाः[1]
परःशता दक्षिणवाममुक्ताः ।
रामार्जुनीया इव वेगवन्तो
भित्त्वारिकायं कृतिनो भवन्ति ॥१२॥

अत्र प्रकृतराज्ञो बाणा उपमेयं[2], रामार्जुनीयत्वेन गृह्यमाणाः प्रकरणवशात्तदीया बाणा उपमानम्[3], 'इव'शब्दो वाचकः, नियमेन परकायभेदनात्कृतार्थीभवनं साधारणो धर्मः, इति[4] चतुर्णामप्युपादानात्पूर्णोपमा ।

यथा वा—

नारायण[5] ! जनानन्ददायिन् ! पूर्णकलानिधे ! ।
चन्द्रज्योत्स्नेव ते कीर्तिर्व्याप्नोति स्वर्भुवस्तलम् ॥१३॥

अत्रोपमेयं कीर्तिः, उपमानं ज्योत्स्ना, 'इव'शब्दो वाचकः, स्वर्भूतलयोर्व्यापनं साधारणो धर्मः, इति[6] पूर्णोपमा ।

यथा वा—

गुणसंयुक्तं दोषं शरमिव कर्षन्महाशयेन त्वम्
उज्झसि शरमिव दोषं गुणं तु कर्णान्तिकं नयसे ॥१४॥

---

12. The numerous (lit more than ■ hundred) arrows of the revered Peṣavā Madhavarāya, charged from the left and the right and bearing great velocity, like those of Rāma and Arjuna, gain their end after piercing through the enemies' bodies

13. O Nārayaṇa who givest delight to people and art ■ पूर्णकलानिधि (— 1. the full moon; 2. a complete receptacle of 64 fine arts)! like the moon-light thy glorious fame pervades the heaven and the surface of the earth.

---

१. '०माधवराव०'—अ, '०राघवराव०'—इ. २. 'उपमेयाः'—अ, आ, इ. ३. 'उपमानानि'—आ. ४. पदं नास्ति आ पुस्तके. ५. श्रीमाधव'—आ. ६. चतुर्णामप्युपादानात'—आ.

'हे राजन्' इति शेषः । महता शयेन हस्तेन, गुणसंयुक्तं ज्या-संयुक्तं, शरमिव । महता माहात्म्यशालिना, न तु महत्परिमाणवता, आशयेनान्तःकरणेन । माहात्म्यं च प्रकृते गुणापेक्षा दोषापेक्षा च । गुणसंयुक्तं गुणसहितं दोषं । गुणं दोषं चेत्यर्थः । कर्षन् आकर्षन् । शरपक्षे आकर्षणं क्रियाविशेषः; अन्यत्रान्तःकरणेनाकर्षणं ज्ञानं । त्वं[3] शरमिव दोषमुज्झसि त्यजसि । शरपक्षे[4] त्यागो विभागरूपः, दोषस्य त्यागोऽश्रवणं । पुनः । गुणं विद्याशौर्यादिरूपं[5] ज्यां च, कर्णान्तिकं कर्णसामीप्यं, नयसे । गुणं शृणोषि ज्यां च श्रोत्रसीमां प्रापयसि ।

यद्यप्यत्रोपमानभूतयोर्ज्याशरयोरुपमेययोर्गुणदोषयोश्च नैकः साधारणो धर्मः, तथापि ज्याशरयोर्गुणदोषयोश्च बिम्बप्रतिबिम्बभावेनाभेदाध्यवसायात् 'कर्षन्'इत्याद्येकपदोपात्ततयाभेदाध्यवसायाच्च साधारणधर्मतेति पूर्वतो विच्छित्तिविशेषः वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालङ्कारिकाणां समयः ।

## (आ) लुप्तोपमा

A. अथ लुप्तोपमा । सा चाष्टधा—१ वाचकलुप्ता, २ धर्मलुप्ता, ३ धर्मवाचकलुप्ता, ४ वाचकोपमेयलुप्ता, ५ उपमानलुप्ता,

---

14 Thou with thy great mind comprehendest vice along with virtue as thou with thy big hand drawest an arrow attached to the bow-string. Still thou discardest vice as thou dischargest the arrow, but givest an ear to virtue as thou pullest the bow-string to the proximity of thy ears.

A. (**No Karikā**) *Luptoma is of eight kinds— (1) which does not contain a word expressing resemblance, (2) which does not mention the common quality, (3) which does not express the common quality and does not contain a word expressing resemblance, (4) which does not contain a word expressing resemblance and does not mention*

---

१. पद नास्ति ब पुस्तके. २. 'न तु महत्परिमाणवता इति' नास्ति आ इ पुस्तकयोः. ३. पदं नास्ति अ इ पुस्तकयोः. ४. एकत्र'—आ. ५. 'सुविद्याशौर्यादिरूपं'—आ. ६. 'ोभावेनाभेदात्'—आ, ब. ७. लुप्तोपमापरिभाषात्मिका कारिका त्रिष्वपि अ आ इ पुस्तकेषु नोपलभ्यते.

६ वाचकोपमानलुप्ता, ७ धर्मोपमानलुप्ता, ८ धर्मोपमानवाचकलुप्ता चेति ।

तत्राद्यानामुपमानलोपरहितानां चतसृणामुदाहरणानि, यथा—

चन्द्रकान्तश्चन्द्रतुल्यवदनो मदनन् स्त्रियाम् ।
तपनीयन् प्रतापेन दृष्टो माधवभूपतिः ॥१५॥

चन्द्र इव कान्तस्तथोक्तः । 'उपमानानि सामान्यवचनैः' इति समासः ।

■■ चन्द्र उपमानं, राजोपमेयं, कान्तत्वं साधारणो धर्मः । एतेषां त्रयाणामुपादानेऽपि वाचकस्य 'इव'शब्दस्यानुपादानाद्वाचकलोपः स च समासविधायकशास्त्रकृतः । अतो वाचकलुप्ता

चन्द्रेण तुल्यं वदनं यस्येति तथोक्तः । अत्रोपमानं चन्द्रः, उपमेयं वदनं, 'तुल्य'शब्दो वाचकः । एतेषां त्रयाणामुपादानेऽपि धर्मानुपादानाद्धर्मलोपः । स चैच्छिकः, 'कान्त्या चन्द्रतुल्यवदनः' इत्यपि वक्तुं शक्यत्वात् । सेयं धर्मलुप्ता ।

स्त्रियां मदनन् । मदन इवाचरतीति मदनति । मदनतीति मदनन् । अतिसौन्दर्यशालितया स्त्रीणां मदन इव मोहजनक इत्यर्थः । 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति वार्तिकान्मदनशब्दात्क्विपि 'मदनति' इति सिद्धे ततः 'शतृ'प्रत्यये 'मदनन्' इत्यस्य सिद्धिः

---

*the subject of comparison, (5) which does not mention the standard of comparison, (6) which does not contain ■ word expressing resemblance and does not mention the standard of comparison, (7) which does not mention the common quality and the standard of comparison and (8) which does not mention the common quality and the standard of comparison and does not contain a word expressing resemblance.*

15. King Mādhava, when viewed, appears lovely like the moon; his face is similar to the moon; he acts like Cupid to damsels; and he renders himself like the Sun on account of his splendour

---

१. 'चतुर्णा०'—आ, इ. २. 'राघवभूपतिः',—आ. ३. 'उपमावाचकस्य'—आ. ४.'पद'—आ. ५.'तु ऐच्छिकः'—आ. ६.'किब्वक्तव्यः'—अ. ७.'०शब्दोच्चार'—आ.

अत्रोपमानं मदनः, राजोपमेयम्। एतयोरुपादानेऽपि धर्मवाचकयोरनुपादानाद्धर्मवाचक्यलोपः। मदन इवाचरतीत्यर्थे विहितस्य मदनवत्संमोहनात्मकाचारार्थकस्य क्विप उपमावाचकस्य 'इव' शब्दस्य चोभयोर्लोपात् सेयं धर्मवाचकलुप्ता। धर्मलोपोऽत्रैच्छिकः, 'स्त्रियां संमोहजननेन मदनन्' इत्यस्यापि सुवचत्वात्। वाचकलोपस्तु क्विप्प्रत्ययविधायकशास्त्रकृतः।

तपनीयन् प्रतापेन। प्रतापेन स्वात्मानं तपनं सूर्यमिवाचरतीति तपनीयति। तपनीयतीति तपनीयन्। 'उपमानादाचारे' इति सूत्रादुपमानभूतकर्मवाचकात् 'तपन'शब्दात्क्यचि तदन्ताच्छतृप्रत्ययः। अत्र प्रतापः साधारणो धर्मः, तपन उपमानं। तयोरुपादानेऽपि वाचकोपमेययोरनुपादानाद्वाचकोपमेयलुप्ता। उपमेयलोपोऽत्रैच्छिकः, 'प्रतापेन स्वात्मानं तपनीयन्' इत्युक्तेरपि सम्भवात्

उपमानलोपसंहितानां[2] चतसृणामुदाहरणानि[3],

यथा—

सङ्गो राघवभूपेन[4] धनलाभोऽतिथेश्च यः।
तदेतद्रघुकौत्सीयमद्भुतानन्ददं नृणाम्[5] ॥१६॥

अत्र 'रघुकौत्सीयम्' इत्यस्य 'काकतालीयम्', 'अजाकृपाणीयम्' इत्यादिवन्निष्पत्तिः। तथा हि 'रघु'पदं दानेवीरोत्साहवत्तया रघुस्थितिपरं, 'कौत्स'पदं कौत्सागमनपरम्। काकतालादिशब्दवद्रघुकौत्सपदयोरपि वृत्तिविषये स्वसमवेतक्रियापरत्वात्[6]। तथाविधरघुस्थितिरिव कौत्सागमनमिवेति रघुकौत्सम्। रघुकौत्समिवेति रघुकौत्सीयम्। 'समासाच्च तद्विषयात्' इति सूत्रेण 'छ'प्रत्ययः। इव र्थविषयकात्समासाच्छः स्यादिति तदर्थः। 'रघुकौत्सम्'इत्यत्र समासोऽपि 'समासाच्च तद्विषयात्' इति सूत्राज्ज्ञापका-

---

16. The fact of a guest's association with king Raghava and his (simultaneous) gain of (immense) wealth is like that of the episode of (king) Raghu and (sage) Kautsa and gives marvellous delight to people.

---

१. '०त्मकादाचारार्थकस्य'—अ, '०त्मकाचारार्थस्य'—आ, इ. २. '०रहितानां' —अ. ३. 'चतुर्णां०'—आ, इ. ४. '०दाहरण'—आ. ५. 'माधवभूपेन'—अ. ६. 'दानवरो०'—अ. ७. इदं नास्ति आ पुस्तके.

देव। ■■■ च, तथाविधो[1] रघुस्थितिकौत्सागमनप्रयोज्यो यो रघुकौत्ससमागमस्तत्सदृशो यो रौघवभूपा[2]तिथिसमागमस्तत्प्रयोज्यो यो[3] राघवभूपकर्तृकदानजोऽतिथेर्धनलाभः, ■■ रघुकर्तृककौत्ससम्प्रदानकदानजो यः स्वेष्टा[4]धिकतमो धनलाभस्तत्सदृशः, इत्यर्थः फलितः।

■■■ प्रत्ययार्थोपमायां 'रघुकौत्समिवेति रघुकौत्सीयम्' इत्यत्रोपमेयं रौघवभूपा[5]दतिथेर्धनलाभः, अद्भुतानन्ददत्वं साधारणो धर्मः, 'छ'-प्रत्ययो वाचकः। एतेषां त्रयाणा[6]मुपादानेऽप्युपमानस्य रघुकर्तृकदानज[7]कौत्सीयस्वेष्टा[8]धिकतमधनलाभस्यानुपादानादुपमानलुप्ता।

समासार्थोपमायां 'रघुस्थितिरिव कौत्सागमनमिवेति रघुकौत्सम्' इत्यत्रोपमेयं रौघवभूपातिथि[9]समागमः, आनन्ददत्वं साधारणो धर्मः। तयोरुपादानेऽपि वाचकस्य 'इव'शब्दस्य, उपमानस्य रघुकौत्ससमागमस्य चानुपादानाद्वाचकोपमानलोपः। सर्वोऽप्ययं लोपश्छप्रत्ययविधायककशास्त्रकृतः। सेयं वाचकोपमानलुप्ता।

'अद्भुतानन्ददम्'इति साधारणधर्मानुपादाने प्रत्ययार्थोपमायां धर्मोपमानलोपः, समासार्थोपमायां च धर्मोपमानवाचकानां[9] लोप इति निपुणतरमवधातव्यम्।

## २. ललितोपमा।

उपमाने वोपमेये धर्मारोपस्तयोर्यदि।
क्रियते यत्र ललितोपमा तत्रेति कश्चन॥
पदार्थवृत्तिमप्येनामेके त्वाहुर्निदर्शनाम् ॥२॥

---

*Kārikā 2. If the characteristic property of Upamāna (=the standard of comparison) is attributed to Upameya (=the subject of comparison), or vice versa, there occurs Lalitopamā according to ■ rhetorician (viz., Jayadeva) Other rhetoricians however, term this figure Padārthavṛtti-Nidarśana also.*

१. पद नास्ति आ ■ पुस्तकयोः. २. 'माधवभूपा०'—अ. ३. 'माधवभूप०'—अ. ४. 'स्वेच्छाधिक०'—अ. ५. 'माधवभूपा०'—अ. ६. '०स्वेच्छाधिक०'—अ. ७. माधवभूपा०'—अ. ८. 'रघुकौत्सागमस्य'—अ ९. अत उत्तरं 'त्रयाणाम्' इत्यधिकं आ पुस्तके.

यथा—

सूक्तिर्माधवरायस्य धत्ते पीयूषमाधुरीम् ।
राघवोक्तिषु माधुर्यं पीयूषे श्रूयते हि तत् ॥१७॥

यदि चेत्। उपमानेऽथवोपमेये। उपमानोपमेययोरन्यतरस्मिन्नित्यर्थः। तयोरुपमानोपमेययोः। धर्मारोपः। 'आरोप'पदमहिम्ना, उपमान उपमेय-धर्मारोपः, उपमेये वोपमानधर्मारोपो यत्र क्रियते, सा ललितोपमा। इति [illegible] जयदेवाख्यः। उपमान उपमेयधर्मस्योपमेय उपमानधर्मस्य चासम्भवेन तत्सदृशधर्माक्षेपादौपम्ये पर्यवसानमित्युपमैव सेति तात्पर्यम्।

उदाहरणं 'सूक्तिर्माधवरायस्य' इत्यादि। 'द्वितीयार्धे उपमान उपमेय-धर्मारोपः, प्रथमार्धे चोपमेय उपमानधर्मारोपः'।

अत्रेदं विभावनीयम्। उपमेय उपमानधर्मारोप उपमाननिरूपित-सादृश्ये पर्यवसानाल्ललितोपमास्तु। परं तु, उपमान उपमेयधर्मारोपस्थले 'राघवोक्तिषु' इत्यादावुपमाने उपमेयनिरूपितसादृश्ये पर्यवसानात्प्रतीपपर्य-वसानं युक्तवद्भवतीति ललितप्रतीपमधिकं कुतो नेष्यते? इत्यत्र जयदेव एव प्रेक्षणीय इति।

पदार्थवृत्तिमिति। एके आलङ्कारिकाः। एनां ललितोपमां पदार्थ-वृत्तिनिदर्शनामाहुः। पदार्थवृत्तिनिदर्शनाया वक्ष्यमाणवाक्यार्थवृत्ति निदर्श-नातः किं वैलक्षण्यमिति तु वाक्यार्थवृत्तिनिदर्शनानिरूपणे वक्ष्यते।

---

17. Mādhavarāya's lucid speech bears the sweetness of the nectar. The characteristic sweetness of Rāghava's utterances is heard [illegible] exist in the nectar.

---

१. '०रावस्य'—अ, इ. २. 'माधवोक्तिषु'—आ. ३. नास्ति [illegible] पुस्तके. ४. '०क्षेपादुपमायां'—अ, इ. ५. '०रावस्य'—अ, इ.

६. 'माधवरायस्य राज्ञः सुष्ठु उक्तिः सूक्तिः पीयूषमाधुरीं अमृतमाधुर्यं धत्ते अनेनोप-मानगतो धर्म उपमेये प्रदर्शितः। उपमाने उपमेयधर्मारोपो यथा 'माधवोक्तिषु—'इति। माधव-राज्ञः सूनृतवाक्षु यन्माधुर्यं तत्पीयूषे श्रूयते अत्रापि राज्ञ उक्तिगतमाधुर्यस्य पीयूषे तत्सदृश-धर्माक्षेपादुपमायां पर्यवसानम्।'— इति आ पुस्तके पाठः.

७. 'चिन्तनीयम्'—आ. ८. 'माधवोक्ति०—आ. ९. 'उपमाने' इति नास्ति [illegible] इ पुस्तकयोः. १०. '०द्भवतीति'—आ. ११. 'द्रष्टव्य'—अ. १२. 'पण्डिताः'—आ. १३. 'वक्ष्यमाण' इति नास्ति [illegible] पुस्तके.

## ३. अनन्वयः

एकस्यैवोपमानत्वोपमेयत्वं प्रकल्प्यते ।
अनन्वितं यत्तत्रासावनन्वय उदाहृतः ॥३॥

यथा—

माधवस्य किल वीरभटौघाः
सङ्गरे दलितवीरगजौघाः ।
ते विभान्ति त इवोद्यतकुन्ताः
कापि संयति न दर्शितपृष्ठाः ॥१८॥

यत्रैकस्यैवार्थस्यानन्वितमन्वयानर्हमुपमानत्वमुपमेयत्वं च कल्प्यते यैस्तत्रासावनन्वयोऽलङ्कार उदाहृतः । वर्ण्योऽप्यर्थः स्वयं स्वेन सादृश्यं नान्वेतीति व्युत्पत्तेरनन्वितस्याप्यर्थस्य कथनं स्वसदृशान्तरव्यवच्छेदेनानुपमत्वे पर्यवस्यति ।

किल सत्ये । (सङ्गरे) समरे । वीराणां गजौघः, वीरारूढा गजा इत्यर्थः । तेषामोघाः समूहाः । दलिता वीरगजौघा यैस्ते तथोक्ताः । उद्यतकुन्ताः । संयंति सङ्ग्रामे । कापि कुत्रचिदपि । ■ दर्शितानि न प्रदर्शितानि पृष्ठानि यैस्ते तथोक्ताः । आहवेष्वपरावृत्तत्वादिति भावः । माधवस्य राज्ञो ये वीराश्च भटाश्च तेषामोघास्ते त इव माधवीरभटौघा इव विभान्ति ।

---

**Kārikā 3.** *When the same object is made to occupy the positions of both Upamāna and Upameya,* ■ *an incoherent manner as it were, the figure is Ananvaya.*

18. The multitudes of Mādhava's brave warriors have it is said, crushed the hosts of enemies' elephants ■ battles. With their spears raised and having never run away from battles, they indeed look like themselves.

---

१. 'राघवस्य'—इ. २. 'यदसौ तत्रानन्वयो'—आ. ३. नास्ति ■ पुस्तके ४. '...व्युत्पत्तेः ॥ अनन्वित०'—इ. ५. 'गजास्तथोक्ताः'—आ. ६. 'तेषामोघ.'—अ, इ. ७. 'समूहः'—अ, इ. ८. 'दलितो'—अ, इ. ९. 'वैरिगजौघो'—आ. १०. नास्ति अ ■ पुस्तकयोः. ११. नास्ति अ ■ पुस्तकयोः. १२. नास्ति अ इ पुस्तकयोः १३. 'राघवराज्ञो'—इ. १४. नास्ति आ पुस्तके. १५. अत उत्तरं 'माधववीरभटौघाः' इत्यधिकं आ पुस्तके. १६. 'राघव०'—इ.

इत्युक्त्या, आहवे पराक्रमवत्त्वे[1] माधवीरभटौघेष्वनुयोगित्वप्रतियोगित्व-सम्बन्धाभ्यामन्यसादृश्यव्यवच्छेदेनानुपमत्वपर्यवसानमवगम्यते[2] ।

### ४. उपमेयोपमा

द्वयोश्चेदुपमानत्वोपमेयत्वप्रकल्पनम् ।
पर्यायेण वदन्त्येनामुपमेयोपमां बुधाः ॥४॥

यथा—

[illegible] सपत्नबलपेषविधाता
वेधवेति पदमर्थवदश्नन् ।
तस्य सैनिकगजा इव शैला
भान्ति शैलसदृशाश्च गजेन्द्राः ॥१९॥

अत्र द्वयोः पर्यायेणोपमानत्वोपमेयत्वप्रकल्पनेन[3] सदृशान्तरतृतीय-व्यवच्छेदो लभ्यते ।

### ५. प्रतीपम्

#### (अ) प्रथमम्

विषयिण्युपमेयत्वं कल्प्यते जनरञ्जनम् ।
प्रतीपं तद् बुधैः प्रोक्तं प्रतीपोक्त्या प्रसिद्धितः ॥५॥

---

***Kārikā 4.*** *When two things are made to alternately occupy the positions of Upamāna and Upameya, the learned call the figure Upameyopamā.*

19. Mountains look like the army-elephants of him who, the crusher of hostile forces as he is, has rendered the word 'Peṣava' full of significant meaning. His lordly elephants, again, resemble mountains.

***Kārikā 5.*** *If the standard of comparison (i. e. Upamāna) is made to occupy the position of Upameya in a manner pleasing to people, the figure is termed by the learned as Pratīpa on account of its stating something contrary to the established usage.*

---

१. 'इत्युक्ते'—आ. २. [illegible] उत्तरं वाक्यांशस्य पाठः 'माधववीरभटौघसदृशः कोऽपि वीरभटसमूहो न [illegible]नुयोगित्वप्रतियोगित्व०' इति [illegible] पुस्तके. ३. 'राघव०'—इ. ४. '०नानुपमत्वे'—अ. ५. '०त्वकल्पनेन'—आ.

यथा—

मारुता अभिगतोद्भटवीर्याः
सन्निभाश्चतुरगैस्तुरगैस्ते ।
भूप राघव ! मनांसि समानि
स्वस्तुरङ्गपटलैरतिवेगैः ॥२०॥

गौतं गमनम् । सम्यक्सदृशाः सन्निभाः, इत्यस्यपदविग्रहः ।

यथा वा—

इदं प्रियानेत्रसमानकान्ति
मृगीक्षणद्वन्द्वमिदं च पद्मम् ।
तुदत्यरुहेति वनेष्वटन्तः
शोचन्ति मो माधव ! शत्रवस्ते ॥२१॥

(आ) द्वितीयम्

अवर्ण्यस्योपमेयस्य लाभेन तिरस्क्रिया ।
वर्ण्यस्य क्रियते तत्र प्रतीपं तदपि स्मृतम् ॥६॥

---

20. Winds whose force is tremendous on account of their whirl-movements are highly similar to thy horses moving in crooked gait. O king Rāghava ! (human) minds are similar to the hosts of thy extremely swift horses

21. "Alas ! This pair of a female deer's eyes, which, also this lotus, bears the charm of my beloved's eyes, cuts my vitals"—thus lament O Mādhava ! thy enemies roaming in forests.

*Kārikā 6. When an Upameya which is the subject of description is subjected to disparagement through the discovery of another Upameya which is not the subject of description, it is also regarded as Pratīpa.*

---

१. 'माधव'—आ. २ नास्तीदं पदद्वयं आ इ पुस्तकयोः. ३. इदं वाक्यं नास्ति पुस्तके. ४. 'तुदत्यरुं हेति'—आ. ५. 'राघव'—अ, इ.

यथा—

श्रीमन्प्रभो ! माधव ! ते प्रचण्ड-
[redacted] वृथैव दर्पः ।
अस्त्येव तादृक्किल माधवीय-
प्रचण्डचण्डांशुमरीचितापः ॥२२॥

हे श्रीमन्[1] माधव प्रभो ! ते[3] तव, प्रचण्डो यः प्रतापतापः प्रताप-जन्योऽरिसन्तापः, [redacted] दर्पः माधवसम्बन्धी प्रचण्डोऽन्यो मत्सदृशो नास्ती-त्यभिमानः । वृथैव । किल सत्ये । तादृक् तादृशः, माधवसम्बन्धी वैशाख-सम्बन्धी, प्रचण्डो यश्चण्डांशुमरीचितापोऽस्त्येव ।

अत्रावर्ण्यस्य चण्डांशुमरीचितापस्योपमेयस्य लाभेन वर्ण्यस्य माधव-प्रभुप्रतापतापस्य 'वृथैव दर्पः' इत्यनेन तिरस्करणात्प्रथमप्रतीपलक्षणाक्रान्त-त्वेऽपि तिरस्करणस्याधिक्यात्पृथङ्निर्देशः ।

(इ) तृतीयम्

लाभाद्वर्ण्योपमेयस्योपमाने या तिरस्क्रिया ।
प्रतीपं तदपि प्रोक्तं प्रसिद्धस्य तिरस्कृतेः ॥७॥

यथा—

पीयूष [redacted] कस्ते विपुलोऽभिमानो
माधुर्यमस्त्येव मयीति भूयः ।

---

22. O revered king Mādhava ! in vain is the pride of the glow of thy extremely terrific valour, (for) verily there does exist the splendour of the rays of the vehement Vaiśākha Sun which is similar to it.

**Kārika 7.** *If contempt is shown towards Upamāna through the perception of Upameya that forms the subject of description, it, too, is termed Pratīpa* [redacted] *account of its eclipsing* [redacted] *celebrated object.*

23. Wherefore, O nectar this excessive vanity of thine to the purport that intense sweetness dwells in thee alone? Are not present

---

१. 'तव प्रभो माधव ! सुप्रचण्ड०' इति प्रथमपादस्य पाठः अ पुस्तके. २. नास्ति [redacted] पुस्तके. ३. नास्ति अ पुस्तके. ४. 'सुतरां प्रचण्डो'—अ. ५. तिरस्कारस्या०'—आ.

[illegible] सन्ति किं राघवपेषवोऽत्र
सूक्तानि तादृंशि मनोहराणि ॥२३॥

अत्युत्कृष्टतया क्वाप्युपमानभावमसहमानस्य प्रसिद्धस्य पीयूषस्य राघवसूक्तेषूपमानत्वप्रदर्शनेन तिरस्करणात्पूर्वसाद्धिलक्षणं तृतीयं प्रतीपम्।

[illegible] वा—

वृथाभिमानोऽक्षिपदो महामुने-
र्वृथैव दर्पः कणभुङ्महेशितुः।
श्रीरामशास्त्री भवतीह तादृशो
न किं भुवि श्रीनृपमाधवार्चितः ॥२४॥

(ई) चतुर्थम्

उपमेयेन वर्ण्येनोपमानिष्पत्तिकीर्तनम्।
अवर्ण्यस्योपमानस्य प्रतीपं तदपि स्मृतम् ॥८॥

यथा—

समुद्रधैर्यं बतं राघवीयधैर्येण मूढैरुपमीयतेऽत्र।
कल्पद्रुमं माधवभूपदोष्णा समं वदन्तीति मुधापवादः ॥२५॥

---

in this world the lucid utterances of Rāghava-Peṣavś which are alike charming ?

24. In vain is the self-conceit of the great sage Akṣipād; in vain is the pride of the great master Kaṇāda. Does not revered Rāmaśāstrin, adored by the dignified King Mādhava, reach the [illegible] level on this earth ?

*Kārika* 8. *The declaration of the non-accomplishment of comparison of Upamāna that is not the subject of description with Upameya that forms the subject of description is also regarded as Pratīpa.*

25. Strange that the graveness of the ocean is compared by ignorant persons in this world to Rāghava's fortitude ! (People) declare the celestial tree to be equal to king Mādhava's forearm, but it is a false report.

---

१. 'माधव०'—आ. २. 'माधव०'—आ. ३. '०नृपराघवा०'—अ, इ. ४. 'समुद्र ! धैर्यं तव' इति पाठः अ पुस्तके.

अत्र 'मूढैः' इति, 'मुधापवादः' इति पदाभ्यामुपमानिष्पत्तिरुद्घाटिता। अत्रोपमानस्य समुद्रधैर्यादेरत्युत्कृष्टेन वर्ण्येनोपमेयेन[1] सादृश्यमपि दूरीकृतमित्युत्कर्षः प्रतीयते।

(ङ) पञ्चमम्

कैमर्थ्यमुपमानस्य मन्यते जनरञ्जनम्।
प्रतीपं तदपि प्रोक्तमुपमानाक्षेपकं परैः ॥९॥

[3]यथा—

भिक्षो! धनार्थिंस्त्वयि चेत्प्रसन्नो-
ऽखिलप्रदो मॅाधवभूमिपालः।
तत्किं कुबेरेण सुरद्रुमेण
वदन्ति लोका इति भिक्षुलोकम् ॥२६॥

इदं प्रतीपमुपमानाक्षेपकत्वादाक्षेपालङ्कारः परैरन्यैः प्रोक्तः।

## ६. रूपकम्

विषयस्योपमानीयाभेदतादृप्यरञ्जनम्।
आधिक्यन्यूनतासाम्ये रूपकं तत्त्रिधा मतम् ॥१०॥

विषयस्योपमेयस्योपमानसम्बन्धिभ्यामभेदतादृप्याभ्यां रञ्जनं लेपनं, तदारोपेण वर्णनं, रूपकं रूपकालङ्कारः तद्रूपकम्। आधिक्ये, न्यून-

---

*Kārikā 9. If, in a manner charming to people, Upamāna is ignored to be purposeless that too, is regarded by others as Pratīpa, since it detracts the Upamāna.*

26. "O beggar desirous of riches! If king Mādhava who gives away everything is pleased with thee, of what use are Kubera and the celestial tree?'—thus utter people to the host of beggars.

**Kārikā 10.** *Rūpaka is the depiction of Upameya as identical with, or having the same appearance as, Upamāna On account of superiority, inferiority or equality, it is regarded to be of three kinds.*

---

१. 'वर्ण्येन सादृश्य०'—आ. २. अत उत्तरं 'सह' इत्यधिकं अ पुस्तके. ३. पदं नास्ति अ इ पुस्तकयोः. ४. 'माधवरायभूपः'—आ, 'माधवरावभूपः'—इ.

तायां, साम्य आधिक्यन्यूनत्वयोरसत्त्वे च, वर्णिते सति[2]। त्रिधा त्रिप्रकारम्। अधिकाभेदरूपकम्, अधिकतादूप्यरूपकं; न्यूनाभेदरूपकं, न्यूनतादूप्यरूपकं; समाभेदरूपकं, समतादूप्यरूपकं च। इदमेव 'अनुभयरूपकम्' इत्युच्यते।

तत्रानुभयरूपकं, यथा—

माधवो माधवः साक्षाद्राघवो राघवः परः।
यौ न मुञ्चति साध्वी श्रीर्देवैरन्यैरपीहिता। २७॥

माधवनामा भूपतिः साक्षान्माधवो विष्णुः। राघवाख्यो[3] नृपः परोऽन्यो राघवो रामः। यौ माधवराघवौ नृपौ[4]। साध्वी पतिव्रता। श्रीर्लक्ष्मी राज्यलक्ष्मीश्च। अन्यैर्देवैरमरै राजभिश्च। ईहिता काङ्क्षिता सत्यपि न मुञ्चति।

'श्री''साध्वी'पदयोः स्वारस्याद्राजभावावस्थायामपि न त्यजतीत्यर्थस्य परिपुष्टिः प्रथममभेदरूपकं, द्वितीयं तु 'परोऽन्यो राघवः' इति भेदप्रतीत्या तादूप्यरूपकम्। वर्णनीयराजभावावस्थायामाधिक्यन्यूनत्वयोरवर्णनादिदं सममनुभयाभेदरूपकमनुभयतादूप्यरूपकं च।

न्यूनतायां, यथा—

माधवो माधवः साक्षाद्विना नन्दकुले जनिम्।
विना मनुकुले जन्म राघवो राघवः परः॥२८॥

अत्र वर्णनीयराजभावावस्थायां न्यूनत्वोक्त्या न्यूनाभेदरूपकमाद्यं, द्वितीयं न्यूनतादूप्यरूपकम्।

---

27. Mādhava is Mādhava (=God Viṣṇu) incarnate and Rāghava is another Raghava (= Rāma) both of whom faithful श्री (= 1. Goddess Laksmī; 2. dignity or wealth) does not quit although she is longed for by other देवs (=1. gods; 2. kings)

28. Mādhava is Mādhava (=Kṛṣṇa) incarnate although he is not born in Nanda's family Rāghava is another Rāghava although he is not born in Manu's race.

---

१. वर्णित'—अ; आ पुस्तके ■ पदं नास्त्येव. २. 'सत्'—अ. ३. 'राघवनामा'—आ. ४. नास्ति अ पुस्तके; राजानौ' इति आ पुस्तके. ५. '०पदस्वारस्या०'—अ, इ.

आधिक्ये, यथा—

राघवो राघवः साक्षाज्जितं येनारिमण्डलम् ।
सेतुबन्धं विनाप्यब्धेः पारेऽपि स्वप्रतापतः ॥२९॥

रामेण सेतुबन्धश्रमेण शत्रुजयः कृतः । वर्णनीयराजभावावस्थायां तु[1] सेतुबन्ध[2]नक्लेशं विनैव शत्रुजयो वर्णितः, इत्याधिक्यादधिकाभेदरूपकम् ।

यथा—

कृष्णोऽयमपरः श्रीमान् रा[3]यो नारायणः प्रभुः ।
दूरीकृत्यैव मालिन्यं पाति विश्वं चराचरम् ॥३०॥

श्रीमा[4]न्नारायणरायः प्रभुरपरः कृष्णः । मालिन्यं श्यामो वर्णो मनोमालिन्यं च ।

अत्र कृष्णस्य वर्णनीयराजभावावस्थायां मालिन्यरूपदोषत्यागेन प्रजापालनवर्णनादधिकताद्रूप्यरूपकमिदम् ।

उदाहरणान्तराण्युन्नेयानि । यथा—

हरेरतिप्रीतिकरां हि राधिकां
वदन्ति केचित्त्वपरे तु सिन्धुजाम् ।

---

29. Rāghava who with his own valour has subdued the host of his enemies even on the other side of the ocean without even constructing a bridge, a Rāghava (= Rāma) himself.

30. This dignified king Nārāyaṇa Raya is another Kṛṣṇa. He protects the moveable and immoveable universe only after dispelling his मालिन्य (= 1. dark complexion; 2 gloom of mind).

31. Some people declare Rādhikā to be dearest to Hari while others declare Lakṣmī (lit. the ocean-born lady) to be so. You, O

१. नास्ति अ आ पुस्तकयोः. २. 'सेतुबन्धक्लेश'—अ, इ.

३ द्वितीयचरणस्य पाठः 'र वो नारायणः प्रभुः' इति ब पुस्तके 'माधवो जनरञ्जनः' इति च आ ब पुस्तकयोः.

४. 'श्रीमन्नारायणरव. प्रभुरपर. कृष्ण.'—अ, 'श्रीमाञ्जनरञ्जने माधवाख्ये नृपेऽपरः'—आ; 'श्रीमाञ्जनरञ्जनो माधवो नृपोऽपरः कृष्णः'—इ.

५. अत आरभ्य 'उपमेयात्मना—' इत्यादिपरिणामालङ्कारव्याख्यारम्भपर्यन्तो भागः ब पुस्तके एवोपलभ्यते; इ पुस्तके चिह्नेन खण्डितत्वं प्रदर्श्य 'अत्र शोधपत्रं' इति लिखितं, किं तु शोधपत्रं नैव नयनगोचरीभवति.

स त्वं प्रभो माधव ! सत्यमेव मां
वदात्र का प्रीतिकरा तवाधिका ॥३१॥

अत्र 'स त्वम्' इत्यनेन राधिकायां लक्ष्म्यां च प्रीतिकर्त्रां भगवता-भेदो वर्णितः, इत्यभेदरूपकम् वर्णनीयराजभावावस्थायामाधिक्यन्यूनत्वयोरप्रतिपादनात्समम् ।

यथा—

कलानिधिः शुचिः श्रीमान्कान्तिमाञ्जनरञ्जनः ।
नृपोऽयमपरश्चन्द्रो मानिनां मानमोचकः ॥३२॥

अत्र 'नृपोऽयमपरश्चन्द्रः' इत्यनेन वर्णनीयस्य राज्ञः प्रसिद्धचन्द्राद्भेदो वर्णितः, इत्यभेदस्य बाधितत्वात्तादूप्य एव पर्यवसानात्तादूप्यरूपकम् । इदमपि समम्, आधिक्यन्यूनत्वयोरवर्णनात् ।

यथा—

साक्षादयं शेषनागो भूधरश्चरणाञ्चितः ।
अनघो राघवः साक्षान्मघवान्न द्विलोचनः ॥३३॥

अत्र पूर्वार्धे वर्णनीयराजभावावस्थायां शेषस्य चरणशालित्ववर्णनादधिकाभेदरूपकम् । द्वितीयार्धे त्विन्द्रस्य वर्णनीयराजभावावस्थायां द्विनयनत्वोक्त्या न्यूनाभेदरूपकम् ।

---

Mādhava being that very (Hari), tell me truly as to which lady is dearest to you.

32. This king is another moon—king who is कलानिधि (=1. is store-house of sixteen lunar digits, viz, the moon, 2 is receptacle of sixty-four fine arts) शुचि (=1. bright 2. pure) श्रीमत् (=1 possesses the twelfth lunar digit called S'rī; is endowed with dignity or wealth), कान्तिमत् (=1. possesses the tenth lunar digit called Kanti, 2 possesses loveliness or lustre) जनरञ्जन (=1. charms the people; 2. gratifies the subjects) and मानिनां मानमोचक (=1 remover of angry lovers' jealous pride, 2 destroyer of proud people's haughtiness or self-conceit).

33. This king is actually the serpent S'eṣa, the supporter of the earth endowed with legs. Sinless Raghava, is Indra incarnate on this earth with but two eyes.

यथा—

देवैर्वन्द्यो राघवोऽयं समदृष्टिः परः शिवः ।
सिन्धोर्जन्म विना कल्पद्रुमोऽयमपरोऽर्थदः ॥३४॥

देवैर्नृपैरमरैश्च ।

अत्र पूर्वार्धे शिवस्य वर्णनीयराजभावावस्थायां विषमदृष्टित्यागेन समदृष्टित्ववर्णनादधिकतारूप्यरूपकं, द्वितीयार्धे च कल्पवृक्षस्य वर्णनीय-राजभावावस्थायां समुद्रजन्मप्रहाणोक्त्या न्यूनतारूप्यरूपकम् ।

अभेदसंसर्गबोधकसाकाङ्क्षविषयविषयिवाचकपदद्वयसमभिव्या-हाराभावेऽपि क्वचिद्रूपकं भवति । यथा—

वीरैर्भोग्यानेकगा भूरसाध्वी
जाने बद्धा राघव . स्वैर्गुणौघैः ।
मग्ना बाध्वाद्धृता यत्त्वयेयं
भाराक्रान्तौ नाशिताश्चैद्यमुख्याः ॥३५॥

हे राघव ! 'त्वया' इति शेषः । वीरभोग्या । अतएवानेकगानेक-पुरुषगामिनी । अत एवासाध्व्यपातिव्रत्यवती । भूः । स्वकीयैर्गुणसमूहैरन-न्यसाधारणैरुपकृतिशौर्यादिगुणसमूहैर्दामसमूहैश्च । बद्धा निबद्धा । नि-जायत्तीकृतेत्यर्थः । अन्यगमनशङ्कयेति भावः । इत्यहं जाने । निजकृतोप-कारादिगुणमेव दर्शयति । यद्यस्मात्कारणात् । त्वया वाराहावतारं दधता भवता । समुद्रे मज्जिता । इयं भूः । उद्धृता । किं च । भाराक्रान्तौ सत्यां ।

---

34. This Raghava who is to be respectfully adored by देवस (=1 gods; 2. kings) is another S'iva with even (i e. two) eyes; he yielding the desired object or wealth, is another celestial tree although he is not born of the ocean

35. I know, O Raghava, that this Earth that is an object of enjoyment to (various) heroes, has intercourse with several men and is (consequently) unchaste has been bound over by thee by means of the masses of thy गुणs (=1. excellent qualities; 2. threads or ropes) since you raised her up while she had submerged into the ocean and destroyed the demons headed by S'iśupala while she had been infested with over-load.

IMPERIAL LIBRARY

शिशुपालादयो भूभारकरा दुराचारिणो हताः। 'आदि'पदाद्राजभावावस्थायामपि प्रभूता[1] दुष्टा नाशिता इत्यर्थः।

अत्र[2] समुद्रमग्नाया भुव उद्धरणकर्तृत्वरूपाद्भूभारभूतशिशुपालादिदुष्टहननेन भूभारहर्तृत्वरूपाच्च वाच्याद्भगवतोऽसाधारणवृत्तान्ताद्व्यङ्ग्यमाणपर्यायोक्तविधया गम्येन वराहरूपिणा वासुदेवेन च भगवताभेदाध्यवसायाद्रूपकम्। वर्णनीयराजभावावस्थायामाधिक्यन्यूनत्वयोरवर्णनादनुभयाभेदरूपकमिदम्

यथा—

अवलोक्य राघव! महौषधयः
कुसुमेक्षणैर्मुखममूर्भवतः।
ननृतुश्चलत्किसलयाग्रकरै-
र्निजनाथदर्शनमुदेव, भृशम् ॥३६॥

अयातस्य महौषधिशालिपर्वतसमीपे कृतनिवेशस्य प्रस्तुतराज्ञः पुरो, वने रघुनाथस्य पुरोऽपि वा, कस्यचिदुक्तिरियम्। निजनाथ ओषधिनाथ ओषधिपतिश्चन्द्रः तद्दर्शनजन्यमुदेवेत्युत्प्रेक्षा

अत्र 'कुसुमेक्षणैः' इत्यत्रावलोकनानुगुण्यादुत्तरपदार्थप्रधानमयूरव्यंसकादिसमासेऽभ्युपगते, उत्तरपदार्थीभूतेक्षणपदार्थान्वयानुरोधात् 'किसलयाग्रकरैः' इत्यत्र कराग्रान्वयानुरोधाच्चौषधिषु निजपतिदर्शननन्दितनृत्याभिनयशालिनाग्रिकात्वं गम्यम्, इत्येकदेशविवर्त्तिरूपकमिदम् दीक्षितैरपि

---

36. O Rāghava (=1 Poṣava Raghunāthārao, 2 Rama)! those great herbs, on observing thy face with their eyes in the form of flowers, set to dancing wildly by means of the foreparts of their hands in the form of tender shoots set to motion as it were, on account of the glee at the sight of their own master (viz the moon)

---

१. 'भूता' इति मूल (अ) पुस्तकस्थः पाठः; स तु लेखकप्रमादसम्भूतो भाति.

२. एतदादिषु वाक्येष्वाधारभूते अ पुस्तके बहवो लेखकप्रमादाः सन्ति, ते चात्र कथमपि संशोध्य मूलपाठो निर्धारितः.

'निरीक्ष्य विद्युन्नयनैः पयोदो
मुखं निशायामभिसारिकायाः ।
धारानिपातैः सह किं ▪ वान्त-
श्चन्द्रोऽयमित्यार्त्ततरं ररासे ॥'—

इत्यत्रैकदेशविवर्त्तिरूपकमेव प्रतिपादितम् ।

अत्रेदं विभावनीयम् । उपमानतादात्म्यताद्रूप्यान्यतरारोपो रूपकम्, 'अस्ति चेदं मुखं चन्द्रः', 'मुखमिदमपरश्चन्द्रः' इत्यादाविति लक्षणसङ्गतिः । उपमाननिवेशाच्च

'श्रीविलासाः पण्डितानां कटाक्षा राघवप्रभोः ।'

इत्यादौ हेत्वलङ्कारे नातिव्याप्तिः, तत्रोपमानतादात्म्यारोपाभावात्

'हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ।'

इति तल्लक्षणात् । परं ▪

'नेदं मुखं सहासायाः किं तु फुल्लं सरोरुहम् ।'

इत्यादौ शुद्धापह्नुतावतिव्याप्तिः, उपमानतादात्म्यारोपस्य तत्र सत्त्वात् । उपमेयतावच्छेदकसामानाधिकरण्येन तादृशारोपो रूपकम् । शुद्धापह्नुतौ तूपमेयतावच्छेदकं निषिध्योपमानतादात्म्यारोपः । उपमेयतावच्छेदकोपमानतादात्म्यारोपयोर्विरोधोपगमान्नोपमानतादात्म्यारोपस्योपमेयतावच्छेदकसामानाधिकरण्यावच्छिन्नत्वं, 'तादृशसामानाधिकरण्येन' इति तृतीयाया अवच्छिन्नत्वार्थकत्वात् । तादृशावच्छिन्नत्वं च तादृशसामानाधिकरण्येन भासमानत्वम् रूपके तु 'मुखं चन्द्रः' इत्यादौ तदस्तीति चेत्, एवमपि

'विकसत्कुसुमं नैतत्किं तु तत्सस्मिताननम्' ।

इत्यादिपर्यस्तापह्नुतावतिव्याप्तिः, तत्रोपमानतादात्म्यारोप उपमेयतावच्छेदकसामानाधिकरण्यसत्त्वात् । तद्वारणयोपमानतावच्छेदकनिषेधारोपापूर्वकत्वेन तादृशारोपो विशेषणीय इति चेत्, तदासम्भवः । रूपके हि सर्वत्र पुरुषान्तरकृतोपमानतावच्छेदकनिषेधारोपापूर्वकत्वस्य तादृशारोपे सम्भवात् । तद्वारणायैकात्मवृत्त्युपमानतावच्छेदकनिषेधारोपापूर्वकत्वेन

१. अत्र 'निषेधारोपो नास्ति पूर्वं यस्येत्यर्थः' इति टिप्पणी स्वाधारभूत (अ) पुस्तकस्था दृश्यते ।

तादृशारोपो विशेषणीय इति चेत्, तथापि निदर्शनायामतिव्याप्तिः; तत्रापि उपमेयीभूतवाक्यार्थे उपमानीभूतापरवाक्यार्थाभेदारोपस्य तादृशस्य सत्त्वात्। तद्वारणायैकात्मवृत्त्युपमानतावच्छेदकनिषेधारोपापूर्वकोपमेयतावच्छेदकसामानाधिकरण्यावच्छिन्नवाक्यार्थातिरिक्तोपमानाभेदतादूप्यान्यतरारोपो रूपकं, निदर्शनायां वाक्यार्थाभेदारोपसत्त्वान्नातिव्याप्तेरिति चेत्, तथापि

'[1]दुष्टमैत्री मनुष्याणामरिमन्त्रनिषेवणम्।
कूलच्छायासुखासक्तिर्बकविश्वसनं झषे॥'

इत्यादिनिदर्शनायामतिव्याप्तेरपरिहारः, तत्र वाक्यार्थातिरिक्तोपमानाभेदारोपसत्त्वात्। तद्वारणाय किञ्चिद्विशेषणविशिष्टोपमानाभेदारोपनिवेशे पुनर्विशिष्टाभेदरूपके

'[2]भर्गेणोच्चैर्जटाभार उत्क्षिप्तः प्रभुणेच्छया।
ललाटगतनेत्राग्नेः शिखाजालं पुनातु वः॥'

इत्यादौ विशिष्टरूपकेऽव्याप्तिः। तद्वारणाय तादृशनिषेधारोपापूर्वकतादृशसामानाधिकरण्यावच्छिन्नबिम्बप्रतिबिम्बभावापन्नवस्त्वविशिष्टोपमानाभेदतादूप्यान्यतरारोपो रूपकमिति वक्तव्यम् 'भर्गेणोच्चैर्जटाभार' इत्यादौ विशिष्टरूपके बिम्बप्रतिबिम्बभावाभावात्तत्र वह्निशिखासाधारणधर्मस्योर्ध्वज्वलनशालित्वरूपस्य सम्पादनार्थमेव विशेषणोपादानम्। न तु बिम्बप्रतिबिम्बभावोऽप्यस्ति

'अङ्घ्रिदण्डो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे।
विधिविष्टरपद्मस्य नालदण्डो मुदेऽस्तु वः॥'

इति दीक्षितोदाहृतपद्यवत्। इति न चात्र विशिष्टरूपकेऽव्याप्तिवारणाय बिम्बप्रतिबिम्बभावानापन्नोपमानतादात्म्यारोप एव निवेशनीयः। तथा सति सावयवरूपकेऽव्याप्तिः, तत्र बिम्बप्रतिबिम्बभावानापन्नोपमानाभेदारोपाभावात्। तद्वारणाय तादृशवस्त्वविशिष्टेति सावयवरूपके विशिष्टाभेदारोपाभावान्नाव्याप्तिः।

---

१. निदर्शनालङ्कारनिरूपण आगमिष्यमाणं १०७ तमं पद्यमिदम्.
२. निदर्शनालङ्कारनिरूपण आगमिष्यमाणं १०८ तमं पद्यमिदम्.

## ७. परिणामः

उपमेयात्मना यत्रोपमानं तत्क्रियाक्षमम् ।
भवेद्यदि तदा प्रोक्तः परिणामो बुधैरिह ॥११॥

यदुपमानं यत्रोपमेयात्मना प्रकृतक्रियाक्षमं भवेत्, तदा तत्र बुधैः परिणामः प्रोक्तः ।

यथा—

रामचन्द्रसुकलामृतपाने
लालसं निभृतपक्ष्म सुकान्ति ।
जानकीनयनरम्यचकोर-
द्वन्द्वमादिशतु ते कमनीयम् ॥३७॥

राज्ञ्याशीरियम् । जानक्याः सीताया नयने एव रम्यचकोरद्वन्द्वं रमणीयखञ्जनयुगलं, तथोक्तं । ते तुभ्यं । कमनीयमभीप्सितं । आदिशतु प्रयच्छतु ।

न चात्रोपमितसमासोऽस्तु, तथा सति पूर्वपदार्थस्य प्राधान्येन कमनीयदानस्यापि 'सैकर्यादिति वक्तव्यम् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रात्साधारणधर्मानुपादान एव तद्विधानात्; प्रकृते च कलापानलालसत्वादेः साधारणधर्मस्य सत्त्वात् । एवं च, मयूर-

---

*Karika 11. In cases where Upamāna becomes competent to perform the present function as being identified with Upameya, the figure is termed Parinama by the learned*

87. May the pair of charming Cakora birds in the form of Jānakī's eyes, that possesses exquisite beauty has its eye-lids steady and is absorbed in drinking the nectar in the form of the lovely digits of Rāma-moon (i.e the moon in the form of Rama), grant thee thy desire.

---

१. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि [illegible] पुस्तकेषु विद्यते. २. अन्वयप्रायेयं वृत्तिः आ इ पुस्तकयोर्नैव दृश्यते ३. अयं ग्रन्थकर्तुरुपोद्घाते विद्यमानो द्वितीयः श्लोकः प्रायेण. तत्र खलु 'ते' इत्यस्य स्थाने 'मे' इति पदम्. ४. नास्ति अ पुस्तके; 'राज्ञि आशीर्वादोऽयं' इति आ पुस्तके ५. 'जानकी सीता, तस्या नयने'—आ. ६. 'ोमीप्सितं—आ. ७. 'पूर्वपदार्थप्राधान्येन' —आ, इ. ८. 'सम्भवादिति'—आ.

व्यंसकादिसमासे प्रधानीभूतस्योत्तरपदार्थस्य चकोरस्य जानकीनयनात्मना परिणतिं विना कमनीयदानासम्भवात्तन्नयनात्मतापत्तिमपेक्षते इति परिणामोऽलङ्कारः[1] ।

रामो दाशरथिश्चन्द्र इवेति रामचन्द्रः । तस्य शुकला[2] लावण्यममृतमिवेति । तस्य पाने सादरावलोकने लालसं लोलुपं । चकोरपक्षे तु, रमयत्याह्लादयतीति रामः स चासौ चन्द्रश्च । तस्य कलाः षोडशत्वेन प्रसिद्धाः ता[3] एवामृतं । तत्पाने लालसम् । इत्यर्थभेदेऽपि श्लेषेणैकपदोपात्ततयाभेदा[4]ध्यवसायात्प्रथमं साधारणधर्मत्वम् ।

न त्वस्त्वेवं साधारणधर्मता, तथापि '—नयनै[5]रम्यचकोर—' इत्यत्र मयूरव्यंसकादिसमासेनोत्तरपदार्थचकोरस्य प्राधान्ये 'रामचन्द्र—' इत्यत्र चोपमितसमासे प्रधानीभूतपूर्वपदार्थरामीयकलापानं[6] चकोरस्य न सम्भवतीति वाच्यम् । जानकीनयनात्मना परिणामेन तत्सम्भवात् । न च तर्हि नयनात्मतापत्त्यनपेक्षणाद् 'राम एव चन्द्रः' इत्येव समासोऽस्त्विति वाच्यम् तथा सत्यत्रोत्तरपदार्थस्य चन्द्रस्य प्राधान्येन तत्कलापानलालसत्वस्य जानकीनयनयोरसम्भवेन साधारणधर्मत्वं दुरुपपादं स्यात्[7] ।

यद्यप्यर्थभेदेऽप्येकपदोपात्ततयाभेदाध्यवसायात्साधारणधर्मत्वं प्राक्प्रतिपादितमेव, तथाप्यर्थभेदमनादृत्यापि गत्यन्तरमिदमिति द्रष्टव्यम्[8] ।

## ८. उल्लेखः

एकेन वाथ बहुभिरेक उल्लिख्यते यदि ।
बहुधा सा बुधैः प्रोक्ता ह्युल्लेखालङ्कृतिस्तदा ॥१२॥

यदेकेनैक एव विषयभेदाद्बहुधानेकधोल्लिख्यत उल्लेखविषयीक्रियते,

---

*Kārika 12. If an object is apprehended in several ways by one person or by several persons the figure is called Ullekha by learned authorities.*

---

१. 'अलङ्कार.' इति नास्ति आ पुस्तके २. '...कला लावण्य तदेवामृत, तस्य...' —आ. ३. 'ता एवामृत' इति भागो नास्ति आ पुस्तके. ४ '०पदोपात्ततया बिम्बप्रतिबिम्बभावेन साधारणधर्मत्व'—आ इ. ५. 'नयनचकोरेत्येत्र'—आ, इ. ६. '०कलांयाः पानं'—आ. ७. 'स्यादिति द्रष्ट०य'—आ, इ. ८. इदं व क्यं आ इ पुस्तकयोर्नास्ति. ९. 'एकैनैक...'—आ.

तदोल्लेखोऽलङ्कारः । एवं वाथवा यदि बहुभिर्नानाधर्मयोग्य एकस्तत्तद्धर्म-निमित्तभेदाद्बहुधोल्लिख्यते, तदाप्युल्लेखः ।

विषयभेदादेकस्यानेकधोल्लेखो, यथा—

धैर्ये समुद्रो विभवे सुरेन्द्रो
दाने सुरद्रुर्द्रविणे धनेशः
पराक्रमे चापि धनञ्जयोऽयं
रामो नये माधवसार्वभौमः ॥३८॥

अत्र धैर्यादिविषयभेदादेकस्यैवानेकधोल्लेखः ।

यथा वा—

कण्ठे विनीलो नयनेऽतिरक्तो भालेऽर्धचन्द्रो हृदये विशालः ।
जटाकलापे नितरां पिशङ्गो गौरीविभागोऽवतु राघव त्वाम् ॥३९॥

'भाले' इति 'नयने' इत्यत्राप्यन्वेति, भालगतनेत्रस्यैवारक्तत्वात् । यदि चातिरक्तत्वमत्यनुरागशालित्वं, तदा त्रिष्वपि नयनेषु तत्सत्त्वा-द्यथास्थितमेव सम्यक् ।

पूर्वमुदाहरणं रूपकसङ्कीर्णम, इदं ■ शुद्धम्, इति विशेषः

बहूनां सः, यथा—

बालासमूहैर्युवतीसमूहैर्वृद्धासमूहैश्च कुतूहलेन
पुरीं विशन् माधव एष दृष्टः सुरूपवेशो रसिकः सुधर्मा ॥४०॥

---

38 This Emperor Mādhava is the ocean in respect to his fortitude, God India in respect to his majesty, the celestial tree in respect to his liberality, Kubera in respect to his riches, Arjuna in respect to his valour and also Rāma in respect to his moral character (or political wisdom).

39. O Rāghava may he (i. e God S'iva) whose (half) portion is constituted by Gauri, protect thee! he who is dark-blue on his neck, extremely red in his eyes, a bearer of the half-moon on his forehead great in his heart and extremely tawny on his mass of twisted hair.

40. This Mādhava while entering the capital was viewed with curiosity by multitudes of small girls, young damsels and old ladies respectively ■ one wearing a charming dress ■ ■ appreciator of beauty and ■ one attentive to pious duties

---

1. 'तदोल्लिखालङ्कारः'—अ, इ; 'तदोल्लेखः'—आ. २. 'राघवसार्वभौमः'—अ; 'माधवरायभूपः'—आ; 'राघवरावभूपः'—इ. ३. 'ऽतिरिक्तो'—अ. ४. 'राघव'—अ, इ.

पुरीं[1] राजधानीं विशन्प्र[2]विशन्नेष माधवो[3] नृपो[4] दर्शनमात्रलालसानां बालानां[5] समूहैः सुरूपवेशः सुरूपः सुवेशश्च दृष्टः। कन्दर्पवतीनां युवतीनां समूहै[6] रसिकः शृङ्गारदानयोग्यो दृष्टः। संसारभीरुतया धर्ममात्रलालसानां वृद्धानां[7] समूहैः सुधर्मा धर्मशाली प्रजापालनकर्ता दृष्टः।

यथा वा—

कर्णोऽर्थिवृन्दैस्तरुणीसमूहैर्नलोऽरिभिः काल ईतीक्षितोऽयम्।
सुहृद्गणैश्चन्द्र[8] इति प्रदृष्टः पुरं विशन्राघवराजसिंहः ॥४१॥

नगरं प्रविशन्नयं राघवनामा[9] राजशार्दूलो दानसौन्दर्यपराक्रमोप[10]-कृतिशालितयार्थिगणैर्लिप्सया राजा कर्ण इति, युवतीवृन्दै रुच्या राजा नल इति, शत्रुभिर्भयेन काल इति,[11] मित्रवर्गैः स्नेहेन चन्द्र[12] इति, प्रदृष्टो दृष्टः। अनेकधोल्लेखे चार्थित्वरुचि[13]भयस्नेहाः प्रयोजकाः।

इदमुदाहरणं रूपक[14]सङ्कीर्ण[15], पूर्वं तु शुद्धम्, इति विशेषः।

९. स्मृतिमान्, १०. भ्रान्तिमान्, ११. सन्देहवांश्च

**स्मृतिमान् भ्रान्तिमांश्चाथ सन्देहवानिति त्रयः।**
**अलङ्कारा बुधैः प्रोक्ताः सत्सु स्मृत्यादि[16]षु त्रिषु ॥१३॥**

41. This lion like king Rāghava while entering the capital was viewed ▬ Karṇa by masses of suppliants ▬ Nala by groups of young damsels, as Kala (i. e God of Death) by enemies and as the moon by multitudes of friends.

*Karikā 13. The three figures, viz., Smṛtimān Bhrāntimān and Sandehavān are declared by learned authorities respectively when the three (mental states), viz, recollection etc, (i.e. recollection, error and suspicion) occur.*

१. पदमिदं नास्ति अ ▬ पुस्तकयोः. २. प्रविशन्' इति नास्ति ▬ ▬ पुस्तकयोः. ३. 'राघवराजो'—अ, इ. ४. नास्ति आ पुस्तके. ५. नास्ति अ इ पुस्तकयोः. ६. अत उत्तर 'वर्गैः' इत्यधिकं ▬ पुस्तके. ७. अत उत्तरं 'क्षीणां' इत्यधिकं ▬ पुस्तके. ८. 'इति गृहीतः'—आ, इ. ९. 'इवेति दृष्टः'—आ, इ. १०. नास्ति ▬ इ पुस्तकयोः ११. 'राघवराजशार्दूलः'—अ, इ. १२. 'दानसौन्दर्यपराक्रमशालितया'—अ, इ. १३. अत उत्तरं 'प्रदृष्टः' इत्यधिकं ▬ पुस्तके. १४. 'इवेति दृष्ट'—आ; 'इव दृष्टः'—इ. १५. '०क्वचि-विशेषभयस्नेहाः'—आ. १६. 'रूपकोपमाभ्यां सङ्कीर्ण'—आ, इ. १७. 'भ्रान्त्यादिषु'—अ इ.

स्मृतिमान्, यथा—

श्रीराघव क्ष्माधव ! ते प्रयाणे
रजोविलिप्तेषु दिगन्तरेषु ।
गजेन्द्रगम्भीरनिनादपूतौ
स्मरन्ति लोका घनदुर्दिनत्वम् ॥४२॥

भ्रान्तिमान्, यथा—

मैनाकबुद्धिं जनयन्ति नागा
उच्चैःश्रवोभ्रान्तिकरास्तुरङ्गाः ।
तिमिङ्गिलभ्रान्तिकरा भटेन्द्राः
सेनार्णवो माधव . तेऽत्र तथ्यः ॥४३॥

सन्देहवान्, यथा—

रूपलावण्यवानेष पेपॅवा राघवप्रभुः ।
मदनो वाथ रामो वा संशयं गाहते मनः ॥४४॥

## १२. अपह्नुतिः

(अ) शुद्धापह्नुतिः

**अन्यारोपनिमित्तं यत्क्रियते धर्मनिह्नवः ।**

---

42 O revered king Raghava ! people recollect the occurrence of a violently rainy day when dur ng thy expedition the various quarters are densely overspread wit1 dust and the atmosphere is replete with the deep roar of thy chief elephants.

43. Thy elephants [illegible] the (people s) perception of Mainaka mountain; thy horses give rise to the (people's) erroneous impression of Uccaiḥśravas; and thy chief warriors cause themselves to be mistaken for तिमिङ्गिल ( extremely enormous fishes that swallow even a whale). Thy army, O Mādhava ! is a real ocean on this earth.

44. The mind falls into suspicion whether this handsome and charming Peṣavā king Rāghava is Madana ( Cupid) or Rama.

**Karikā 14.** *If the nature of the present object (i.e. Upameya) is denied with the aim of attributing to it that of something else (i. e.*

---

१. 'श्रीमन्प्रभो म धव ते...'—आ. २. '०निदानपूतौ'—आ. ३. 'राघव'—ह. ४. 'माधवो जनरञ्जनः'—आ; 'रापवो जनरञ्जनः'—ह.

शुद्धापह्नुतिरुक्ता सालङ्कारनयगोमिभिः ॥१४॥

वर्णनीये पदार्थे स्वसदृशधर्मारोपाय स्वकीयधर्मस्य कव्युत्प्रेक्षित-धर्मान्तरस्य वा निह्नवः शुद्धापह्नुतिरलङ्कारः ।

स्वकीयधर्मनिह्नवो, यथा —

न व्यालराजोऽपि तु लम्बमूलं
श्रीमाधवस्योरुयशोद्रुमस्य ।
नैते हि गङ्गोडुसहस्रचन्द्राः
पत्राणि पुष्पाणि फलं च तस्य ॥४५॥

एष श्रैसिद्धो व्यालराजः शेषो न अपि तु श्रीमाधवनृपसम्बन्धिनो महायशोवृक्षस्य लम्बायमानं मूलम् । अथ चैते गङ्गोडुसहस्रचन्द्रा न । अपि तु राज्ञो यशोद्रुमस्य पत्राणि पुष्पाणि फलं च । गङ्गासहस्रं पत्राणि, नक्षत्रसहस्रं पुष्पाणि, चन्द्रः फलमित्यर्थः

अत्र शेषनागे स्वधर्मनिह्नवो यशोद्रुममूलत्वारोपाय । गङ्गाप्रवाहादिषु स्वधर्मनिह्नवः पत्रत्वपुष्पत्वफलत्वानामारोपाय । गङ्गानामुडूनां च सहस्रम् ततो द्वन्द्वः । गङ्गोडुगतबहुत्वमादाय बहुवचनम् । 'चन्द्र'शब्दस्यालघुत्वेऽपि गङ्गासहस्रस्याभ्यर्हितत्वात्पूर्वनिपातः । यद्वा, 'नेदं हि गङ्गोडुसहस्रमिन्दुः' इति पाठः । 'इदम्' इत्यस्य लिङ्गविपरिणामेनेन्दावन्वयः ।

---

*Upamana), it is termed Suddha-Apahnuti by persons conversant with the science of Poetics.*

45. This is not the serpent-king (viz. S'esa), but the hanging or extended root of the expansive tree of reverod Mādhava's glorious fame. These, again are not the thousand currents of the Ganges, the multitude of (lit. a thousand) stars and the moon, but respectively the leaves, the flowers and the fruit of that tree.

---

१. 'ोनयवेदिभिः'—आ. २. 'श्रीराघवस्योरु०'—अ, इ. ३. पदं नास्ति आ पुस्तके. ४. 'श्रीराघवसम्बन्धिनो'—अ; 'श्रीमाधवनृपस्य'—आ; 'श्रीराघवनृपसम्बन्धिनो'—इ, ५. 'महद्यशोवृक्षस्य'—आ, इ. ६. नास्ति अ इ पुस्तकयोः. ७. इदं वाक्यद्वयं [illegible] पुस्तकयोर्नास्ति. ८. 'पाठान्तर'—आ.

[1]कव्युत्प्रेक्षितधर्मस्य निह्नवो, यथा—

बिम्बं प्रतीयन्ति परे प्रवालं वदन्ति केचित्किल विद्रुमं च ।
जानेऽधरं [2]राघवनर्त्तकीनां नृपानुरागेक्षणरागरक्तम् ॥४६॥

राज्ञो नर्त्तकीनामधरं प्रत्येकं तासां[3]मधरौष्ठं, परेऽन्ये सभासदः, बिम्बफलं प्रतीयन्ति शङ्कन्ते । केचित्प्रवालं पल्लवम् । 'अपरे' इति शेषः । विद्रुमं वदन्ति । अहं ■ [4]राज्ञोऽनुरागः प्रीती रङ्गश्च, तद्युक्तमीक्षणं प्रेक्षणं, तत्सम्बन्धी रागः, श्लेषेणारक्तता, तेन रक्तमिति जाने [5] ।

अत्रोत्प्रेक्षितधर्माणां बिम्बत्वादीनां निह्नवः परत्वाद्युपन्यासेनार्थिकः । उत्प्रेक्षासङ्कीर्णेयमपह्नुतिः ।

(आ) हेत्वपह्नुतिः

अपह्नवस्तादृशश्चेत्क्रियते युक्तिपूर्वकः ।
हेत्वपह्नुतिरुक्ता सालङ्कृतिर्जनरञ्जना ॥१५॥

यथा—

[6]दाहप्रकर्त्ता जलदो न, किं ■ दावानलः कामविभुप्रयुक्तः ।

---

46. Some courtiers suspect the lips of Rāghava's dancing-girls to be the (ruddy) fruits of the Bimba tree; others take them to be tender sprouts; others, again, regard them to be corals. I, however, think them to be reddened with the राग (—1. Passion; 2. red dye) of the king's lustful gaze.

***Karikā 15.*** *If that sort of denial is preceded by some reasoning, the charming figure is termed Hetu-Apahnuti*

47. "This is not a cloud (lit. ■ giver of water) but a forest-conflagration produced by mighty Cupid, since it tremendously causes

१. 'उत्प्रेक्षितधर्मस्य'—आ. २. 'माधव०'—आ. ३. 'तासामोष्ठं'—आ. ४. 'प्रकृतराज्ञो'—आ. ५. 'रक्तत्वरूपो रागः'—आ.

६. 'सन्तापकर्ता जलदो न किंतु मित्रोपकृत्कामविभुप्रयुक्तः । वनेष्वटन्माधवशत्रु-सङ्घदाहाय दावानल एष धूम्रः ' इति पद्यपाठः, 'सन्तापकर्ता विरहिपरितापकर्ता जलदो न, किं त्वेष वनेष्वटन्तो ये माधवस्य राज्ञः शत्रवस्तेषां सङ्घः समूहस्तस्य दाहाय प्रज्वालनाय मित्रस्य स्वसादृश्यात्, श्लेषेण वसन्तत्वाद्वा, मित्रीभूतस्य उपकृते उपकाराय (?) कामदेव-प्रभुणा प्रयुक्तो नियुक्तो धूम्रो धूम्रायमाणो दावानलो दावाग्निः "दृश्यते" इति शेषः' इति तद्वृत्तिश्च ■ पुस्तके. ■ इ पुस्तकयोर्वृत्तिर्नास्त्येव.

वियोगिचेतो धगिति प्रमोहाज्जल्पन्ति ते शत्रुनृपा वियुक्ताः ॥४७॥

[1]यथा वा—

आतपत्रिष्वहोरात्रं ज्वलनान्न दिवाकरः ।
नाशुप्रज्वलनाद्वह्निः प्रतापस्तव वाडवः ॥४८ ।

अत्र कविसम्भावितधर्मनिह्नवो युक्त्या कृतः ।

[2]यथा वा—

न सौम्यतोग्रते दृष्टेराः पीयूषगरले हि ते ।
अन्यथा तव दृक्पाते कथं प्रीणासि तप्यति ॥४९॥

'हे राजन्' इति शेषः । यस्मिन्सौम्या दृष्टिः पतति, स प्रीणाति । यत्र चोग्रा दृष्टिस्तथा, ■ परि[3]तप्यति ।

(इ) पर्यस्तापह्नुतिः

अन्यत्र तस्यारोपार्थं क्रियते धर्मनिह्नवः ।
पर्यस्तापह्नुतिः सा हि[4] पूर्ववद् द्विविधा मता ॥१६॥

अन्यत्र वर्णनीये वस्तुनि तस्य धर्मस्यारोपार्थं कचिद्वर्णनीयवस्तुनि तदीयधर्मनिह्नवो यैः[5] क्रियते, सा पर्यस्तापह्नुतिः । पूर्ववद् द्विविधा मता, पर्यस्तापह्नुतिः पर्यस्तहेत्वपह्नुतिश्च ।

---

burning heat to the hearts of separated lovers'—thus with bewilderment murmur thy royal adversaries who are separated (from their beloveds).

48. Thy प्रताप (—1. radiance; 2. valour) which is that of a Brāhmaṇa is not the Sun since it blazes day and night even on those bearing umbrellas; nor is it the submarine fire since it flames up quickly.

49 These are not the charmingness and fierceness of thy eye, but certainly the nectar and venom respectively How else would ■ be gratified or mortified at thy glance ?

*Kārikā 16. When the nature (of Upamāna) is denied with ■ view to attributing it to the other object (i.e. Upameya), the figure is Paryasta-Apahnuti which, like the previous one, is regarded to be of two kinds.*

---

१. इदमुदाहरणं तद्वृत्तिश्च नास्ति आ पुस्तके. २. इदमप्युदाहरणं तद्वृत्तिश्च नास्ति ■ पुस्तके. ३. 'तप्यति'—इ. ४. 'तु'—आ. ५. इद पद नास्ति आ पुस्तके.

[1]आद्या, यथा—

यमो न कालोऽपि तु [2]माधवस्य
कालः कृपाणोऽकरुणः करालः ।
हिनस्ति शत्रून्प्रतिकूलचारिणो
[3]जहाति नो राजकुमारवृद्धान् ॥५०॥

पर्यस्तहेत्वपह्नुतिः, यथा—

[4]कल्पद्रुमो नैव वदान्यकाग्रणीः
श्रीमाधवस्यास्य भुजस्तथाविधः ।
कल्पद्रुमो यच्छति याचितं परै-
रयाचितं यच्छति भूपतेर्भुजः ॥५१॥

[5]यथा वा—

शेषो भुजङ्गाधिपतिर्न किं तु
भुजो भुजङ्गाधिपतिर्नृपस्य ।
शेषो वहत्येष हि माधवस्य
मूर्तिं वहत्यस्य तु माधवोऽयम् ॥५२॥

शेषः शेषनागो भुजङ्गराजो न, किं ▮ नृपस्य प्रकृतराज्ञो भुजो भुजङ्गाधिपतिः। आजानुबाहुत्वादिति भावः। एतदेव युक्त्या समर्थयति ।

---

50 Yama is not Kala ( the Supreme Spirit regarded as the destroyer of the universe) ; in fact, Madhava's merciless and dreadful sword is (real) Kala which kills (all) hostile enemies and does not spare (even) kings, boys and old persons

51. The celestial tree ■ certainly not the leader of the generous ; in fact the hand of this revered Madhava is of that description. The celestial tree yields (only) the thing solicited by others, but the king s hand gives away (even) the unsolicited object.

52. S'esa is not the serpent-king ; in fact, the king s arm is the serpent-king. The well-known S'esa bears Mādhava's (=God Viṣnu's) body, but the frame of this arm is borne by Mādhava himself here

---

१. 'पूर्वा'—आ. २. 'राघवस्य'—इ. ३. 'जातु च बालवृद्धान्'—आ. ४. इदं पद्यं नास्ति आ पुस्तके. ५. 'श्रीराघवस्यास्य'—इ. ६. इदमुदाहरणं तद्वृत्तिश्च अ इ पुस्तकयोर्नास्ति.

शेषः शेषनागः, माधवस्य विष्णोः, मूर्तिं देहं, वहति । विष्णोः शेषशायित्वात् । [illegible] पुनः । [illegible] भुजरूपस्य भुजङ्गाधिपतेः, मूर्तिं स्वरूपम्, [illegible] माधवो राजा, श्लेषेण 'नाविष्णुः पृथिवीपतिः' इति शास्त्राच्च विष्णुः । वहति । वाहको नाधिपतिः, किं [illegible] वाह्यस्यैवाधिपत्यमुचितमिति भावः ।

(६) भ्रान्तापह्नुतिः

भ्रान्तापह्नुतिरन्यस्य सम्भ्रान्तौ तन्निवारणे ।
भ्रान्तिस्तु द्विविधा प्रोक्ता स्वतः कव्युम्भितापि च ॥१७॥

यथा—

माधवं शरणं याहि बलिजिज्जनरञ्जनम् ।
पेषवामाधवं किं वा मैवं वामनमाधवम् ॥५३॥

बलिं बलिराजानं बलशालिनञ्च जयतीति बलिजित् । स चासौ जनरञ्जनश्चेति समासैः । तम् । अत्र वामनभगवदभिप्रायेण केनचिदुदिते 'बलिजित्'इत्यादिविशेषणानां माधवपेषवासाधारणत्वात् 'पेषवा माधवं किं वा ?' इति कस्यचिद् भ्रान्तौ, 'मैवं, माधवनृपं मा जानीहि,

*Karikā 17. When there is the occurrence and the removal of another person's error, it is Bhrānta-Apahnuta. The error is said to be of two kinds—viz., 1 self originating and 2 arising out of poetic fancy.*

53. "Take shelter with Mādhava who is बलिजित् (=1. the conqueror of demon Bali; 2. [illegible] conqueror of powerful persons) and जनरञ्जन (= 1. he to whom people are devoted; 2. one who keeps one's subjects contented)."

—"With Peṣavā Mādhava? Is it not?"

—'No, not so. With Vamana who is an incarnation of (God) Mādhava."

१. आ पुस्तके तु 'बलिजिन्माधवो याति बुद्धिमाञ्जनरञ्जनः वामनः किमु नैवासौ पेषवा माधवः स्वयम् ॥' इति पद्यपाठः, 'बलिर्बलिराजा बलिनो बलवन्तश्च, ताञ्जयतीति बलिजिन्माधवो यातीति केनचिदुदिते बलिजिदित्यादिविशेषणानां वामनसाधारणत्ववद् "वामनः किमु" इति कस्यचिद्भ्रान्तौ "नैव, वामनो नैव, किं त्वसौ स्वयं पेषवा माधवः" इति भ्रान्तिनिवारणं कृतम् ' इति तद्वृत्तिश्च. २. अत उत्तरं 'नत्' इत्यधिकं आ पुस्तके. ३. 'समरतं'—अ. ४. 'माधवनृपसाधा०'—अ. ५. 'पेषवा किम्'—अ. ६. 'माधवनृपं माधवं'—अ. ७. पदद्वयं नास्ति आ पुस्तके.

किं तु वामनाख्यं माधवं विष्णुम्'। वामने भगवति माधवनृपभ्रान्तिप्रतिपादनेन नृपे भगवत्सादृश्यप्रतीतिः फलमिति भ्रान्तिवारणं कृतम्।

कव्युम्भिता, यथा—

अयं न शेषो न गुरुर्न मिश्रो
न चाक्षिपान्नापि सुरेशवन्द्यः।
सुपूजितो माधवरायराज्ञा
श्रीबालकृष्णाभिधशास्त्रिं एषः ॥५४॥

गुरुः प्रभाकरः अत्र शास्त्रिणि कविकल्पितशेषादिभ्रान्तिनिवारणं शेषादिसादृश्यं फलति। उम्भिता भ्रान्तिस्तु निषेधमात्रेणोन्नेया।

दण्डी तु कविकल्पितभ्रान्त्यपह्नुतिं तत्त्वाख्यानोपमामाह। उदाहरति च—

"न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे।
इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमा मता॥" इति

(७) छेकापह्नुतिः

स्वरहस्यस्य कथनं नीयतेऽन्यत्र चेद्धियाँ।
गोपनाय तदा प्रोक्ता छेकापह्नुत्यलङ्कृतिः ॥१८॥

---

54. This (man) is neither Śeṣa, nor Guru, nor Miśra, nor Akṣipad, nor even he (—Bṛhaspati) who is adorable by the lord of gods. He, highly honoured by the king Mādhavarāya is indeed the Śāstrin named Śrī-Bālakṛṣṇa.

**Kārikā 18.** *If the disclosure of one's own secret is intelligently interpreted in another way with a view to concealing it, the figure is termed Chekā-Apahnuti.*

---

१. नास्ति अ पुस्तके. २. '०भ्रान्तिप्रदर्शनात्'—इ. ३. 'भगवन्माहात्म्यं प्रतीयते'—इ. ४. 'फलमिति भ्रान्तिवारणं कृतम्' इति नास्ति इ पुस्तके. ५ 'माधवरावराज्ञा' —अ; 'राघवरावराज्ञा'—इ. ६. अत्र मूलपुस्तकस्थटिप्पणी—'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्चेति ह्रस्वः। तत्सामर्थ्यान्न सन्धिः।' इति आ पुस्तके, 'ह्रस्वविधिसामर्थ्यान्न सन्धिः।' इति अ इ पुस्तकयोश्च. ७. 'कविकल्पितभ्रान्तिनिवारणं'—अ, इ. ८. 'उम्भिता' इति नास्ति अ पुस्तके. ९. 'चेद्धिया'—आ, ■. १०. '०त्यलङ्क्रिया'—आ.

'स्वरहस्यस्य' इत्यस्य 'गोपनाय' इत्यत्राप्यन्वयः ।

यथा—

नारायणे प्रभौ लग्नं चेतः सखि मनोहरे ।
राज्ञि नारायणे किं वा न हि लग्नं हरौ मनः ॥५५॥

'मनोहरे नारायणे प्रभौ मे चेतो लग्नमासक्तम्' इति कयाचित्सखीं पुर उदिते सति 'नारायणाख्ये राज्ञि किं वा ?' इति केनचिद्विदग्धेन पृष्टे स्वरहस्यगोपनं कृतं 'न हि' इति, विष्णौ लग्नं न तु राज्ञि ।

यथा वा—

कमले किल तव नयने संमोहयतो ह्यतीव मे चेतः ।
हरिरिति वचनं नीत्वा राधापरतां हसन्पायात् ॥५६॥

लक्ष्मीपक्षे 'कमले' इति सम्बोधनं, राधापरत्वे 'कमले' कमलस्वरूपे इति नयनविशेषणम् ।

(ऊ) कैतवापह्नुतिः

व्याजाद्यैर्निह्नुतिर्यत्र पदैश्चेत्संनिबध्यते ।
कैतवापह्नुतिस्तत्र प्रोक्तालङ्कारकोविदैः ॥१९॥

यथा—

विलासिनीकटाक्षाणां व्यज्जेन माधवप्रभौ ।
निपतन्ति शरव्राताः कामस्य लक्ष्यतश्च्युताः ॥५७॥

---

55. 'My mind, O (female) friend is fixed on lovely lord Nārāyaṇa."
—"On king Nārāyaṇa ? Is it not ?'
—'Certainly not My mind is attached to God Viṣṇu "

56. "Verily, O Lakṣmī ! thy eyes (or the two lotuses in the form of thy eyes) extremely stupefy my mind." —May Hari, laughing while interpreting this utterance as relating to Rādhā, protect (us).

**Karikā 19.** *When concealment ■ made by means of the words "Vyāja", etc. it is termed Kaitava-Apahnuti by persons conversant with poetic figures.*

57. The multitudes of Cupid's arrows under the pretext of the side-long glances of sportive damsels, fall void on king Madhava ■ they slip down from their aim.

---

१. इयं वृत्तिः ■ पुस्तके नास्ति. २. इदमुदाहरणं तद्वृत्तिश्च आ पुस्तके नास्ति. ३. 'आसक्तं'—अ. ४. 'यथा वा' इति पदद्वयं नास्ति आ पुस्तके. ५. 'राघवप्रभौ'—आ, ■

विलासिनीकटाक्षेषु पतत्स्वपि राजा तदायत्तो न भवतीति भावः ।
यथा वा—

दिक्पालदेवा दमदानतुष्टा-
स्तत्तद्दिशां भूपतिकैतवेन ।
[1]श्रीमाधवाय प्रदिशन्ति राज्ञे
वित्तं करैर्दीर्घतरैः सुवर्णैः ॥५८॥

अत्रालीकत्ववाचिना 'कैतव'पदेन नैते तत्तद्दिशां राजानोऽपि त्वे[2]ष्टाविन्द्रादयो दिक्पाला इत्यपह्नुतिरवगम्यते । सुवर्णैः कनकमयैः । दीर्घतरैः सार्वकालिकैः । करैर्दण्डैः । राज्ञो दमदानादि[3]गुणसन्तुष्टा दिक्पालास्तत्तद्दिग्भूपतिकैत[4]वेन सुरूपैर्लम्बायमानै[5]र्निजह[6]स्तैरेव प्रकृ[7]तराज्ञे वित्तं प्रदि[8]शन्तीति श्लेषार्थः स्पष्ट एव ।

[9]अत्रेदं विभावनीयम् । उपमेयतावच्छेदककवितर्कितधर्मान्यतर-निषेधारोपसामानाधिकरण्यावच्छिन्नोपमानतादा[10]त्म्यारोपत्वमपह्नुत्यलङ्कारस्य लक्षणम् । अभेदरूपकेऽतिव्याप्तिवारणायावच्छिन्नान्तं, रूपक उपमानतादात्म्यारोपस्य निरुक्तनिषेधारोपसामानाधिकरण्याभावा[11]दुपमेयतावच्छेदकोपमानतावच्छेदकयोः सामानाधिकरण्यस्य तत्र भानसत्त्वात् । [12]अपह्नुतौ तूपमेय उपमेयतावच्छेदकादे[13]र्निषेधकरणादुपमेयतावच्छेदकादि-

58. The divine guardians of quarters, being pleased with his self-restraint and liberality, offer, under the guise of the kings of various directions, wealth to king Madhava by means of their extremely rich tributes consisting of gold (or with their oblong and handsome hands or trunks)

१. 'ददत्यहो माधवरायराज्ञे' — आ; 'नारायणाय प्रदिशन्ति राज्ञे' — इ. २. '...त्विन्द्रादयोऽष्टौ'—आ. ३ '०दानादिगणतुष्टाः'—आ; '०दानादिगुणतुष्टाः' —इ. ४. '०पतिमिषेण'—आ. ५. 'हस्तैरेव'—आ. ६. 'राज्ञे'—आ, इ. ७. 'ददतीति'—आ, इ. ८. [redacted] आरभ्य 'उत्प्रेक्षा स्यात्कवेरूह्यो—' इत्याद्युत्प्रेक्षाव्याख्यारम्भपर्यन्तो भागः [redacted] पुस्तके नास्ति, इ पुस्तके चिह्नविशेषेण खण्डितत्वं प्रदर्श्य 'अत्र शोधपत्रमस्ति' इति सूचयित्वा पुस्तकाद्धिमक्ते शोधपत्रेऽयं भागो दत्तः. ९. 'तादात्म्यारोपोऽपह्नुतिरतत्त्वं तस्या लक्षणमभेदरूपके...'—अ. १०. '०दुपमेयतावच्छेदकसामानाधिकरण्यस्य [redacted] भानसत्त्वात् '—इ. ११. 'अपह्नुतौ ..धर्मोपादानम्' इति भागस्य स्थाने 'अपह्नुतौ तूपमेय उपमेयतावच्छेदककवितर्कितधर्मनिह्नुतिशाल्यपह्नुतावतिव्याप्तिवारणाय कवितर्कितधर्म्म उपात्तः ।' इति पाठः इ पुस्तके.

धर्मोपमानतावच्छेदकयोर्विरोधोऽवगम्यते । [illegible] एवोपमेय उपमेयतावच्छेदकं निषिध्योपमानतादात्म्यमारोप्यते । कवितार्किकधर्मनिह्नुतिशाल्यपह्नुतावव्याप्तिवारणाय कवितार्किकधर्मोपादानम् ।

आरोपश्च[1] क्वचिदाहार्यनिश्चयरूपः, क्वचिदनाहार्यनिश्चयरूपोऽपि[2]। अन्यथा भ्रान्तापह्नुत्यादावव्याप्त्यापत्तेस्तत्र बाधाद्यभावेनाहार्यारोपासम्भवान्निश्चयत्वनिवेशाच्च[3],

आह्लादित्वं विकाशो वा सुस्मितं वान्न दृश्यते ।
चन्द्रोऽयं कमलं वेदं वक्त्रं वा राघवप्रभोः[4] ॥५९॥

राघवैः[5] प्रकृतो राजा, रामचन्द्रोऽपि[6] ।

अत्र 'वक्त्रं वा' इत्याहार्यसंशये पाक्षिकमुखनिषेधारोपसामानाधिकरण्यस्य पाक्षिकचन्द्रादितादात्म्यारोपसत्त्वेऽपि नातिप्रसङ्गः ।

एतेन

'नेन्दुस्तीव्रो न निश्यर्कः सिन्धोरौर्वोऽयमुत्थितः ॥'

इति दीक्षितोदाहृतपद्ये,

'द्विजपतिप्रसनाहितपातक-
प्रभवकुष्ठसितीकृतविग्रहः ।
विरहिणीवदनेन्दुजिघृक्षया
स्फुरति राहुरयं न निशाकरः ॥'

इत्यादि नैषधीयपद्यादौ च नापह्नुतिः, विरहिवाक्ये निषेधाद्यारोपस्य दोषजन्यत्वेनानाहार्यत्वात्[7], किं त्वपह्नुतिच्छायामात्रम् । अलङ्कारस्तु तादृशस्थले भ्रान्तिमानिति कस्यचिदुक्तिः परास्ता । आहार्यारोपस्यैव निवेशे भ्रान्तापह्नुत्यादावव्याप्त्याहार्यानाहार्यसाधारणारोपस्यैवात्र निवेशात्[8] । तस्माद्दीक्षितोदाहृतपद्यादौ[9] भ्रान्तिमदलङ्कारशालित्वं प्रतिपादयतः

---

59. Is pleasantness or bloom or smile visible here ? Is it indeed the moon or [illegible] lotus or king Rāghava's face ?

१. 'आरोपः'—ह. २. 'क्वचिदनाहार्योऽपि'—ह. ३. 'बाधामात्रेणा०'—ह. ४. 'माधवप्रभोः'—अ. ५. 'माधवः'—अ. ६. 'रामचन्द्रः प्रकृतो राजा च'—ह. ७. '०नैषधादिपद्येऽपि च'—अ. ८. 'भ्रान्तिमानेवेति'—ह. ९. '०दावव्याप्त्यापत्त्याहार्या०'—ह. १०. अत्र अ पुस्तकस्था टिप्पणी—'निषेधमात्रस्यैवेत्यर्थः' इति. ११. '०दीक्षितोदाहरणादौ'—ह.

स्वस्यैव भ्रान्तिमत्त्वमलङ्कार आविष्कृतः ।

यद्यपीदमपह्नुतिसामान्यलक्षणं पर्यस्तापह्नुतावव्याप्तं, तत्रोपमान उपमानतावच्छेदकं निषिध्योपमानतादात्म्यस्योपमेय आरोपादारोपद्वयस्य सामानाधिकरण्याभावात्; तथाप्येतल्लक्षणस्य प्राचीननिर्णीतलक्ष्यानुसाराददोषः। अत एवेयं पर्यस्तापह्नुतिरपह्नुतिसामान्यलक्षणानां क्रान्तत्वादुपमेयतावच्छेदकोपमानतावच्छेदकयोः सामानाधिकरण्यप्रत्ययसत्त्वाद्वाभेदरूपकेऽन्तर्भवितुमर्हति । [2]उपमानतावच्छेदकनिषेधस्त्वभेदारोपदार्ढ्याय। तथा च

'न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ॥'

इत्यादौ [3]प्राचीनस्वीकृतदृढारोपरूपकवदत्रापि दृढारोपरूपकमेवाङ्गीकार्यमिति बहवः । दीक्षितानुयायिनस्तु– "नात्राभेदरूपकमपह्नवस्याधिक्यात्। [4]अन्यथा शुद्धापह्नुतेरप्यप्रतीतविरुद्धधर्मसाहचर्यैकत्वस्य सत्त्वेनाभेदरूपकेऽनन्तर्भावेऽप्याहार्यताद्रूप्यनिश्चयस्य [5]भेदभानस्वसमानत्वात्सा ताद्रूप्यरूपके प्राचीनैः कुतो नान्तर्भाविता ? अपह्नवस्याधिक्यस्य सत्त्वादिति चेत्, पर्यस्तापह्नुतावपीदं तुल्यम् इति विभाव्य [6]दीक्षितैः पर्यस्तापह्नुतिमपि रूपकेऽनन्तर्भाव्य पृथगलङ्कारान्तरत्वेन स्वीकृत्यापह्नुतिमध्ये (सा) पातिता।" इति वदन्ति। तदनुसारेणास्माभिरपि सा [7]रूपकेऽनन्तर्भाव्य पृथग्दर्शितेति।

यदि चोपमेयतावच्छेदकनिषेधारोपसामानाधिकरण्योपमानतावच्छेदकनिषेधारोपासामानाधिकरण्यान्यतरावच्छिन्नोपमानतादात्म्यारोपोऽपह्नुतित्वलक्षणं, तदा नाव्याप्तिः; पर्यस्तापह्नुतावुपमानतावच्छेदकनिषेधारोपासामानाधिकरण्यावच्छिन्नोपमानतादात्म्यारोपत्वस्य सत्त्वात्।

१. 'पर्यस्तापह्नुतिः सामान्यलक्षणानां—अ. २. अतः पूर्वं 'उपमाने' इत्यधिकं ■ पुस्तके. ३. अतः पूर्वं 'उपमाने विषे उपमानतावच्छेदकनिषेधपूर्वकं ब्रह्मस्वे उपमानीभूतविषतादात्म्यारोपात्' इत्यधिक ■ पुस्तके. ४. अत्र ■ पुस्तकस्था टिप्पणी–'अपह्नवस्याधिक्यस्य सत्त्वेऽपि रूपकाङ्गीकारे' इति. ५. 'भेदभानस्य च रूपकभेदे इवात्रापि सम्भवेन सा ताद्रूप्यरूपके प्राचीनैः कुतो नान्तर्भाविता ?'—इ. ६. 'अस्माभिः'—इ. ७. 'रूपकेऽनन्तर्भाव्य' इति नास्ति इ पुस्तके. ८. 'अपह्नुतिस्तत्त्वं तल्लक्षण'—अ, 'तत्त्वमपह्नुतिलक्षणं'—इ.

विशेषणान्तरप्रयोजनं चोक्तप्रायम्। एवं च, "उपमेयतावच्छेदकसामानाधिकरण्येनोपमानतादात्म्यताद्रूप्यान्यतरारोपो रूपकम्" इति रूपकलक्षणस्य पर्यस्तापह्नुतावतिव्याप्तिवारणायैकात्मवृत्त्युपमानतावच्छेदकनिषेधारोपापूर्वकत्वेन तादृशान्यतरारोपो[1] विशेषणीय इति[2] न तत्रातिव्याप्तिरिति[3] दिक्[4] लक्ष्यानुरोधेन लक्षणव्यवस्थितेः प्राचीनलक्षणविरोधोऽपि नाशङ्कनीयः। तन्मते पर्यस्तापह्नुते रूपकेऽन्तर्भावात्तत्साधारणं लक्षणं, तदन्तर्भावे तु तव्यावृत्तमिति[5] विशेषः।

## १३. उत्प्रेक्षा

उत्प्रेक्षा स्यात्कवेरूहो वस्तुहेतुफलात्मना।
वस्तुन्यहेत्वफलयोस्त्रिधा प्रत्येकतो द्विधा ॥२०॥
आद्योक्तानुक्तविषया सिद्धासिद्धास्पदे परे।
एवं सा षड्विधा प्रोक्तालङ्कारनयवित्तमैः ॥२१॥

वर्णनीयवस्तुनि साधारणधर्मसम्बन्धान्निमित्ताद्वस्त्वन्तरात्मना कवेरूह[6] एकोत्कोटिकमाहार्यं ज्ञानं सम्भावनापर्यवसन्नं, सा स्वरूपोत्प्रेक्षा। अहेतौ हेत्वात्मना, अफले फलात्मना[7] सम्भावना हेतूत्प्रेक्षा फलोत्प्रेक्षा

**Kārikas 20-21.** *Utprekṣā is poet's imagination regarding an object, a non-cause and a non-effect as another object, the cause and the effect respectively. It is of three kinds, each kind being further sub-divided into two. The first kind (viz., Vastu-Utprekṣā, also called Svarūpa-Utprekṣā) is either* उक्तविषया *(=one in which the topic of description is directly mentioned) or* अनुक्तविषया *(=one in which the topic is not directly mentioned). Each of the other two kinds (viz, Hetu-Utprekṣā and Phala-Utprekṣā) is either* सिद्धविषया *(=ranging over [8] self-evident sphere) or* असिद्धविषया *(=ranging over a non-established sphere). The figure is thus stated to be of six varieties by highest rhetoricians.*

१. 'ोवारणायोपमानताो'—ह्. २. 'तत्र नातिव्याप्तिः'—ह्. ३. 'इति दिक्' इति पदद्वयं नास्ति ह्र पुस्तके. ४. 'ोमिति विवेकादित्यलमधिकेन'—ह्. ५. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि [illegible] ह्र पुस्तकेषु विद्यते. ६. 'कवेः शङ्का'—आ, ह्. ७. 'वर्णनीये वस्तुनि'—आ. ८. 'कवेः शङ्का'—आ, ह्. ९. 'कवेः शङ्का'—आ.

इति त्रिविधा। सापि प्रत्येकं द्विविधा। आद्या स्वरूपोत्प्रेक्षोक्तविषयानुक्तविषया च। परे हेतूत्प्रेक्षाफलोत्प्रेक्षे सिद्धविषये असिद्धविषये च। इति षड्प्रकारा सा।

तत्र स्वरूपोत्प्रेक्षे, यथा—

उत्थः खसिन्धोर्नु तमस्तिमिङ्गिलो
धूम्रायमाणः किमुत क्षुधातुरः।
स्तोकार्थमत्स्यान् किल पर्वतादिकां-
स्तिमीन् गिलत्येष दुर्निरीक्षणः ॥६०॥

सूर्येऽस्तमिते राजानं प्रति कस्यचित्कवेरुक्तिरियम्। 'हे नृप' इति शेषः। तमोऽन्धकारं, खसिन्धोराकाशसागरात्, उत्थ उदितः, तिमिङ्गिलो महामत्स्यविशेषः। 'नु' शङ्कायाम्। किंभूतः? धूम्रायमाणो धूमधूम्रः। अत एव क्षुधातुरः। 'किमुत' उत्प्रेक्षायाम्। एव तमोरूपस्तिमिङ्गिलः। स्तोका येऽर्था घटपटादयो लघुपदार्थाः, त एव मत्स्याः साधारणा मत्स्याः। खसागरान्तःपातित्वादिति भाव.। तान्। अथ च, पर्वतादिकांस्तिमीन्। पर्वतादिस्थूलपदार्थानामपि खसागरान्तःपातित्वात्तिमिभावकल्पनेत्यभिप्रायः। गिलति ग्रसति। 'नु' शङ्कायाम्। कथंभूतः? दुःखेन निरीक्ष्यतेऽसौ दुर्निरीक्षणः। भयङ्करत्वात्। अन्यत्र, दुःखेन निरीक्ष्यते यत्रेति दुर्निरीक्षणम्। दृष्टिप्रतिरोधकत्वात्।

'तमः खसागरादुत्थस्तिमिङ्गिलो नु' इत्यत्र धूम्रायमाणत्वदुर्निरीक्षणत्वादिधर्मसम्बन्धान्निमित्तात्तमसि खसागरोत्थतिमिङ्गिलरूपवस्त्वात्मना

60. Is darkness a तिमिङ्गिल ( very enormous fish that swallows even a whale), rising from the sky-ocean, blackening with smoke and afflicted with hunger? Extremely unbearable to look at as it is, it swallows, as it were, fishes in the form of small substances and whales in the form of mountains etc.

१. नास्तीदं वाक्यं ब पुस्तके. २. पदद्वयं नास्ति आ इ पुस्तकयोः. ३. 'प्रत्युक्तिरियं'—अ. ४. 'तमोऽन्धकारं इति त्रिष्वपि अ आ इ पुस्तकेषु पाठः. ५. नास्ति ब इ पुस्तकयोः. ६. पद नास्ति आ पुस्तके. ७. 'क्षुद्राः'—आ. ८. इदं वाक्यं नास्ति ब पुस्तके. ९. अत उत्तरं 'पर्वतादिस्थूलपदार्थरूपान् महामत्स्यान्' इत्यधिकं आ पुस्तके. १०. इदं वाक्यं नास्ति आ पुस्तके. ११. 'खसागरोत्थतथाविधतिमिङ्गिल०' —आ.

सम्भावना स्वरूपोत्प्रेक्षा। तमसो विषयस्योपादानादुक्तविषया। 'गिलति' इत्यत्र तमोव्यापनरूपे वस्तुनि सर्वपदार्थादृश्यत्वकारित्वरूपगम्यधर्म-सम्बन्धान्निमित्तात्तमोरूपतिमिङ्गिलकर्तृकस्तोकपदार्थरूपसाधारणमत्स्य-पृथुपदार्थरूपतिमिकर्मकगिलनात्मना सम्भावनं स्वरूपोत्प्रेक्षा। सा च तमोव्यापनस्यानुपादानादनुक्तविषया।

यथा वा—

ध्रुवं विधात्रा पृथुसूर्यदीपे
न्युब्जीकृतोऽदो गगनं कटाहः।
ततः स्खलत्कज्जलमन्धकारं
सर्वाणि भूतानि विलिम्पतीव ॥६१॥

विधात्रा ब्रह्मणा, अदो नीलिमव्याप्तत्वेन प्रतीयमानं गगनं, महति सूर्यलक्षणे प्रदीपे न्युब्जीकृतोऽधोमुखीकृतः कटाहो ध्रुवम्। कज्जलार्थिना दीपोपरि शरावो यथा न्युब्जीक्रियते तद्वत्, इत्यर्थः अन्धकारं ततः कटाहात्स्खलत्कज्जलं। 'नु' शङ्कायाम्। तदन्धकारं सर्वाणि भूतानि पृथिव्यादीनि लिम्पतीव। 'इव'शब्दोऽत्र सम्भावनायाम्।

अत्र 'अदो गगनं पृथुसूर्यदीपे न्युब्जीकृतः कटाहो ध्रुवम' इत्यत्र, 'अन्धकारं ततः स्खलत्कज्जलं नु' इत्यत्रापि चोभयत्र गगनरूपे वस्तुनि प्रतीयमानकटाहसाधारणनीलिमरूपगम्यधर्मसम्बन्धान्निमित्तादीपोपरि शरावत्सूर्य परितोऽभिव्याप्य स्थितिमत्त्वरूपगम्यधर्मसम्बन्धान्निमित्तात्च गगनरूपे वस्तुनि सूर्यलक्षणमहाप्रदीपोपरि न्युब्जीकृतकटाहात्मना

---

61. Verily the sky is a frying-pan turned downwards by the Creator on the huge Sun-lamp Is darkness the lamp-black falling down therefrom which as it were, anoints all creatures ?

---

१. 'शङ्का'—आ. २. 'ोकारित्वरूपधर्मो'—आ. ३. 'ोकर्तृकस्तोकपृथुपदार्थ-रूपमत्स्यकर्मकनिगिलनात्मना'—आ; 'ोकर्तृकस्तोकपदार्थरूपमत्स्यपृथुपदार्थरूपतिमिकर्मकनि-गिलनात्मना'—इ. ४. 'शङ्का'—आ. ५. 'ोव्यापनानुपादाना०'—आ. ६. त्रिष्वपि पुस्तकेषु पद्ये दृश्या च सर्वत्र 'अन्धकारम्' इति नपुंसकलिङ्गो पाठो दृश्यते. ७. 'ोस्खल-न्निपतत्कज्जल...'—आ. ८. 'नु' इत्यव्ययं पद्ये त्रिष्वपि पुस्तकेषु न दृश्यते. ९. इदं वाक्यं आ पुस्तके नास्ति. १०. नास्ति आ पुस्तके. ११. 'ोनीलिमधर्मसम्बन्धा०'—आ. १२. 'स्थितिमत्त्वधर्मसम्बन्धा०'—आ. १३. 'गगने'—आ. १४. 'महादीपोपरि'—इ.

सम्भावना, अथ चान्धकाररूपे वस्तुनि नीलत्वादि[1]भृग्यधर्म[2]सम्बन्धा-न्निमित्तात्तादृशकटाहस्खलत्कज्जलरूपवस्त्वन्तरात्मना सम्भावना[3] स्वरूपो-त्प्रेक्षा। प्रथमे गगनस्य, द्वितीयेऽन्धकारस्य विषयस्योपादानादुक्तविषया। तादृशमन्धकारं सर्वाणि भूतानि 'लिम्पतीव' इत्यत्र [4] तमोव्यापनरूपे[5] वस्तुनि सकलपदार्थमलिनीकरणरूपसाधर्म्या[6]द्गृह्यान्निमित्तादन्धकारकर्तृ-कसर्वभूतलेपनात्मना सम्भावनं स्वरूपोत्प्रेक्षा। तमोव्यापनस्य विषय-स्यानुपादानादनुक्तविषया।

इदं च वैयाकरणमतानुसारेण, तन्नये क्रियाविशेष्यकबोधाङ्गी-कारात्। येषां [7] कर्तृविशेष्यको बोधः, तन्मतेऽन्धकारे व्यापनरूपधर्म-सम्बन्धाद्गृह्यान्निमित्तालेपनकर्तुः सम्भावनायां सिद्धविषया स्वरूपोत्प्रेक्षै-वेयं भवितुमर्हतीति द्रष्टव्यम्। यदि च—

'ध्रुवं विधात्रा पृथुसूर्यदीपे
न्युञ्जीकृतोऽदो गगनं कटाहः।
ततः स्खलत्कज्जलराशिवर्षैः
किं भूयते सर्वदिगन्तरेषु ॥६२॥'

इति पठ्यते, तदा तमोव्यापनरूपे वस्तुनि सकलपदार्थमलिनीकरणरूप-साधर्म्याद्गृह्यान्निमित्तात्तादृशकज्जलराशि[8]वर्षणभवनात्मना सम्भावनं स्वरूपोत्प्रेक्षा न्यायमते[9]ऽप्यसिद्धविषया, भावप्रत्ययस्थले नैयायिकै[10]रपि क्रियाविशेष्यकबोधाङ्गीकारात्

---

62 Verily the sky is a frying-pan turned downwards by the Creator on the huge Sun-lamp. Are there raining masses of the lamp-black falling down therefrom in all directons?

---

१. 'शङ्का'—आ. २. 'नीलत्वादिधर्मसम्बन्धाद्गृह्यान्निमित्ता०'—आ; 'नीलत्वा-दिगृह्यधर्मसम्बन्धान्निमित्ता०'—इ. ३. 'शङ्का'—आ. ४. 'विषयस्य' इति नास्ति [illegible] पुस्तके. ५. 'विलिम्पतीव'—आ, इ. ६. नास्ति आ पुस्तके. ७. '०साधर्म्यान्नि-मित्ता०'—आ. ८. 'शङ्का'—आ. ९. '०साधर्म्यान्निमित्ता०'—आ, इ. १०. '०कज्जलराशिभवनात्मना'—आ, इ. ११. 'सर्वमते'—आ. १२. 'नैयायि-कानामपि'—आ.

**हेतूत्प्रेक्षा, यथा—**

शुद्धं यशो माधव ! ते परिक्रमा-
द्ध्रुवोऽब्धिगङ्गामुखतीर्थसुश्रियः ।
तव प्रतापः परिवर्धते दिवा-
निशं प्रचण्डांशुजिगीषया ध्रुवम् ॥६३॥

'माधव !' इति सम्बोधनम् 'ध्रुवम्' इति पूर्वमप्यन्वेति । ते यशः शुद्धं श्वेतं पवित्रं च । अब्धिः समुद्रो गङ्गा च मुखे आदौ येषां तानि यानि तीर्थानि, तैः सुश्रियः शोभमानायाः, भुवः पृथिव्याः, परिक्रमात् सर्वत्राटनात्प्रदक्षिणप्रक्रमणाच्च ध्रुवम्

यशसः शुद्धौ वनेकतीर्थशालिभूपरिक्रमो न हेतुरिति तत्र हेत्वात्मना सम्भावनं हेतूत्प्रेक्षा । भूपरिक्रमस्य वस्तुतो यशसि सत्त्वात्सिद्धविषया । प्रतापवृद्धौ सूर्यजिगीषा न हेतुरिति तत्र हेत्वात्मना सम्भावनमसिद्धविषया हेतूत्प्रेक्षा, तादृशजिगीषायां असत्त्वात् ।

**फलोत्प्रेक्षा, यथा—**

स्वभूतलव्यापिनिजाच्छकीर्ते-
स्थैर्याय किं माधवरायराज्ञा

---

63 Thy glorious fame, O Madhava has been rendered stainless on account, as it were, of its circumambulation round the earth which is adorned by its holy stores of water headed by the ocean and the Ganges. Thy majesty increases day and night on account as it were, of its desire to surpass the Sun

64 Is it for stabilising his own pure glory pervading the heaven and the surface of the earth that the same (viz, his own pure glory) has been created or obained up by king Madhavarāya with the

---

१. 'भूप ! नु'—आ; 'राघव !'—इ. २. 'भशं प्रचण्डचण्डांशुजिगीषया' इति पाठोऽपि वैकल्पिकत्वेन ■ पुस्तके लिखितो दृश्यते. ■. इदं वाक्यद्वयं आ पुस्तके नास्ति; तत्स्थाने 'हे भूप' इति तत्र पठ्यते. ४. 'शुद्धं श्वेतं पवित्रं च ते यशः'—आ. ५. नास्ति अ इ पुस्तकयोः. ६. 'सर्वत्राटनात' इति नास्ति अ ■ पुस्तकयोः. ७. 'च' इति नास्ति ■ इ पुस्तकयोः. ८. 'नु शङ्कायाम्'—आ. ९. 'शुद्धौ भूपरिक्रमो'—आ. १० नास्ति आ पुस्तके. ११. 'माधवरावराज्ञा'—अ आ; 'राघवरोवराज्ञा'—इ.

सेयं निबद्धा पृथुभिर्गुणौघैः
परार्धसङ्ख्यागणनामतीतैः ॥६४॥

स्वर्भूतलयोः स्वर्भूस्वरूपाधोदेशयोर्व्यापिनी स्वीया निर्मला या कीर्तिः, तस्याः स्थैर्याय स्थितिदार्ढ्याय किं सेयं कीर्तिः परार्धसङ्ख्यागणनातोऽप्यग्रे चलितैर्महद्भिर्गुणसमूहैर्दमदानदाक्षिण्यादिभिर्दामभिश्च निबद्धा रचिता नियन्त्रिता ■ ।

अत्र स्वर्गादिषु कीर्तेः स्थैर्यं न दामबन्धनाध्यवसितदमदानदाक्षिण्यादिगुणजन्यत्वबलात् । अतोऽफलीभूते कीर्तेः स्थैर्ये गुणनिबन्धनफलात्मना सम्भावनं फलोत्प्रेक्षा । कीर्तेः स्थैर्यस्य वास्तवत्वात्सेयं सिद्धविषया ।

असिद्धविषया सा, यथा—

तव प्रतापस्य पदं तु गन्तुं
चक्रभ्रमिव्याजत एष सूर्यः ।
प्रदक्षिणप्रक्रमणं विधत्ते
ध्रुवं भुवः सागरमेखलायाः ॥६५॥

अत्र राज्ञः प्रतापपदप्राप्तिर्भूप्रदक्षिणप्रक्रमणत्वेनाध्यवसितस्य सूर्यभ्रमणस्य न फलमित्यफले तत्र तत्फलत्वोत्प्रेक्षणं फलोत्प्रेक्षा । प्रतापपदप्राप्तेरवास्तवत्वादसिद्धविषया ।

---

enormous multitudes of his गुणs ( 1. excellent qualities; 2. ropes) which baffle enumeration even by the highest number परार्ध ( = 100,000,000,000 000,000) ?

65. Verily this Sun, under the pretext of the revolution of his wheel, is performing circumambulation round the ocean-girdled earth, with the aim, ■ it were, of attaining the status of thy dignity.

---

१. 'स्वर्भूतलयोर्भूस्वरूपाधोदेशयोश्च व्यापिनी'—अ, ■ 'स्वर्भुवस्तलेस्वारूपमधोदेशश्च तेषु व्यापिनी' — आ. २. अत उत्तरं 'शङ्कायाम्' इत्यधिकं ■■ पुस्तके. ३. '०र्गुणौघै०'—अ; '०र्गुणै०'—इ. ४. 'पृथुदामबन्धना०'—आ. ५. 'सा सिद्धविषया' इति पदद्वयं नास्ति ■■ पुस्तके. ६. 'असिद्धविषया प्रतापपदप्राप्तेरवास्तवत्वात्' —इति पदविपर्यासात्मकः पाठः अा ■ पुस्तकयोः.

एवमुदाहरणान्तराण्युन्नेयानि । यथा—

[1]स्वच्छाटीपरिदग्धपर्वतशिरोऽत्युच्च रिसौधोज्ज्वल-
द्बह्निप्रौढिमिषात्प्रतापनिकरः स्वर्लोकमारोहति ।
तद्वह्नेः प्रथमोच्चरत्प्रविततं धूमं तु जानीमहे
यातं नाकमहो तवार्यपयशो राजन् । प्रतापात्पुरः । ६६॥

'जानीमहे' इत्यस्य पूर्वार्धेऽप्यन्वयः ।

प्रथमा सापह्नवा स्वरूपोत्प्रेक्षा, द्वितीया तु शुद्धैव सा । उभे अप्युक्तविषये ।

यथा वा—

आरोढुकामैः किल ते तुरङ्गैः
स्वर्गं किमुच्चैःश्रवसं विजेतुम्
खुराहतैतत्पृथिवीरजोभिः
किमिष्यते खं भुवमाविधातुम् ॥६७॥

'हे राजन् !' इति शेषः । उच्चैःश्रवसं विजेतुं किं । 'किल' इत्यलीके । स्वर्गमारोढुकामैस्ते तुरङ्गैः । खुराहतैतत्पृथिवीरजोभिः करणभूतैः, खमाकाशं, भुवं कर्तुमिष्यते किम्

'स्वर्गमारोढुकामैः किल' इत्यत्रोच्चैःकूर्दनशालित्वरूपगम्यधर्म-सम्बन्धाभिमित्तात्तुरङ्गेषु स्वर्गारोहचिकीर्षाशालितादात्म्यसम्भावनं सिद्ध-विषया स्वरूपोत्प्रेक्षा । 'उच्चैःश्रवसं विजेतुं किम्' इत्यत्रोच्चैःकूर्दनो-

---

66. Under the pretext of the volume of fire blazing on thy enemies' mansions higher even than the summits of mountains and burning on all sides in the course of thy invasion thy massive glory ascends the heaven. We regard, O king, the smoke, spreading out and rising upwards even above the fire, to be, as it were, thy enemies' infamy reaching the heaven even before thy glory.

67. Is the sky being intended to be transformed into the earth by means of the dust of the earth stuck by their hoofs by thy horses who, as it were desire to ascend the heaven as if to conquer Uccaiḥ-s'ravas (= Indra's horse) ?

१. एतदाद्युदाहरणत्रयं तद्वृत्तिश्च आ इ पुस्तकयोर्नास्ति. ■ पुस्तके चिह्नविशेषेण खण्डितत्वं प्रदर्श्य 'अत्र शोधपत्रिका' इति लिखितं, किं ■ निर्दिष्टा शोधपत्रिका पुस्तके नैवोपलभ्यते.

त्प्रेक्षितस्वर्गारोहचिकीर्षाया उच्चैःश्रवोविजयो = फलमित्यफले तत्र तादृश-चिकीर्षाफलत्वसम्भावनमसिद्धविषया फलोत्प्रेक्षा। उत्तरार्धे न खुराभिघातैः पृथिवीपरागोड्डयनस्य खे भूविधानेच्छा न फलमित्यफले ... फलत्व-सम्भावनमसिद्धविषया फलोत्प्रेक्षा, खे भूविधानेच्छायास्तुरङ्गेष्वसत्त्वात्।

यथा वा—

सुभ्रु ! भ्रूचापवल्ली यदुपरि किल विस्फार्यते यत्त्वयेयं
यत्तस्मिन्क्ष्वेडलिप्ता यमिहृदयभिदः सायका निष्पतन्ति।
तज्जाने मीनकेतुर्लसति तव वपुश्छद्मनार्धाङ्गकान्त-
श्चापं विस्फार्य मुञ्चन् शरनिकरमहो स्पर्धया साम्बमूर्तेः ।६८॥

अत्र पूर्वार्धे 'यत्'पदद्वयं क्रियाविशेषणम्। 'तत्'पदेन परामृष्टे पूर्वार्धवाक्यार्थे उत्तरार्धोपात्तविशेषणविशिष्टकामकर्तृकविलसनतादात्म्यमुत्प्रेक्ष्यते, इत्युक्तविषया स्वरूपोत्प्रेक्षा। 'साम्बमूर्तेः स्पर्धया तव वपुश्छद्मनार्धाङ्गकान्तोऽर्धाङ्गकृतरतिकः' इत्यत्र तु साम्बमूर्तिस्पर्धाहेतुकत्वेन सुभ्रूवपुश्छद्मना रत्या सह दम्पतीभाव उत्प्रेक्ष्यते, इत्यसिद्धविषया सापह्नवा हेतूत्प्रेक्षा; तादृक्स्पर्धायाः खकुसुमसमयत्वात्

यथा वा—

नालदण्डेन सहितं सुभ्रु ! पद्मं करे तव।
छत्रिणः कामदेवस्य छत्रं मन्ये रतेः करे। ६९।

---

68. O damsel endowed with charming brows! wherefore arrows, besmeared with venom and breaking the hearts of (even) those who have restrained their passions, fall on the man on whom thou expandest this creeper-like bow of thy brows, I fancy thereby that Cupid (lit. the Fish-bannered one) who, on account of his rivalry with S'iva (lit. one whose body includes Mother Pārvatī), has incorporated his beloved in the half-portion of his body under the pretext of thy person, manifests himself expanding his bow and discharging the multitudes of his arrows

69. O charming browed lady! the lotus accompanied by its stalk in thy hand I regard to be, ... it were, the umbrella in Rati's hands belonging to God of Love who is authorised to possess it (as ... mark of dignity).

---

१. अत आरभ्य ग्रन्थभागाङ्कित्वपि ... आ ... पुस्तकेषु साधारण्येन वर्तते.

लीलार्थं करधृतसनालपद्मं प्रकृतराज्ञो दारजनं प्रति कस्याश्चिद्वि-देग्धाया उक्तिरियम्। हे सुभ्रु! ते करे नालदण्डेन सहितं पद्मं काम-देवस्य छत्रिणो रतिकरगतं छत्रं मन्ये, इति योजना।

अत्र रमणीयत्ववर्तुलत्वसदण्डत्वादिधर्मसम्बन्धान्निमित्तात्सुभ्रूकर-गतपद्मे कामदेवाभिन्नत्वेन परिगृहीतप्रकृतनृपसम्बन्धिरतिकरगतच्छत्र-सम्भावनं स्वरूपोत्प्रेक्षा। तादृशपद्मस्य विषयस्योपादानादुक्तविषया। सुभ्रुव्यतिसौन्दर्यशालित्वरूपगम्यधर्मसम्बन्धान्निमित्तादार्थिकं रतिसम्भा-वनमप्युक्तविषयमेव। परं तु 'कामदेवस्य छत्रिणः' इति छत्रिणः कामा-भिन्नस्य देवस्य राज्ञ इति वा रूपकेणाङ्गीभूतेन सङ्कीर्णा।

यथा वा—

प्रतापयशसोः सूर्यचन्द्रयोस्ते समागमे।
तवार्यपयशः श्यामं कुहूं मन्ये समागताम् ॥७०॥

उक्तविषया स्वरूपोत्प्रेक्षेयम्।

'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥'

व्यञ्जकशब्दानामप्रयोगे तु गम्योत्प्रेक्षा। यथा—

---

70. On the conjunction of thy valour and glory which are, as it were, the Sun and the moon respectively, I regard the gloomy infamy of thy enemies to be, as it were, कुहू (= the deity presiding over Amāvāsyā or the new-moon day) associated with the two.

---

१. 'राज्ञो'—आ, इ. २. 'कस्याश्चिदुक्तिरियम्'—आ. ३. 'नालदण्डसहितं' —आ. ४. अत उत्तरं 'अस्य नृपस्य' इत्यधिकं आ पुस्तके. ५. '०वर्तुलत्वादिधर्मसम्बन्ध०' —अ; '०वर्तुलत्वसदण्डत्वसुभ्रूगतातिसौन्दर्यशालित्वादिधर्मसम्बन्ध०'—आ. ६. '०कर-गततादृशपद्मेऽतिसौन्दर्यशालितया कामदेवाभिन्नत्वेन'—आ. ७. 'परिगृहीते प्रकृतनृप०' —आ. ८. इदं वाक्यं आ पुस्तके नास्ति. ९ वाक्यस्य पाठः 'परन्तु कामदेवस्य च्छत्रिण इत्यङ्गतापन्नेन रूपकेण सङ्कीर्णा' इति आ पुस्तके. १०. इदमुदाहरणं तद्वृत्तिश्च नास्ति आ पुस्तके. ११. '०व्यञ्जकत्वेन परिगणितानां शब्दानामप्रयोगे गम्योत्प्रेक्षा'—आ.

श्रीराघव ! प्रतापस्ते विद्विषां हृदयेष्वभात्।
विवेश वडवावह्नौ रवौ[2] दावानलेऽपि च ।७१॥

## १४. अतिशयोक्तिः

### (अ) रूपकातिशयोक्तिः

उपमेयं निगीर्यैवोपमानाध्यवसानतः।
रूपकातिशयोक्तिः सा गदिता काव्यैकोविदैः ॥२२॥

उपमेयवाचकपदं विनोपमानवाचकपदेनैव वर्णनमुपमेयनिगरणम्। उपमानाध्यवसानमुपमेय उपमानत्वारोप आहार्यनिश्चयरूपः। तस्मिन्सति काव्यैकोविदै रूपकातिशयोक्तिर्गदिता रूपके दर्शितानां प्रकाराणामिहापि सम्भवोऽस्तीति 'रूपक'पदातिदेशः। तथा च, अभेदरूपकातिशयोक्तिस्ता-द्रूप्यरूपकातिशयोक्तिश्च। ते अप्याधिक्यन्यूनत्वानुभयोक्तितस्त्रिविधे[5]। इयमेव भेदेऽप्यभेदातिशयोक्तिरिति गीयते।

अनुभयोक्तावभेदरूपकातिशयोक्तिः, यथा—

बृहद्गुञ्छा एताः कनकलतिकास्तत्र विलस
त्सुधांशूनां वृन्दं तदुदरचलत्कैरवघनम्।

---

71. O respected Rāghava ! thy heroic splendour, which could not keep itself restricted to thy enemies' hearts, entered (as it were) into the submarine fire, into the Sun and also into the forest conflagration.

**Karikā 22.** *If Upameya is completely identified with, and totally absorbed into Upamāna, it is termed Rūpaka-Atis'ayokti by persons versed in Poetics.*

72. "These are golden creepers bearing big bunches of flowers and [illegible] them shines a group of moons within which there [illegible] cluster of tremulous white water-lilies wherefrom drop down pearls"—thus,

१. 'राजन् ! तव प्रतापोऽय'—आ. २. 'वह्नौ'—अ, आ. ३. 'काव्यवेदिभिः'—आ. ४. 'काव्यवेदिभिः'—आ. ५. 'ोखिधा'—अ. ६. इदं वाक्यं नास्ति [illegible] पुस्तकयोः.

पतन्त्यस्मान्मुक्ता इति वदति पश्यन्नृप गतं
भवच्छत्रुव्रातैः सह सहचरीणां घनवने ॥७२॥

'नृप' इति प्रकृतराज्ञः सम्बोधनम्। हे[2] माधव[3] नृप[2]! घनवने विपिने। भवच्छत्रुव्रातैः पलायद्भिस्त्वदरिसमूहैः सह साकं। सहचरीणां पतिसुख-दुःखविभागिनीनां[1] कुलाङ्गनानां गतं गमनं। पश्यन् 'जनः' इति[4] शेषः इतीत्थं वदति। 'इति' किं तदाह बृहद्गुल्फाः पृथुस्तबकाः। एताः कनकलतिकाः। तत्र कनकलतिकासु। विलसत्सुन्दरं चन्द्राणां वृन्दं समूहः। तस्य सुधांशुवृन्दस्य, उदरे मध्ये, चलत्कैरवनं[5] चञ्चलकुमुदसमूहः। नयनानां निरञ्जनत्वादिति भावः अस्मात्कैरववनात्। मुक्ता मुक्ता-फलान्यश्रुस्थानाभिषिक्तानि पतन्ति।

न्यूनत्वोक्तौ सा, यथा—

बृहद्गुल्फा एताः कनकलतिकास्तत्र तमसा
वृतश्चन्द्रव्रातस्तदुदरमिलत्[6]कैरववनम्
उत्तरार्धं तदेव. ॥७३॥

केशस्थानाभिषिक्तेन तमसान्धकारेण, आवृत आच्छादितः।

अत्र चन्द्रस्य मुखभावावस्थायामुपरि तमोरक्षणवर्णनाच्चन्द्रसान्नि-ध्येऽपि कैरवाणामविकसनवर्णनाच्च न्यूनत्वम्

आधिक्ये सा, यथा—

---

O King utters a man observing the flight of thy enemies' wives along with the hosts of their husbands into a dense forest.

73 "These are golden creepers bearing big bunches of flowers; on them there is a group of moons encompassed by darkness; and within the moons congregates a cluster of white water-lilies where-from drop down pearls—". (The rest is in Verse 72.)

---

१. इदं वाक्यं नास्ति आ ई पुस्तयोः. २. नास्ति ई पुस्तके; हे राघव नृप' इति इ पुस्तके पाठः. ३. 'पतिभिः सह सुखदुःखविभागिनीनां'—अ. ४. पदद्वयं नास्ति आ पुस्तके. ५. 'चञ्चलकैरववनं कुमुदसमूहः'—अ; 'कैरववनं कुमुदसमूहः'—आ, इ. ६. '०स्तदुदरचलत्कैरव०'—आ. अत्र अ पुस्तकस्था टिप्पणी 'पत्रमेलनशालि "मीलत्" शब्दस्तत्रान्य एव।' इति. ७. '०वर्णनान्न्यूनत्वम्'—आ; '०वर्णनात्कैरवाणामविकसनवर्ण-नाच्च न्यूनत्वम्' इ.

बृहद्गुल्छा एताः कनकलतिकास्तत्र विमृगं
सुधांशूनां वृन्दं तदुदरहसत्कैरववनम् ।
उत्तरार्धं तदेव. ७४॥

अनुभयतादूप्यरूपकातिशयोक्तिः, यथा—

इमाः काः कान्तारे कनकलतिकास्तासु ■ अहो
सुधांशूनां ब्रातस्तदुदरचलत्कैरववनम् ।
उत्तरार्धं तदेव. ७५

कान्तारे इमाः कनकलतिकाः काः ? तासु सुधांशूनां ब्रातः कः ? एवमग्रेऽपि लिङ्गविपरिणामेन 'किम्'शब्दस्यान्वयः ।

अत्र 'किम्'शब्दप्रयोगेण भेदोऽवगम्यते ।

न्यूनतायां तादूप्यरूपकातिशयोक्तिः, यथा—

इमाः काः कान्तारे कनकलतिकास्तासु ■ इमे
तमश्छन्नाश्चन्द्रास्तदुदरमिलत्कैरववनम्
उत्तरार्धं तदेव. ७६॥

---

74. These are golden creepers bearing big bunches of flowers and on them there is a group of spotless moons which contain a collection of blooming white water-lilies wherefrom drop down pearls.'—(The rest ■ in Verse 72)

75. "What are these golden creepers in the dreary forest? What is this group of moons on them? And what within them is this cluster of tremulous white water-lilies wherefrom drop down pearls?—(The rest as in Verse 72)

76. What are these golden creepers in the dreary forest? What on them are these moons enveloped by darkness? And what within them is this cluster of closing white water-lilies wherefrom drop down pearls?'—(The rest are ■ in Verse 72)

---

१. 'तदुदरचलत्कैरव०'—आ. २. '"किम्" शब्दोक्त्या—आ, इ. ■. 'न्यूनत्वे'—आ, इ. ४. 'तमोऽधःस्थाश्चन्द्रा०'—आ; 'तमःसङ्गाश्चन्द्रा०'—इ. ५. 'ः०स्तदुदर-चलत्कैरव०'—आ, इ

आधिक्ये सा, यथा—

इमाः काः कान्तारे कनकलतिकास्तत्र क इमे
निर्गीर्णाङ्काश्चन्द्रास्तदुदरचलत्कैरववनम् ।
उत्तरार्धं तदेव. ॥७७

(आ) भेदकातिशयोक्तिः

वर्णनीयपदार्थस्य यदन्यत्वेन वर्णनम् ।
भेदकातिशयोक्तिः सा भेदकत्वात्तदन्यतः ॥२६॥

यथा—

अन्यैवेयं तव कला लोकान्प्रीणयति क्षणात् ।
सन्तापयति शत्रूणां वर्गं भूप ! कलानिधे ! ॥७८।

वर्णनीयस्य वस्तुनः स्वसदृशादन्यत्वेन वर्णनं यत्, सा भेदकातिशयोक्तिः । स्वसदृशतो भेदकत्वाद् 'भेदक'पदव्यपदेश्या ।

हे भूप ! हे कलानिधे ! तवेयं कला चातुर्यलावण्यादिरूपा । अन्यैव । यतः क्षणाल्लोकान्प्रीणयति प्रीतिभाजः करोति शत्रूणां समूहं सन्तापयति च कलानिधेश्चन्द्रस्य कलायाः सर्वसाधारण्येन प्रीणनं स्वभावः । कलानिधेस्तव कला ■ न तथेत्यन्यैव ।

---

77. What are these golden creepers in the dreary forest ? What on them are these spotless moons ? And what within them is this cluster of tremulous white water-lilies ?— (The rest as in Verse 72).

***Kārikā 23.*** *If the thing to be described (i.e. Upameya) is described as being something else, it is Bhedaka-Atis'ayokti since it distinguishes the thing from other (similar) things*

78 O भूप (= राजन् = 1. king· 2. moon) who art कलानिधि (= 1. a receptacle of 64 fine arts; 2. ■ store-house of 16 lunar digits) this कला (= 1. skill; ■ lunar digit) of thine is something extraordinary since it instantly delights thy subjects and afflicts the host of thy enemies.

१. '०स्तदुदरलसत्कैरव०'—ह्. २. 'यथा' इति पदं नास्ति आ ■ पुस्तकयोः. ३.' अत उत्तरं 'हे राजन्' इत्यधिकं आ पुस्तके. ४. 'चातुर्यलावण्यरूपा'—आ. ५. अत उत्तरं 'षोडशांशश्च' इत्यधिक आ पुस्तके. ६. 'क्षणाज्झटिति लोका०'—आ. ७. नास्ति ■ पुस्तके. ८. 'चन्द्रकलायाः'—आ, ह्.

[1]श्लेषसङ्कीर्णेयं भेदकातिशयोक्तिः । [2]एकपदोपात्ततया '[3]कला'पदवाच्यत्वेन सादृश्यम् ।

[4]यथा वा—

[5]सुशीला रूपवन्तोऽपि प्रभवो बहवोऽभवन् ।
राघवान्यैव ते शैली रूपं च प्रभुतापि च ॥७९॥

पूर्वोदाहरणे स्वसदृशादन्यत्वकथने हेतुरुक्तः । अत्र तु न, इति विशेषः । '[6]राघव' इति सम्बोधनं प्रकृतराज्ञो रामस्यापि वा ।

(इ) सम्बन्धातिशयोक्तिः (प्रथमा)

असम्बन्धेऽपि सम्बन्धो वर्ण्यते जनरञ्जनः ।
सम्बन्धातिशयोक्तिः सा शुद्धा सापह्नवापि च ॥२४॥

शुद्धा, यथा—

[7]सेयं प्रभो राघवरायपेषवः
सौधाग्रभूमिः स्पृशतीन्दुमण्डलम् ।
यत्र प्रखेलद्युवतीजनाननैः
पृक्तो मृगाङ्कः सुधियावगम्यते ॥८०॥

---

79. There have been several lords who were good-natured and handsome, but O Raghava, thy nature handsomeness and lordship are of a quite different category.

**Kārikā 24.** *If there [illegible] an assertion of connection although in reality there is no connection, it is Sambandha-Atis'ayokti which is either (1) pure or (2) combined with Apahnuti.*

80. This is the topmost portion of king Rāghavarāya Peṣavē's mansion touching the lunar sphere. The moon having intermingled with the faces of young damsels playing here is marked out by an intelligent man only because she (i e. the moon) is spot-marked.

---

१. [illegible] वाक्यं नास्ति अ पुस्तके. २. इदं वाक्यं नास्ति [illegible] पुस्तके. ३. 'एक-पदवाच्यत्वेन'—अ. ४. इदमुदाहरणं तद्वृत्तिश्च नास्ति आ पुस्तके. ५. इदं वाक्यं इ पुस्तके एव वर्त्तते. ६. 'राघवरावि'—अ, [illegible] 'माधवराव०'—आ.

यत्र सौधाग्रभूमौ क्रीडद्युवतीजनमुखैः सम्पृक्तश्चन्द्रो मृगाङ्कत्वा-द्धेतोः सुधियानुमीयते ।

यथा वा—

अयं मरुर्दानजलप्रवाहैः
श्रीमाधवस्यालिपतस्वर्द्रुमस्य ।
प्रशस्तवारिर्भवितेति मोदं
विन्दन्त्यनल्पं मरुदेशनार्यः ॥८१॥

अत्र मरुदेशनारीणां राजदानप्रयुक्तप्रशस्तवारिकृतप्रमोदसम्बन्धा-भावेऽपि तत्सम्बन्धवर्णनं सम्बन्धातिशयोक्तिः ।

सापह्नवा, यथा—

अपि जलधिरयं भवेद्विरिक्तो
यदि नृपदानविधौ जलव्ययेन ।
क्व शरणमिति विह्वला नगेन्द्राः
शरणमयन्ति नृपं गजच्छलेन ॥८२॥

अत्र जलधेर्नृपदानविधौ जलव्ययप्रयुक्तरिक्तत्वसम्बन्धाभावेऽपि तत्सम्बन्धो वर्णितः एवं मैनाकादिनगेन्द्राणां नृपशरणगमनसम्बन्धा-भावेऽपि स वर्णितः, इत्यतिशयोक्तिः सा च कैतवापह्नुतिगर्भा

---

81. The ladies of the desert-country fool extremely delighted at the idea that their desert shall be turned into an excellent watery region with the streams of water employed in giving away charities by respected Madhava who has disparaged the celestial tree

82 Perturbed with the anxiety as to where they would get shelter in case the ocean is rendered empty with the exhaustion of its water used in the king's giving away charities, the chief mountains seek the King's protection under the guise of elephants

---

१. 'श्रीराघवस्या०'—आ. २. 'जलधौ नृप०'—आ. ३. 'मैनाकादिनगानां'—अ. ४. 'नृपशरणसम्बन्धाभावे'—आ.

[1]सापह्नवा, यथा—

[1]बिम्बेऽस्ति माधुर्यरसो मनोज्ञे
द्राक्षादिकं धूर्वहमात्रमत्र ।
चन्द्रे हि बिम्बं न तु गुल्मवृन्ते
चन्द्रो लतायां कनकस्य नो खे ॥८३॥
अन्तःसभं नृत्यति माधवस्य
सेयं लता नैव तरुप्रकाण्डे ।
प्रत्यक्षमेवात्र मतं प्रमाणं
दृष्टास्ति चेत्सैव दृशानताङ्गी ॥८४॥

श्लोकद्वयस्याप्येक एव विशिष्टोऽर्थः । पर्यस्तापह्नुतिगर्भेयमतिशयोक्तिः ।

[2]एवमतिशयोक्तिर्ह्यनेकालङ्कारगर्भा भवति । सापह्नवात्वकथनं जरदुक्तिसंरक्षणाय । यथा—

कलानिधिस्त्वं जनरञ्जनस्त्वं
राजन् ! शुचिस्त्वं न च ते कलङ्कः ।
सुधामयः सूक्तिमिषादपि त्वं
वदन्ति मूढा अमृतं मृगाङ्कम् ॥८५॥

---

83–84 The lovely Bimba (= a particular fruit) possesses the flavour of sweetness such as renders even grapes etc mere bearers of burden; the Bimba exists in the moon and not on a tree-stalk in a thicket; the moon exists in the golden creeper and not in the sky; the creeper dances in Mādhava's court and not on a branch of a tree. Direct perception itself is the proof here if only that very damsel with stooping limbs is perceived with one's eyes

85. O king ! thou art कलानिधि (= 1 a store-house of 16 lunar digits; 2. a receptacle of 64 fine arts), जनरञ्जन (= 1 one who gives delight to people; 2 one who keeps one's subjects contented) and शुचि (=1 bright; 2. pure) and yet dost not bear कलङ्क (= 1 spot on the moon; 2. stain). Thou also possessest the nectar under the pretext of thy sweet speech; it is the fools who call the spotted moon full of nectar.

---

१. श्लोकद्वयात्मकमिदमुदाहरणं तद्वृत्तिश्च नास्ति ■■ ■ पुस्तकयोः. २. अत उत्तरं ग्रन्थभागोऽन्येष्वपि ■■ आ इ पुस्तकेषु साधारण्येन वर्त्तते.

[illegible] सम्बोध्ये राज्ञि सुधासम्बन्धाभावेऽपि तत्सम्बन्धवर्णनादतिशयोक्तिः।

सूक्तीनां सुगिरां मिषात्[1]। सुधामयोऽमृतमयः। सुधात्वसम्बन्धः सूक्तिषु सुधासम्बन्धस्तु राज्ञि तत्सम्बन्धात्तन्मय इत्युक्तम्। मूढा मूर्खाः। मृगाङ्कं कलङ्किनं चन्द्रम्। अमृतम् अमृतमयं। वदन्ति।

मूढत्वोक्त्या चन्द्रेऽमृतमयत्वापह्नवः पर्यस्तापह्नुतिः; 'मिषात्' इति कैतवापह्नुतिः; 'कलानिधि'पदादौ श्लेषः; 'न च ते कलङ्कः' इति व्यतिरेकः; 'त्वं'पदावृत्त्या दीपकं च; इत्यनेकालङ्कारगर्भा।

उत्प्रेक्षायामप्यपह्नुतिगर्भता सम्भवति। यथा पूर्वोक्ते

'बिम्बं प्रतीयन्ति परे प्रवालम्—'

इति पद्ये। तत्र हि कवितर्कितबिम्बत्वादिधर्माणामपह्नवः परत्वाद्युपन्यासादाविष्कृतः। उत्तरार्धे चोत्प्रेक्षा स्पष्टैव।

(ई) सम्बन्धातिशयोक्तिः (द्वितीया)

**विद्यमानेऽपि सम्बन्धेऽसम्बन्धो यत्र वर्ण्यते।**
**सम्बन्धातिशयोक्तिर्हि तत्रापि कथिता बुधैः ॥२५॥**

यथा—

श्रीपेषवः सूक्तिरसैर्वितृप्ताः पीयूषधारा अपि नाद्रियन्ते
तद्दानतुष्टा विदुषां समाजा न धाद्रियन्ते धनदामरद्रू ॥८६॥

---

**Kārikā 25.** *If there is negation of connection, although, in reality, there exists connection, it is also termed by the learned* [illegible] *Sambandha-Atis'ayokti*

86. Persons that are gratified with the relishes of the respected Peṣavā's sweet utterances have no liking even for the streams of nectar. And the assemblies of the learned that are contented with his charities have no regard (even) for Kubera and the celestial tree.

---

१. 'सुधामयसम्बन्धाभावेऽपि'—अ. २. 'सूनृतगिरां'—आ. ३. अत उत्तरं 'कैतवात्' इत्यधिकं [illegible] पुस्तके. ४. नास्ति [illegible] पुस्तके. ५. नास्ति आ [illegible] पुस्तकयोः. ६. '०प्यपह्नुतिगर्भत्वं'—आ. ७. '०धर्माणां रूपकातिशयोक्त्यपह्नवः'—अ.

अत्र पीयूषधारास्वादरसम्बन्धसत्त्वेऽपि तदसम्बन्धः, एवं कुबेर-कल्पवृक्षयोरादरसम्बन्धेऽपि तदसम्बन्धश्च वर्णितः ।

असम्बन्धे सम्बन्धाभिधानं यथा सम्बन्धातिशयोक्तिः, तथा सम्बन्धे सत्यसम्बन्धवर्णनमसम्बन्धातिशयोक्तिः पृथक्कुतो न ?— इत्यत्र समाधानं ■ जरतां समयः ।

(ङ) अक्रमातिशयोक्तिः

सहभावः कार्यहेत्वोर्वर्ण्यते यत्र सुन्दरः ।
अक्रमातिशयोक्तिः सा गदिता क्रमभङ्गतः ॥२६॥

यथा—

गारुत्मतीयैः शिशुभिः समाना मनोजवाः पुङ्खविचित्रिताङ्गाः ।
पतत्त्रिणस्ते प्रविशन्ति राजन्मूर्व्यां प्रकाये च समं परेषाम् ॥८७॥

गरुत्मान् गरुडः । तदीयैः[2] शिशुभिः शावैः[3] सदृशाः । यतो मनो-जवाः पुङ्खविचित्रिताङ्गाः । पतत्त्रिणो बाणाः । पक्षिवाचकपदप्रतिपाद्यत्वा-त्पक्षिसादृश्यम् ।

(च) चपलातिशयोक्तिः

हेतोः प्रसङ्गमात्रेण कार्योत्पत्तिः प्रवर्ण्यते ।
यत्र तत्र प्रगदिता चपला सा बुधैरिह ॥२७॥

---

**Kārikā 26.** *When there is a charming description of the simultaneity of the cause and the effect, it is termed Akrama-Atis'ayokti on account of its dispersion of the usual order.*

87. O king thy पतत्त्रिन्s (=1. arrows 2 birds), which, being swift ■ thought and bearing bod ■ variegated with feathers, are similar to Garuda's cubs enter thy bow-string and thy enemies' bodies simultaneously.

***Karikā 27*** *When the effect is described to result at the mere mention of the cause, it is termed by the learned as Capalā-Atis'ayokti.*

---

१. यथा' इति पदं नास्ति अ पुस्तके. २. 'तदंशीयैः'—आ. ३. नास्ति अ पुस्तके. ४. अत उत्तरं 'अनेन पक्षिसाधर्म्यं प्रतिपादितम्' इत्यधिकं आ पुस्तके.

यथा—

गन्तव्यमस्यां दिशि चेति राजघ !
त्वयोदिते तत्र तु ते द्विषां गणैः ।
पलाय्यते त्यक्तकुटुम्बिनीप्रियै-
स्तद्दोर्गलत्कङ्कणपातपूर्वकम् ॥८८॥

हे राजघ[1] राजहन्तः । 'अस्यां दिशि गन्तव्यम्' इति त्वयोक्ते सति । तु पुनः । तत्र दिशि । ते शत्रूणां समूहैरुज्झितस्त्रीपरिवारैः सद्भिः । तासां कुटुम्बिनीनां हस्तेभ्यो गलन्ति यानि कङ्कणानि वलयानि तेषां पातः पतनं पूर्वं यत्र कर्मणि भवति तथा पलाय्यते ।

कान्त[2]प्रयाणात्पूर्वमेव प्रयाण[3]वार्त्ताश्रवमात्रेण कङ्कणानि स्त्री[4]दोर्भ्यो निर्गणिर्गानि, पलायनं [5] ततः पश्चाज्जातम्, इति चपलातिशयोक्तिः [6]एवं राज्ञः प्रयाणे सति द्विषां[6] पलायनं घटते, तच्च प्रयाणवार्त्ताश्रवणादेव जा[7]तमिति कथनादपि चपलातिशयोक्तिर्द्रष्टव्या ।

यथा वा—

दानप्रसक्तिं किल माधवप्रभोः
श्रुत्वा प्रहृष्टा विदुषां गृहाङ्गनाः ।
ततो हि तेषामजिरेऽभवत्क्षणा-
त्तुरङ्गहेषा च गजेन्द्रबृंहितम् ॥८९

---

88. O Killer of kings ! at thy mere uttering 'I have to set out in this (particular) direction', all hosts of thy enemies in that quarter flee away having deserted their beloved wives following the fall of the bracelets dropping down from their [redacted]

89. On learning about king Mādhava's charitability the housewives of the learned got highly delighted and instantly there occurred in their court-yards the neighing of horses and the trumpeting of lordly elephants

---

१. अतः पूर्वं 'हे' इत्यधिकं आ पुस्तके. २. 'पतिप्रयाणात्पूर्वमेव'—आ. ३. 'तच्छ्रवणमात्रेण'—आ. ४. 'दोर्भ्यो'—आ, इ. ५. 'एवम्' इति पदं नास्ति अ पुस्तके. ६. 'विद्विषां'—अ. ७. इदमुदाहरण नास्ति अ पुस्तके.

यथा[1] वा—

दानप्रसक्तिं किल राघवप्रभोः
श्रुत्वा समृद्धा विदुषां गृहाङ्गनाः ।
दुकूलभूषा वणिजः सकाशतः
क्रेतुं शशंसुर्निजकान्तमादृताः ॥९०।

अत्र[2] दानजन्यद्रविणलाभे समृद्धौ सत्यां भूषणादिसम्पादनादरः समुचितः। ■ दानप्रसक्तिश्रवणमात्रेण जातः, इति चपलातिशयोक्तिः ।

(ऋ) अत्यन्तातिशयोक्तिः

पौर्वापर्यमतिक्रम्य क्रियते यत्र वर्णनम् ।
अत्यन्तातिशयोक्तिः सा कथिता काव्यदर्शिभिः ॥२८॥

यथा—

पूर्वं कवीनामजिराग्रंभूमय-[2]
स्तुरङ्गनागेन्द्ररथाकुलाकुलाः ।
जाताः कदर्थीकृतस्वर्द्रुणामुना
पश्चाद्धि तेऽर्घ्यादिकयार्चयार्चिताः[3] ॥९१॥
[4]अर्चयार्चिताः सत्कृताः ।

---

90 The house-wives of the learned became affluent merely on hearing about king Raghava's charitability and they respectfully bade their husbands to purchase silken garments and ornaments from merchants

*Kārikā 28. If the description involves violation of the relation of prior and posterior, it is termed Atyanta Atiśayokti by persons conversant with Poetics*

91. The main portions of the poets' court yards first became extremely agitated with chariots, lordly elephants and horses. It was indeed afterwards that the poets were honoured by means of adoration consisting of respectful oblations etc, by this (king) who has despised the celestial tree

१. इदमुदाहरणं तद्वृत्तिश्च नास्ति आ ह पुस्तकयोः. २. 'सुरीणामजिराग्रभूमयः' —आ. ३. 'तेऽर्घ्यादिकया०'—अ. ४. अत उत्तरं 'इत्यर्थः' इत्यधिकं आ पुस्तके.

## १५. तुल्ययोगिता

### (अ) प्रथमा

**वर्ण्यानां वर्ण्ययोर्वापीतरेषां वान्ययोरपि ।**
**गुणक्रियादिभिः साम्यकरणे तुल्ययोगिता ॥२९॥**

प्रस्तुतानां प्रस्तुतयोर्वेतरेषामप्रस्तुतानामन्ययोरप्रस्तुतयोर्वा गुण-क्रियादिरूपैकधर्मान्वयेन साम्यकरणे तुल्ययोगितालङ्कारः ।

प्रस्तुतानां, यथा—

**कर्णोऽर्जुनो दाशरथिश्च भार्गवः**
**शूरा वदान्याः कृतिनो महत्तमाः ।**
**जातोऽधुना माधवरायभूपति-**
**र्गण्यो गुणज्ञैरिह तेषु पञ्चमः ॥९२॥**

कर्णादीनां मान्यत्वात्पूज्यत्वाच्च प्रस्तुतत्वम् । प्रकृतराज्ञस्तु तद-स्येवेति प्रस्तुतानां शौर्यादिगुणैः साम्यकरणात्तुल्ययोगिता ।

अप्रस्तुतयोः, यथा—

**गोपालकं चक्रविभूषिताङ्गं**
**द्विजेन्द्रसंसेवितमब्जनेत्रम् ।**

---

*Kārikā 29.* *If two or more subjects of comparison (i.e. Upameyas) or two or more standards of comparison (i. e. Upamānas) are put on the same level on account of their property, action, etc., it is Tulyayogitā.*

92 Karṇa, Arjuna Rāma and Paraśurāma were (four) greatest heroes that were brave liberal and blessed Recently has been born on this earth king Mādhavarāya who is to be counted fifth along with them by appreciative persons

93 S'rī (= 1. Lakṣmī 2 majesty) attends on Kṛṣṇa and your honourable self who are गोपाल (= 1. a cowherd; 2. a king), whose [illegible] ( 1. body or form; 2. limbs) is decorated by चक्र (= 1. the discus called

---

१. 'ोरप्रस्तुतयोरपि वा'—आ. २. 'माधवरावभूपति०'—अ; 'ोराघवरावभूपति०' —आ, इ. ३. 'गुणैः'—आ.

श्रीमाधवेति प्रविगीयमानं
कृष्ण भवन्तं च निषेवते श्रीः ॥९३॥

राजपक्षे पृथिवीपालकं, कृष्णपक्षे गोपरूपम् चक्रिणं रेखामयचक्रशालिनं सुदर्शनशालिनं च। द्विजेन्द्रो गरुडो ब्राह्मणमुख्यश्च, तत्सेवितं। 'माधव' इति शब्देन हूयमानं स्तूयमानं भवन्तं सम्बोध्यं माधवभूपं कृष्णं च। श्री राज्यलक्ष्मीरिन्दिरा च। निषेवते।

वर्णनीयत्वाज्जगत्पूज्यत्वाच्च प्रस्तुतयोर्द्वयोरपि श्रीसेव्यत्वादिधर्मान्वयेन साम्यकरणात्तुल्ययोगिता।

अप्रस्तुतानां, यथा—

मालतीकुसुमं पद्मं शिरीषं चातिकोमलम्।
चेतस्ते परदुःखेन ताम्यत्ततोऽपि कोमलम् ९४

अत्राप्रकृतानि मालतीकुसुमादीनि मार्दवातिशयैरूपगुणेन समीकृत्य राज्ञो मनोमार्दवातिशयो वर्णितः, इति तुल्ययोगिता।

अप्रस्तुतयोः, यथा—

कुन्दं श्वेततरं राजन्! कुमुदं च तथाविधम्।
त्वत्कीर्तेरुज्ज्वलायास्तु कलां नार्हति षोडशीम् ॥९५॥

---

Sudarśana; 2 lucky circular lines), who are attended upon by द्विजेन्द्र (= 1. Garuḍa; 2. a prominent Brāhmaṇa), whose eyes resemble lotuses and who are called Śrī-Mādhava'.

94 The flowers of Mālatī, lotus and Śirīṣa are extremely delicate; thy heart which pained at other people's miseries is still more tender.

95. O king! the very white Kunda, as well as the Kumuda of the same description does not deserve even the sixteenth portion of thy vivid glory.

---

१. 'श्रीराघवेति'—इ. २. 'पृथिवीप्रतिपालकं'—आ. ३. अतः पूर्वं 'अपि च' इत्यधिकं आ पुस्तके. ४. 'द्विजेन्द्रो ... कृष्णं च' इति टीकाभागो नास्ति [illegible] पुस्तकयोः. ५. 'निषेवते' इति पदं नास्ति अ इ पुस्तकयोः. ६. मार्दवातिशयगुणेन'—आ. ७. 'अनयैव दिशा अप्रस्तुतयोरप्युदाहरणमुन्नेयम्' इति वाक्यं आ इ पुस्तकयोः, उभयोरपि तयोः पुस्तकयोरुदाहरणं प्रत्यक्षतया न दृष्टम्

अत्राप्रकृते कुन्दकुमुदे श्वेततरत्वरूपगुणेन समीकृत्य कीर्तेरुत्कर्षो वर्णितः

(आ) द्वितीया

हिते वाप्यहिते यत्र वृत्तितुल्यत्ववर्णनम् ।
क्रियते तत्र गदिताप्यपरा तुल्ययोगिता ॥३०॥

यथा—

राजंस्तव परावृत्तिरीश्वरे विषयेष्वपि ।
सम्पादयति शत्रूणामात्मनोऽपि पराभवम् ॥९६।

[2]हे राजन् ! तव ईश्वरे सर्वहितकारिणि परोत्कृष्टा । वृत्तिर्भावः । विषयेष्वहितेषु । परावृत्तिर्निवृत्तिः । निवृत्त्याख्यो यत्न इति यावत् । तेन न पञ्चम्यपेक्षापि । सा परा[3]वृत्तिः । शत्रूणा कामक्रोधादीनां, किमुत बाह्यानां । पराभवं पराजयं । आत्मनोऽपि स्वस्यापि परश्चासावभवश्चेति पर[4]भवः । [5]अभवोऽसंसारः । मोक्ष इति यावत्[6] । तं तथोक्तमुत्कृष्टं मोक्षं । [7]सम्पादयति ।

अत्रेश्वरे विषयेषु च 'परा[8]वृत्तिः' इत्येकशब्देन तुल्या[9] वृत्तिर्विहिता; एवं, शत्रूणामात्मनश्च[10] 'पराभवम्' इत्येकशब्देन तुल्या वृत्तिर्विहिता, इति तुल्ययोगिता ।

---

*Karikā 30. If identical action is described in connection with a desirable thing as well as with an undesirable thing, it is also said to be another Tulyayogita.*

96. O king ! thy परावृत्ति ( 1. supreme attachment, 2. excessive aversion) to God as well as to the pleasures of senses brings about the पराभव (= 1. vanquishment or repulsion· 2. final emancipation) of thy शत्रुs (= 1. adversaries; 2 the six enemies of mankind viz., काम, क्रोध, लोभ, मोह, मद and मत्सर) as well as of thy own self

---

१. 'ते राघव परावृत्ति०'—आ. २. 'हे राघवप्रभो ! ते तव'—आ. ३. नास्ति आ पुस्तके ४. नास्ति अ ■ पुस्तकयोः; '...पराभव उत्कृष्टोऽसंसारस्तं मोक्षमिति यावत्' इति आ पुस्तके. ५. 'अभवो...यावत्' इति भागो नास्ति ■ पुस्तके. ६. 'तथोक्तमुत्कृष्टं' इति नास्ति ■ पुस्तके. ७. नास्ति आ पुस्तके. ८. 'विषयेष्वपि च'—आ. ९. 'परावृत्तिरूपैकशब्देन कृता वृत्तिर्व्यवहारस्तुल्या'—आ. १० '...विहिता तुल्या वृत्तिः' इति पदविपर्यासात्मकः पाठः आ पुस्तके. ११. 'कामक्रोधादीनामात्मनोऽपि च पराभवमित्येकशब्देन कृता वृत्तिर्व्यवहारस्तुल्येति तुल्ययोगिता.'—आ.

## १६. दीपकम्

**प्रस्तुतेष्वप्रस्तुतेषु चैकधर्मान्वयो यदि ।**
**दीपकालङ्कृतिः प्रोक्ता दीपेन सदृशान्वयात् ॥३१॥**

प्रासादप्रकाशार्थं स्थापितो दीपो यथा प्रासादं रथ्यां च समतया प्रकाशयति, तथा प्रस्तुतान्वयार्थमुपात्त एक एव धर्मः प्रस्तुताप्रस्तुतयोरुभयत्रान्वितो भवतीत्यर्थः । दीपसादृश्याद्दीपं इव दीपकः । 'संज्ञायां च' इतिवार्थे कन्[2] तदेवोक्तं 'दीपेन सदृशान्वयात्' इति । परं ■ रथ्याप्रकाशो यथा प्रासङ्गिकः, तथा प्रस्तुतान्वयोऽपि । अयमेव तुल्ययोगितातोऽस्य विशेषः; तत्रैकं प्रस्तुतमन्यदप्रस्तुतमिति विशेषाग्रहणात् ।

यथा—

धैर्येण वीरः प्रमदेन नागः
स्थैर्येण शेषोऽतिबलेन सिंहः ।
भाति प्रतापेन महामहीशः
श्रीमाधवोऽन्यानभिभूतसारः[3] ॥९७॥

अत्र 'भाति' इत्येको धर्मः प्रस्तुते राज्ञ्यप्रस्तुते वीरादावपि चान्वेतीति दीपकालङ्कारः 'अन्यानभिभूतसारः' इत्यपि सर्वत्रान्वयि ।

अत्र दीपके तुल्ययोगितायां चोपमा गम्या । दीपके प्रस्तुतमुपमेयमप्रस्तुतमुपमानं; तुल्ययोगितायां तूपमानोपमेयभाव ऐच्छिकोऽविशेषादिति विवेकः

---

**Kārikā 31.** *If things which form the subject in hand and others which do not form the subject in hand are connected with the same attribute, the figure ■ termed Dīpaka, because it connects the things in the manner of ■ lamp.*

97. Unsurpassed by others in strength, a hero shines with his fortitude, ■ elephant with his profuse rut Śeṣa with his firmness a lion with his great might and the respected great monarch Mādhava with his valour

---

१. '०दीपः, स एव दीपकः'—आ. २. 'इति स्वार्थे कन्'—आ, इ. ३. 'श्रीराघवो०'—इ. ४. अतः पूर्वं 'स्थैर्येणाचलनेन प्रतिज्ञास्थैर्येण वा' इत्यधिकं ■■ पुस्तके.

## १७. आवृत्तिदीपकम्

**दीपस्थानीयशब्दस्यार्थस्य चाथोभयोरपि ।**
**आवृत्तौ त्रिविधं प्रोक्तं बुधैरावृत्तिदीपकम् ॥३२॥**

शब्दावृत्तिदीपकम्, अर्थावृत्तिदीपकं, शब्दार्थोभयावृत्तिदीपकं च[1]। क्रमेणोदाहरणानि । यथा—

**कुवलयन्ति वियोगवतीदृशः**
**कुवलयन्ति मनांसि मनोरथैः ।**
**प्रविकसन्ति कदम्बककुड्मलाः**
**प्रविदलन्ति च केतकिकोरकाः[2] ॥९८॥**
**इह विरौति वने सुपिकावली**
**त्विह विरौति वने भ्रमरावली ।**
**इह वनेऽपि वयं न सुखं गता**
**इति वदन्ति तवारिमृगीदृशः ॥९९॥**

विरहिणीनयनानि कुवलयानीवाचरन्तीति कुवलयन्ति । कुमुदाकाराणि भवन्तीत्यर्थः । कज्जलशून्यत्वादिति भावः । मनांसि । 'विरहिणाम्[3]' इति शेषः । मनोरथैः, अभीप्सितविकल्पैरित्यर्थः[4] कुवलयं भूवलयं । तद्वदा-

---

*Kārikā* **32.** *If the word, the sense or both performing the function of Dīpaka (lit a lamp) are repeated, it is termed by the learned as Āvṛtti-Dīpaka which is of three kinds*

98. The eyes of damsels separated from their lovers become similar to कुवलय (= blue water-lilies), the minds of men separated from their beloveds become similar to कुवलय (= the rotating globe of the earth) on account of their lofty desires (lit. the mind-ears). The buds of the Kadamba tree bloom up; the unblown Ketaka flowers open up.

99. "In this forest bewails a row of charming cuckoos; in this forest, again, bewails a row of black bees. In this forest, too we did not attain happiness."—thus utter (O King) thy enemies' damsels endowed with eyes resembling those of a female deer.

---

१. 'चेत्यर्थः'—आ. २. 'चम्पककोरकाः'—आ, इ. क पुस्तके च 'केतकेति पाठान्तरं' इति टिप्पण्यपि लभ्यते. ३. 'वियोगिनामिति'—आ. ४. 'अभीप्सितविकल्पैरित्यर्थः' इति नास्ति क पुस्तके.

चरन्तीति कुवलयन्ति । भूवलयं यथा सर्वदिग्गतं तथा भ्रमन्तीत्यर्थः । 'तव' इति प्रकृतराजानं प्रति कस्यचित्कवेरुक्तिः अरिमृगीदृशः पलायित-भवच्छत्रुमृगीनयनाः 'इह वनेऽपि वयं सुखं न गताः' इति परस्परं वदन्ति। स्वपरिवारं कुत्रचिद्वने विन्यस्य पुरुषाणामन्यत्र गुप्ततया स्थितंत्वा-दिति द्रष्टव्यम ।

## १८. प्रतिवस्तूपमा

**उपमानोपमेयत्वशालिनोर्वाक्ययोर्द्वयोः ।**
**पृथक्समानधर्मैक्ये प्रतिवस्तूपमा मता ॥३३॥**

उपमानोपमेयवाक्ययोरेकः समानो धर्मः पृथग् भिन्नशब्देन यत्र निर्दिश्यते, तत्र प्रतिवस्तूपमालङ्कारः । तदेवाह 'पृथक्समानधर्मैक्ये' इति । पृथग् भिन्नशब्देन निर्दिष्टो यः समानो धर्मः, तस्यैक्ये । एकत्वे सतीत्यर्थः ।

यथा—

**उपाया माधवस्यास्य ज्ञायन्ते फलसिद्धितः ।**
**रामार्जुनोज्झिता बाणा लक्ष्यन्ते लक्ष्यभेदतः ॥१००॥**

अत्रोपमानोपमेयवाक्ययोरेकः समानो धर्मो 'लक्ष्यन्ते', 'ज्ञायन्ते' इति विभिन्नशब्दाभ्यां निर्दिष्टः, इति प्रतिवस्तूपमा ।

नन्वत्रापि पदार्थयोरावृत्तिदर्शनादावृत्तिदीपकमेवास्त्विति चेत्, न । आवृत्तिर्हि प्रस्तुतानामप्रस्तुतानां वा, प्रतिवस्तूपमा ▮ प्रस्तुताप्रस्तु-

---

**Kārikā 33.** *When in two sentences which possess the characteristics of Upamāna and Upameya, the same common attribute is differently expressed, there occurs Pratīvastūpamā.*

100. The expedients of this Madhava are marked by their (unfailing) attainment of the desired object. The arrows discharged by Rāma and Arjuna are characterised by their (unmistakably) hitting the mark

---

१. '"तव" इति...द्रष्टव्यम्' इति भागो नास्ति आ पुस्तके. २. 'अरिमृगी-हरण्या'—अ. ३. इदं पदं नास्ति इ पुस्तके. ४. 'न सुखं गताः' इति पाठः इ पुस्तके. ५. 'राघवस्यास्य'—अ, इ. ६. 'विभिन्नशब्देन'—आ.

तानामिति विशेषात्। किं च। आवृत्तिदीपकं वैधर्म्येण न सम्भवति, प्रतिवस्तूपमा [redacted] वैधर्म्येणापि सम्भवति यथा—

गुणार्जनक्लेशमयं महीपति-
जानाति सम्पादितसर्वविद्यः।
नावैति सिन्धोर्मथनश्रमं जनो
न चापि वन्ध्या प्रसवस्य वेदनाम् ॥१०१॥

[1]जनः प्राकृतः।

१९. दृष्टान्तः

वर्ण्यावर्ण्यीयधर्माणां चेद्बिम्बप्रतिबिम्बता।
भासते सा बुधैः प्रोक्ता दृष्टान्तालङ्कृतिस्तदा ॥३४॥

यथा—

[2]श्रीमाधवो राज्यधुरं गतः सुधीः
सम्भावयत्याशु सुहृद्गणं श्रिया।
प्रसादयत्यब्जकुलानि भानुमा-
न्करैर्गतो द्रागुदयाद्रिमौलिताम् ॥१०२॥

---

101 This king who has acquired all lores is conscious of the pains required for the acquisition of merit. An ordinary man is not aware of the toils of churning the ocean, nor a barren woman of the pangs of child-birth

*Kārikā 34. If there appears the relation of an image and its reflection between the attributes of a thing which forms the subject of description (i. e. Upameya) and another thing which does not form the subject of description (i e. Upamāna), the figure is termed Dṛṣṭānta by the learned*

102. Revered Mādhava, endowed with a keen intellect, honours his host of friends with his riches no sooner than he attains the headship of the State The Sun with his rays sets clusters of lotuses to bloom no sooner than he becomes the crown of the Eastern Mountain.

---

१, इयं वृत्तिर्नास्ति आ इ पुस्तकयोः. २. प्रथमपादस्य पाठः 'लब्धोदयो माधव-रायभूपति.' इति [redacted] पुस्तके, 'श्रीराघवो राज्यधुरं गतः सुधीः' इति इ. पुस्तके च.

करैः किरणैः । द्राक् शीघ्रम् । अब्जकुलानि प्रसादयति प्रसादको हि हस्तेन परामृशतीत्यर्थः 'कर'पदश्लेषेण सूचितः ।

अयं वैधर्म्येऽपि सम्भवति । यथा—

श्रीमाधवे गच्छति राजमौलितां
द्विषां समूहैरनुतप्यतेतराम् ।
तावत्प्रसन्नं किल कैरवैरयं
यावद्रविश्चुम्बति नोदयाचलम् ॥१०३॥

## २०. निदर्शना

### (अ) वाक्यार्थवृत्तिनिदर्शना

वाक्यार्थयोः सदृशयोरभेदो यत्र वर्ण्यते ।
तत्र निदर्शना प्रोक्तालङ्कारनयगामिभिः ॥३५॥

यथा—

श्रीमाधवे दातरि या गुणज्ञता-
मोदः सुवर्णे ■ हि कर्णिकारे ।
सरस्वतीशालिनि रैविलासः
पूर्णे सुधांशावकलङ्किभावः ॥१०४॥

---

103 The groups of enemies are stung with extreme remorse the moment revered Madhava becomes head of the kings The Kairavas (= a variety of white lotuses opening at moon-rise) enjoy their bloom only so long ■ the Sun does not clasp the Eastern Mountain.

**Kārikā 35.** *When two (or more) parallel substances of sentences are described as identical, the figure is termed Nidars'anā by persons conversant with the science of Poetics.*

104. The appreciativeness that is found in revered Mādhava, a (celebrated) donor is, in fact fragrance in ■ goldon Karṇikara flower (or, in gold resembling a Karṇikara flower), or graces of affluence in a man endowed with learning, or spotlessness on the full moon.

---

१. अतः पूर्वं 'शोच्यमान' इत्यधिकं आ पुस्तके. २. प्रथमपादस्य पाठः 'राज्यं गते माधवरावराजनि' इति आ पुस्तके, 'श्रीराघवे गच्छति राजमौलितां' इति इ पुस्तके च. ३. 'किल कैरवीयम्' इति त्रिष्वपि अ आ इ पुस्तकेषु पाठः; स तु लेखकप्रमादोत्थो भाति. ४. 'निदर्शना तत्र प्रोक्ता'—अ. ५. 'श्रीराघवे'—आ, इ.

[1]सुवर्णे सुरूपे कर्णिकारकुसुमे आमोदः। कर्णिकारकुसुमसदृशे [2]सुवर्णे हेम्न्यामोदः, इति (वा) व्याख्येयम्

यथा वा—

समग्रनिधिलुण्ठनं सकलशत्रुसम्मर्दनं
सुरद्रुनयनं गृहे विहितमत्र सर्वप्रदम्।
[3]अयः करशयः कृतः प्रशमिताश्च सर्वापदः
समस्तकमनीयदो यदिह [4]माधवः सेवितः॥१०५॥

अत्र [5]माधवस्य [6]प्रकृतराज्ञः कृष्ण[7]स्यापि च सेवनस्य निधिलुण्ठनादीनां च यत्तद्भ्यामभेदो वर्णितः, इति निदर्शना।

'वाक्यार्थयोः सदृशयोः' इति लक्षणे हि [8]सदृशयोर्बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टयोर्वाक्यार्थयोः प्रस्तुताप्रस्तुतधर्मयोरित्यर्थो विवक्षितः। तथा च बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टप्रस्तुताप्रस्तुतधर्मयोरैक्यं यत्र वर्ण्यते, तत्र वाक्यार्थवृत्तिनिदर्शना। तेन—

[9]श्रीमाधवे दातरि वाञ्छितानां
वदान्यमन्यं परिमार्गयन्तः।
स्वर्द्रुं विहायानुसरन्ति मूढा
दुराशया बर्बुरवृक्षमुच्चैः॥१०६॥

---

105. A man plunders entire treasures suppresses all his enemies, brings the all-giving celestial tree to his home on this earth, makes good fortune lie in his hands and pacifies all calamities, if he in this world but attends upon Mādhava (= 1 God Viṣṇu; 2. Peṣava Mādhavarao I) who fulfils (one's) entire desires

106. Stupid and malicious persons, who hunt after another munificent hero in face of the fact that revered Mādhava grants (all) desires, (in fact,) discard the celestial tree and go after the Gum-Arabic tree.

---

१. इयं वृत्तिर्नास्ति ■ पुस्तके. २. इदं पदं नास्ति ■ पुस्तके. ३. अत्र आ पुस्तकस्था टिप्पणी 'अयः शुभावहो विधिः' इति. ४. 'राघवः'—इ. ५. आ पुस्तके पदं नास्त्येव; ■ पुस्तके च 'राघवस्य' इति पाठः. ६. 'राज्ञः'—इ. ७. 'विष्णोरपि'—आ; 'रामस्यापि'—इ. ८. अत्र आ पुस्तकस्था टिप्पणी—'सदृशयोरित्यस्यार्थमाह बिम्बेत्यादि। वाक्यार्थयोरित्यस्यार्थमाह प्रस्तुतेत्यादि। तथा सति फलितार्थमाह एवं चेति।' इति. ९. 'श्रीराघवे'—इ.

इत्यादौ वाक्यभेदाभावेऽपि न क्षतिः, निरुक्तधर्मयोरैक्यारोपसम्भवेन वाक्यार्थवृत्तिनिदर्शनासम्भवात् एवं च—

दुष्टमैत्री मनुष्याणामरिमन्त्रनिषेवणम् ।
कूलच्छायासुखासक्तिर्बकविश्वसनं झषे ॥१०७॥

प्राप्तावसरस्य कस्यचिद्राजानं प्रत्युक्तिरियम् । अत्र प्रस्तुताप्रस्तुतवृत्तान्तयोः सदृशयोरेकैकपदोपात्तत्वेऽपि बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टव्यापाररूपत्वाद्वाक्यार्थवृत्तिनिदर्शनैव । अत एवाप्पयदीक्षितैरपि

'राजसेवा मनुष्याणामसिधारावलेहनम् ।
पद्मानन परिष्वङ्गो व्यालीवदनचुम्बनम् ॥'

इत्यत्र वाक्यार्थवृत्तिरेवाङ्गीकृता ।

तर्हि रूपकादस्यः[1] को विशेषः?— इति चेद्, रूपके हि प्रायोऽविशिष्टयोरेव मुखचन्द्रयोरभेदः; अत्र तु बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतयोः सः, इति तयोर्भेदोऽवगन्तव्यः[4] । 'बिम्बप्रतिबिम्बभावापन्न—' इति विशेषणाद्यत्र स्थलविशेषे विशिष्टयोरभेदरूपकं तत्र वाक्यार्थवृत्तिनिदर्शनाया नातिप्रसङ्गः । यथा—

'भर्गेणोच्चैर्जटाभार उत्क्षिप्तः प्रभुणेच्छया ।
ललाटगतनेत्राग्नेः शिखाजिह्मं पुनातु वः ॥१०८॥'[6]

इत्यादौ नातिप्रसङ्गः । अत्र वह्निशिखाया ऊर्ध्वज्वलनशालित्वरूपस्य

---

107. Men's friendship with the wicked is one's abiding by one's enemies counsel, or one's giving up to the comforts of the shade on a river-bank or a fish's reliance on a Baka (= the Indian crane).

108. May God Śiva's bulk of matted hair, which is flapped up by him voluntarily and is a [redacted] of flames of the fire of the eye on his forehead, sanctify you!

---

१. '०वस्तुविशिष्टरूपत्वा०'—आ, इ. २. 'रूपकादस्य' इति पाठस्त्रिष्वपि [redacted] आ इ पुस्तकेषु. ३. 'रूपके ह्यविशिष्टयोरेव'—आ. ४. 'इति भेदोऽवगन्तव्यः'—अ. ५. 'भर्गेणोच्चै...भावोऽप्यस्ति' इति भागस्य स्थाने 'रक्ते सतीकरे कोकनद नैवोपलक्ष्यते । नालदण्डोऽस्य पार्वत्या भुजदण्डः पुनातु वः ' इति पठं, 'आरक्ते पार्वतीकरे कोकनदं रक्तोत्पलं नैवोपलक्ष्यते अस्य कोकनदस्य नालदण्डाभिन्नः पार्वत्या भुजदण्डो वो युष्मान्पुनातु । राजान प्रत्याशीरियम् । अत्र मीलितालङ्काराङ्के विशिष्टाभेदरूपके बिम्बप्रतिबिम्बभावाभावाद् "इति तद्वृत्तिश्च आ पुस्तके. ६. 'अत्र'—इ.

साधारणधर्मस्य सम्पादनार्थमेव विशेषणोपादानं, न [redacted] बिम्बप्रतिबिम्ब-भावोऽप्यस्ति। न चात्र 'प्रायः', 'ध्रुवम्', इत्यादिपदाभावे लुप्तोत्प्रेक्षैवास्तु, न रूपकम्, इति शङ्क्यम्;

'अङ्घ्रिघ्रदण्डो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे।
विधिविष्टरपद्मस्य नालदण्डो मुदेऽस्तु नः॥'

इत्यत्र सर्वैरपि[1] विशिष्टरूपकस्यैव[2] स्वीकृतत्वात्, तद्वदत्रापि रूपकस्यैवौचित्यावर्जितत्वात्। [3]'विशिष्ट-'इतिकरणाच्च सावयवरूपके नातिप्रसङ्गः। यथा—

कुसुमचन्द्रकलाकबरीजटा-
विरहपाण्डिमभस्मविभूषिता।
शिरसि भूषणभेदकपालिका
विरहिणी नृप[4] भर्गतनुः स्फुटा॥१०९॥

[5]भूषणभेदो भूषणविशेषः, भाषायां 'शेषफूल' इति प्रसिद्धः। 'नृप' इति प्रकृतराज्ञः सम्बोधनम्

अत्र विषयविषयिविशेषणानां कुसुमचन्द्रकलादीनां बिम्बप्रतिबिम्बभावसत्त्वेऽपि कुसुमादिविशिष्टस्य विरहिणीरूपविषयस्य चन्द्रकलादिविशिष्टस्य भर्गतनुरूपविषयिणश्च न विशिष्टरूपेणैक्यारोपः, किं तु विषयविषयिणोस्तदीयविशेषणानां च पृथगेवैक्यारोपः। यथा वा—

---

109. O King [redacted] woman separated from her lover obviously bears S'iva's body, inasmuch as she is decorated by ashes in the form of her paleness due to separation by matted hair in the form of her braided hair and by a lunar digit in the form of flowers (put on her forehead for cooling the fever of separation) and, further, wears on her head the skull in the form of a particular ornament called शेषफूल.

---

१. 'न च'—अ. २. 'विशिष्टरूपकस्वीकारात्'—आ. ३. इदं वाक्यं नास्ति आ पुस्तके. ४. 'एव'—आ. ५. 'कुसुमचापशरैरुपलक्षिता' इति पाठः तृतीयपादस्य [redacted] पुस्तके. ६. 'भूषणभेदो...सम्बोधनम्' इति भागस्य स्थाने 'इदं च सावयवरूपकम्' इति पाठः आ पुस्तके. ७. 'प्रत्येकमेकैकारोपः—आ, इ. ८. इद पद्यं, 'सुष्ठुविवेचकः' इत्यन्ता तद्वृत्तिश्च नास्ति आ पुस्तके.

निकटछत्रमनोरमवारिजः
सदसतोः[1] पयसोः सुविवेचकः[2] ।
अमलमानसमानससङ्गतो
जयति राघवभूपतिहंसकः ॥११०॥

अत्रापि न विशिष्टरूपेणैक्यारोपः, किं तु पृथगेव । सदसतोः पयसो-र्दुग्धजलयोः सुष्ठुविवेचकः[3] । अत एव

'ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकेयम्
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्रां कपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ॥'

इति सावयवरूपकोदाहरणे रात्रिरूपविषयस्य कापालिकारूपविषयिणो बिम्बप्रतिबिम्बभावापन्नज्योत्स्नादिरूपविशेषणानां च पृथगेवैक्यारोपो-ऽङ्गीकृतः, न ज्योत्स्नादिविशिष्टरात्र्या भस्मादिविशिष्टकापालिकायाश्च विशिष्टरूपेणापि ।

### (आ) पदार्थवृत्तिनिदर्शना

**B पदार्थवृत्तिनिदर्शना तूपमानिरूपणप्रसङ्गे पूर्वं प्रदर्शिता । उपमानोपमेययोरन्यतरस्मिंस्तयोरन्यतरधर्मारोपः[4] पदार्थवृत्तिनिद-**

---

110. Glorious is the swan in the form of King Rāghava who has a charming lotus in the form of his umbrella of dignity near by, is a fine discriminator of the superior and the inferior liquids (viz milk and water) and is associated with (the lake) Mānasa in the form of his stainless mind

**B (No Kārikā)** *Padārthavṛttinidars'anā has already been pointed out previously in the course of the treatment of Upamā. When the peculiar properties of any one of the Upamāna and the Upameya are imposed on the other, there occurs Padārthavṛttinidars'anā. Vākyārthavṛttinidars'anā, on the other hand, is the imposition of identity*

---

१. 'सदसतोर्जलदुग्धविवेचकः' इति पाठः द्वितीयपादस्य ■ पुस्तके. २. 'सदसतोर्जलदुग्धवद्विवेचको हंसो यथा जलदुग्धयोर्विवेचकस्तथा सदसतोर्विवेचक इत्यर्थः ' इति वाक्यं ■ पुस्तके. ३. '०विषयिणोर्बिम्बप्रतिबिम्ब०'—अ, इ. ४. 'रन्यतरस्मिन्नन्यतर-धर्मारोपः'—आ.

र्शना, बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतयो-रैक्यारोपो वाक्यार्थवृत्तिनिदर्शना, इति तयोर्वैलक्षणम् ।

केचित्[2] त्वेकपदोपात्तातिरिक्तयोर्बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्ट-रूपयोः प्रस्तुताप्रस्तुतयोरैक्यारोपे वाक्यार्थ[3]वृत्तिनिदर्शना; अथ चोप-मानोपमेययोरन्यतरस्मिन्[4] तयोरन्यतरधर्मारोपे, एकैकपदोपात्तयोः सदृश-योर्विशिष्टयोरैक्यारोपेऽपि[5] च पदार्थवृत्तिनिदर्शनेति वदन्ति । तन्मते

'दुष्टमैत्री मनुष्याणाम्—'

इत्यादौ पदार्थवृत्तिरेव निदर्शना, इत्यलं विस्तरेण ।

(ङ) सदसदर्थनिदर्शना

सदसदर्थयोर्यत्र बोधनं क्रियया तु यत् ।
निबध्यतेऽपरा तत्र बुधैः प्रोक्ता निदर्शना ॥३६॥

यत्र सदसत्क्रियाविशिष्टस्य कस्यचित्स्वक्रिययान्यान्प्रति सतो-ऽसतो वार्थस्य बोधनं यन्[6]निबध्यते, तत्र सापरा निदर्शना ।

सदर्थनिदर्शना, यथा—

नरेन्द्रैरभिवन्द्योऽपि धत्ते विनयमागते
नृपोऽयं बोधयन्नन्यान्सुखिनां विनयोऽर्थदः ॥१११॥

---

*on two objects respectively forming and not forming the subject of discussion and bearing the distinctive form of things that have assumed the positions of an image and its reflection. Thus the two varieties are different from each other.*

**Kārikā 36.** *If communication of a desirable or an undesirable import is made by means of action, it is called another Nidarśanā by the learned.*

111. This king who deserves to be adored even by (other) chief kings bears modesty towards his guest thereby imparting to others that it is modesty that brings riches to those desiring happiness.

---

१. 'सदृशयोर्विशिष्टधर्मयोरैक्यारोपो वाक्यार्थवृत्तिरितितयोर्वैलक्षण्यम्' इति [redacted] पुस्तके. २. 'केचित्तु बिम्बप्रतिबिम्ब०'—अ. ३. 'वाक्य र्थवृत्तिः'—अ, इ. ४. '०रन्यतर-स्मिन्नन्यतरधर्मारोपे'—आ. ५. 'सदृशयोरैक्यारोपेऽपि च'—अ; 'सदृशयोर्विशिष्ट-धर्मयोरैक्यारोपेऽपि च'—आ. ६. 'निबध्यते यत्'—आ. ७. "बोधयत्यन्या०'—अ.

अत्र महाप्रभुरपि समागते विनयं दधानोऽयं राजा माधवस्तया विनयक्रिययान्यान्प्रति "सुखैषिणां विनयोऽर्थप्रदः" इति श्रेयस्करमर्थं बोधयन्निबद्धः, इति सदर्थनिदर्शना।

असदर्थनिदर्शना, यथा—

विद्विषस्ते पलायन्तः पद्भ्यामुज्झितवाहनाः।
बोधयन्त्यपरानेवं दुःखा बलिविरोधिता ॥११२॥

अत्र सम्बोध्यस्य राज्ञो माधवस्य प्रतापमसहमानाः पलायन्तः शत्रवस्तया पलायनक्रियया "प्रबलेन सह विरोधिता दुःखा" इत्यश्रेयस्करमर्थं बोधयन्तो निबद्धाः, इत्यसदर्थनिदर्शना।

एवमुदाहरणान्तराण्युन्नेयानि। यथा—

उच्चैःपदं प्राप्य लघुः पतेदिति
द्रागश्वलीलागतिमात्रनिर्धुतः।
श्रीमाधबोच्चैस्तरमूर्धशेखर-
प्रसूनरेणुप्रकरः पतत्यधः ॥११३॥

श्रीमाधवस्य राज्ञः, उच्चैस्तर उन्नततरः। सार्वभौमतया केनाप्यनामितत्वादिति भावः। यो मूर्धा, स एव शेखरः शिखरोऽलङ्घ्यत्वात्।

---

112. Thy enemies, while escaping on foot after quitting their carriages, inform others that hostility with the mighty causes distress.

113 The mass of pollen of flowers on the crest of revered Mādhava's very lofty head, shaken off by the mere sportive pace of his horse, falls down thereby signifying that a trifling person (or thing) attaining a high position meets a sudden fall.

---

१. 'विनयमादधानो'—अ, इ. २. 'नृपस्तया'—अ, इ. ३. 'बोधयन्ति परानेवं'—अ. ४. 'राघवस्य'—इ. ५. 'इत्येवमश्रेयस्करमर्थं'—आ. ६. 'एवमुदाहरणान्युन्नेयानि'—अ, इ; 'एवमुदाहरणान्तराणि'—आ. ७. ■ पुस्तके 'नारायणोच्चैस्तर०' इति प्राग्लिखितं संशोध्य 'श्रीराघवोच्चैस्तर०' इति पाठो विहितः. ८. 'श्रीमाधवराज्ञ उच्चैस्तरः' इति ■ पुस्तके; 'नारायणरावस्योच्चैस्तरः' इति प्राग्लिखितं संशोध्य 'श्रीराघवराज्ञ उच्चैस्तरः' इति पाठो विहितः इ पुस्तके. ९. नास्ति ■ पुस्तके. १०. 'सार्वभौमत्वात्' —अ. ११. शेखरोऽलङ्घ्यत्वात्'—अ; 'शेखरः शिखरोऽलङ्घ्यतया शिखरमुच्यत्वात्' —आ.

तत्सम्बन्धीनि यानि प्रसूनानि प्रसूनगुच्छो विभुताद्योतकः, तद्गतो रेणुप्रकरः परागपुञ्जः। अश्वस्य नृपारूढतुरगस्य या लीलागतिस्तावन्मात्रेण। अल्पेनेत्यर्थः। निर्धुतः सन्नधः पतति। किंभूतः? लघुरल्पः क्षुद्रश्च। उच्चैः-पदमुन्नतपदं महतीं पदवीं च, प्राप्य द्राग् झटिति, स्तोकमात्रेणेत्यर्थः। पतेदित्येवम्। 'अन्यान्बोधयन्' इति शेषः।

अत्राश्वलीलागतिमात्रकम्पनेनाधः पतन्नृपमूर्धगतप्रसूनपरागपुञ्जो 'लघोरुन्नतपदप्राप्तिः पतनहेतुः' इत्यसदर्थं बोधयन्निबद्धः, इत्यसदर्थनिदर्शना।

यथा वा—

कार्यातिथेयी गृहिभिः सतां परा
समागतानामिति बोधयन्प्रभुः।
श्रीमाधवः पण्डितवर्गमागतं
धनैः सुरत्नैर्बहु सत्करोत्ययम् ॥११४॥

गृहिभिः समागतानां सतां, परोत्कृष्टा, आतिथेयी सत्कारः, कार्या। इत्येवं बोधयन्नयं श्रीमाधवः प्रभुः समागतं पण्डितवर्गं, धनैर्द्रविणैः, सुरत्नैर्माणिक्यादिभिरुत्कृष्टवस्तुभिरपि च बह्वीप्सितादप्यधिकं यथा तथा, सत्करोति

अत्र समागतं पण्डितवर्गं बहु सत्कुर्वाणोऽयं माधवप्रभुः स्वक्रियया 'गृहिभिः समागतानां सतामेवं सत्कारः कार्यः' इत्येवं सदर्थं बोधयन्निबद्धः, इति सदर्थनिदर्शना।

---

114. This king, revered Madhava, accords a grand reception to the group of Panḍitas that have arrived (here) by means of money and precious jewels, thereby pointing out that householders must extend supreme hospitality to their guests

---

१. 'पुष्परेणु-छः'—अ, इ. २. 'विभुताद्योतकः' इति पदं नास्ति ■ इ पुस्तकयोः. ३. 'लीलागतिर्मन्दगतिस्ताव-मात्रेण'—आ. ४ '०मुन्नतं स्थानं'—आ; '०मुन्नतं पद'—इ. ५ 'महतां पदवी च'—अ; 'महत्पदवी च'—इ. ६. 'पतेदित्यन्यानेवं बोधयन्नि—त्यसदर्थनिदर्शना'—अ; 'पतेदित्येवं बोधयन्निति शेषः'—आ; 'पतेदित्येवं बोधयन्नित्यसद-र्थनिदर्शना'—इ. ७. इदं वाक्यं नास्ति अ इ पुस्तकयोः. ८. 'यथा वा' इति पदद्वयं नास्ति अा पुस्तके ९. 'श्रीराघवः'—इ. १०. 'श्रीमाधवप्रभुः'—अ; 'श्रीराघवः प्रभुः'—इ. ११. 'आगत'—आ, इ. १२. 'राघवप्रभुः'—इ.

## २१. व्यतिरेकः

**उपमाने वोपमेये विशेषश्चेन्निबध्यते ।**
**व्यतिरेकालङ्कृतिः सा प्रोक्तालङ्कारवित्तमैः ॥३७॥**

उपमानेऽर्थवोपमेये[1] । विशेषो वैलक्षण्यम् । स च कुत्रचिदाधिक्यपर्यवसायी, कुत्रचिन्न्यूनत्वपर्यवसायी, कुत्रचिदनुभयपर्यवसायी ।

उपमेय आधिक्यपर्यवसायी, यथा—

कलानिधिः शुचिः श्रीमान्कान्तिमाञ्जनरञ्जनः ।
राजंस्त्वं चन्द्रतुल्योऽपि कलङ्कित्वं[2] न ते पुनैः[3] ॥११५॥

उपमाने न्यूनत्वपर्यवसायी, यथा—

पूर्वार्धं[4] तदेव ।
राजंस्त्वं द्विजराजोऽपि कलङ्की द्विजराट् पुनः ॥११६॥

[5]द्विजराजोऽपि चन्द्रोऽपि । अपिश्चार्थे ।

---

**Karikā 37.** *If superiority of Upamana or of Upameya is narrated, the figure is termed Vyatireka by best rhetoricians*

115. O king ! although being कलानिधि (=1. a receptacle of 64 fine arts; 2. a store-house of 16 lunar digits), शुचि (=1. pure; 2 luminous) श्रीमत् (= 1. wealthy; 2. possessing the twelfth lunar digit called S'rī), कान्तिमत् (=1. lovely; 2. possessing the tenth lunar digit called Kānti) and जनरञ्जन (=1. one who gratifies one's subjects; 2 one who gives delight to people), thou art similar to the moon, still कलङ्कित्व (=1. ill-repute, 2. being marked with the dark spot) does not go with thee.

116. O king ! both thou and the moon are कलानिधि, शुचि, श्रीमत्, कान्तिमत् and जनरञ्जन; the moon, however, is कलङ्किन् (=1. marked with the dark spot; 2. stained).

---

१. 'उपमाने उपमेये वा'—आ; 'उपमाने वोपमेये'—इ. २. 'द्विजराजोऽपि' —आ, इ. ३. अत उत्तर वृत्तिः 'कला चातुरी षोडशप्रसिद्धा (?) द्विजराजोऽपि चन्द्रोऽपि ।' इति आ पुस्तके, 'द्विजराजोऽपि चन्द्रोऽपि' इत्येव च ■ पुस्तके. ४. आ पुस्तके पूर्वार्धं समग्रतया पठितम्. ५. अत्रेयं वृत्तिर्नास्ति ■■ इ पुस्तकयोः.

उपमेये न्यूनत्वपर्यवसायी, यथा—

राजंस्तव प्रतापेन तुल्यो रविमहातपः ॥
तथापि रवितापोऽयं न रात्रौ छत्रिनिम्नयोः ॥११७॥

[1]'तपति' इति शेषः ।

प्रतीपसङ्कीर्णोऽयं व्यतिरेकः ।

उपमान आधिक्यपर्यवसायी, यथा—

[2]पूर्वार्धमुक्तमेव ।

तथापि त्वत्प्रतापोऽयं निशायां छत्रिनिम्नयोः[3] ॥११८॥

अनुभयपर्यवसायी, यथा—

वर्तुलं विमलं चोर्ध्ववर्त्तमानमधोज्ज्वलम् ।
राजंश्चन्द्रसमानं ते छत्रं दण्डो विशिष्यते ॥११९॥

[4]दण्डमात्रेण वैलक्षण्यं, न [5]किञ्चिन्माहात्म्यादौ न्यूनत्वमाधिक्यं वा, इत्यनुभयपर्यवसायिता ।

## २२. सहोक्तिः

वर्ण्यते सहभावश्चेज्जनानां चित्तरञ्जनः ।
सहोक्त्यलङ्कृतिस्तत्र विबुधैः परिकीर्तिता ॥३८॥

---

117 O king intense sunshine is similar to thy प्रताप (=1. splendour, 2 valour); still, the sunshine does not prevail during the night, on ■ bearer of umbrella and in low land

118. O king ! brilliant sunshine is similar to thy प्रताप; but this प्रताप of thine blazes even during the night ■ bearers of umbrella and in low land

119. O king thy (royal) umbrella, round pure, placed high up and luminous as it is, is similar to the moon; the rod alone is its distinguishing feature

**Karikā 38.** *If facts or objects are associated with each other in a striking manner, there, say the learned, occurs the figure Sahokti*

---

१. 'तपतीति शेषः' इति वृत्तिभागो नास्ति आ पुस्तके. २. आ पुस्तके पूर्वार्धं समग्रतया पठितम्. ३. अत उत्तरं 'तपतीति शेषः' इति वृत्तिः ■■ पुस्तके. ४. 'चोर्ध्वं वर्त्तमानं०'—अ ५. इयं वृत्तिर्नास्ति ■■ पुस्तके ६. '०न्माहात्म्यान्न्यूनत्व०' —अ.

यथा—

राजन् ! स्पृशति ते बाणं ज्यारिकायैः समं किल ।
कोदण्डान्निर्गता बाणाः प्राणैः सार्धं भवद्विषाम् ॥१२०॥

'चित्तरञ्जनः' इत्युक्त्या—

'श्रीमाधव ! जितरिपो ! दानालिपतसुरद्रुम ! ।
कीर्तिस्ते दिवमारूढा प्रतापेन सहानघ ! ॥१२१॥'

इत्यादौ न सहोक्ति

## २३. विनोक्तिः

प्रस्तुतं चेद्विना किञ्चिद्धीनं रम्यमेव वा ।
वर्ण्यते तत्र गदिता विनोक्तिः शास्त्रकोविदैः ॥३९॥

यथा—

प्रभुरन्यः समर्थोऽपि शूरोऽपि निपुणोऽपि च ।
श्रीमाधवकृपादृष्टिर्नो चेत्सर्वं निमज्जति ॥१२२॥

यथा वा—

गृहमेधी समर्थोऽपि समृद्धो निपुणोऽपि च ।
श्रीराघवकृपादृष्टिं विना सर्वमनर्थकम् ॥ १२३॥

---

120. O king! thy bow-string touches thy arrow simultaneously with thy enemies' bodies; arrows exit from thy bow instantaneously with the vital breaths from thy enemies' bodies

121 O revered Madhava who hast vanquished thy enemies, hast disparaged the celestial tree by [redacted] of thy charities and art immune from sin or danger thy glorious fame along with thy majestic valour has ascended the heaven

**Kārikā 39.** *When the subject of description in the absence of something is described as destitute or even as pleasant, the figure is termed Vinokti by persons versed in Poetics.*

122. Another king may be mighty, brave and also shrewd. All that, however, becomes futile in case revered Mādhava is not favourably disposed towards him.

---

१. 'यथा' इति पदं नास्ति त्रिष्वपि अ आ इ पुस्तकेषु. २. 'दानेनालिपतस्वर्द्रुम'—आ. ३, 'अहमेधी' इति त्रिष्वपि [redacted] आ इ पुस्तकेषु पाठः. ४. 'श्रीमाधवकृपादृष्टिं'—अ, आ. ५. 'सर्वमनर्थकम्'—अ.

[1]राघवः प्रकृतो राजा, रामोऽपि च ।

[2]पूर्वश्लोके 'विना'शब्दमन्तरेण विनोक्तिः, अत्र [illegible] 'विना'शब्देन, इति विशेषः ।

किञ्चिद्विना रम्यत्वे सा, यथा—

श्रीमाधव ! महावीर ! जितशत्रोऽमितद्युते ! ।
वाहिनी ते विना भाति बलशौर्यविवर्जितैः ॥१२४॥

यथा वा—

श्रीराघवे राजसभाप्रविष्टे
विमुक्तदोषा इव तद्द्विजिह्वाः ।
अभ्यागता दैन्यविमुक्तकल्पा
वाराङ्गनाः प्राप्तधना इवालम् ॥१२५॥

श्रीराघवे राजसभाम्प्रविष्टे सति तस्यां राजसभायां ये द्विजिह्वाः सत्यासत्यप्रवादिनः खलाः । त्यक्तद्विजिह्वतादोषा इव । 'विभान्ति' इति शेषः । राज्ञो भयाद्दोषं विहाय तिष्ठन्तीत्यर्थः । अभ्यागता याचकाः ।

---

128. A householder may be competent, wealthy and also skilful. All that, however, becomes useless in the absence of श्रीराघव's (=1 God Rāma's, 2 Raghunāthrao Peṣava's) kind regard.

124. O revered Madhava who are [illegible] great warrior, hast subdued thy enemies and art endowed with immense majesty ! thy army looks, splendid in the absence of persons devoid of strength and valour.

125. When revered Rāghava enters the royal court, the wicked members having, as it were, forsaken their noxious quality look agreeable the guests, having practically got rid of poverty, look pleasant ; and the courtesans, having, as it were, procured wealth, look extremely charming

---

१. 'माधवः प्रकृतो राजा कृष्णोऽपिच'– अ; 'माधवः प्रकृतो राजा हरिश्च'—आ.

२. [illegible] वाक्यं नास्ति अ इ पुस्तकयोः. ३. 'श्रीराघव'—इ. ४. 'श्रीमाधवे' —अ. आ. ५. 'इव सन्' —अ, इ. ६. 'श्रीमाधवे'—अ; आ पुस्तके त्विदं पदं नास्त्येव, ७. इदं पदद्वयं नास्ति आ पुस्तके. ८. 'तस्या राजसभायाः सम्बन्धिनो ये'—आ; 'तस्या राजसभाया ये'—इ. ९. अत उत्तरं 'इत्यर्थः' इत्यधिकं आ पुस्तके. १०. 'राजसभायां दोषं विहाय'—अ.

[1]सकृद्दर्शनादेव राजा ददातीति निश्चयेन दारिद्र्यस्य गतप्रायत्वात्, इति [2]भावः ।

अत्र द्विजिह्वतादै[3]न्यनिर्धनत्वदोषै[4]र्विना द्विजिह्वादीनां राजसभा[5]याश्च रम्यत्वं 'वि[6]ना'शब्दमन्तरेण दर्शितम्, इति विनोक्तिः ।

## २४. समासोक्तिः

**प्रस्तुतेऽप्रस्तुतं यत्र श्लिष्टैः साधारणैः पदैः ।**
**परिस्फुरति यत्तत्र समासोक्तिरलङ्कृतिः ॥४०॥**

यत्र प्रस्तुतवृत्तान्ते वर्ण्यमानेऽप्रस्तुतमप्राकरणिकं वस्तु श्लिष्टैः साधारणैर्वा शब्दैः परिस्फुरति यत्, तत्र सा समासोक्तिः [7]समासेन सङ्क्षेपेण प्रस्तुताप्रस्तुतवृत्तान्तयोरुक्तिः समासोक्तिः ।

[8][9]यथा—

अयं सन्ध्याम्बरे लग्नो रक्तो लम्बकरै रविः ।
सन्ध्याप्यनुययौ रक्ता शनैः शीर्णाम्बरा सती ॥१२६॥

---

***Kārika 40.*** *When, at the occurrence of the subject of description, another thing which is not the subject in hand, presents itself on account of epithets which are either paronomastic or common, there occurs the figure Samāsokti.*

126. This Sun, who was रक्त (=1. red-coloured; ■ impassioned), had clung to सन्ध्याम्बर (=1. the evening sky; 2 the garment of Sandhyā i e. the evening twilight represented as a mistress) with his लम्बकर ■ (=1. pendant rays, 2 extended hands) Sandhya, who had become रक्ता (=1. reddened; 2 enamoured) and शीर्णाम्बरा (=1. who had quitted the sky, 2. whose garment had dropped down), also gradually or slowly went after him (i e, 1. disappeared after the sunset; 2 went in for sexual enjoyment)

---

१. अतः पूर्वं 'दैन्येत्यादि' इत्यधिकं आ पुस्तके. २. अत उत्तरं 'भान्तीति शेषः' इत्यधिकं आ पुस्तके. ३. '०दैन्यतन्निर्धनत्व०'—अ, ■ ४. 'द्विजिह्वानां'—अ. ५. 'राजसभाया अपि च'—आ ६. 'शब्दान्तरेण'—आ, ७. 'पदैः'—आ. ■ 'सा तत्र'—आ. ९. 'समासोक्तिरलङ्कारः'—आ; 'समासोक्तिरलङ्कृतिः'—इ. १०. 'प्रस्तुताप्रस्तुतवृत्तान्तयोः समासेन सङ्क्षेपेणोक्ति समासोक्तिः'—आ. ११. इदमुदाहरणं तद्वृत्तिश्च नास्ति आ पुस्तके.

आरक्तोऽयं रविः सन्ध्याकालसम्बन्धिन्याकाशे किरणैर्लग्नः। 'अभूत्' इति शेषः। अस्तंगतप्रायोऽभूदित्यर्थः। आरक्ता[1] सन्ध्यापि मन्दं-मन्दं विमुक्ताकाशा सत्यनुययौ। रवेरस्तानन्तरं सापि विरक्ता[2], इत्यर्थः।

प्रकृतराजानं प्रति कस्यचिदुक्तिरियम्[3]। अत्र सूर्यास्तवर्णने प्रस्तुते, हस्तेन वस्त्राकर्षणं कुर्वाणमनुरागिणं कञ्चिन्नायकमनुरक्ता विशीर्णवस्त्रा काचन नायिका मन्दंमन्दमनुगतेति नायकनायिकयोरप्रस्तुतो वृत्तान्तः परिस्फुरति, इति समासोक्तिः।

यथा वा—

राजन्[5]ऐन्द्रीं समालिङ्ग्य करैर्निम्नोन्नतान्स्पृशन्।
अयं [6]रविः पतन्रक्तः पुनश्चुम्बति वारुणीम् ॥१२७॥

हे राजन्! 'पश्य' इति शेषः। ऐन्द्रीं प्राचीं दिशं, समालिङ्ग्य[7] स्पृष्ट्वा। अन्यत्र[8], इन्द्रसम्बन्धिनीं काञ्चित्स्त्रियं परिरभ्य। करैः किरणैः, निम्नोन्नतान्पृथिव्याकाशादिप्रदेशान्, स्पृशन्। तत्र किरणान्प्रसारयन्नित्यर्थः। अन्यत्र[10], करैर्हस्तैः। निम्नोन्नतान्[11]नाभिकुचाद्यवयवान्, स्पृशन्[12] परामृशन्। अयं रविः[13] सूर्यः,[14] पतन् सायं नमन्। अन्यत्र, स्वर्लोकभ्रष्टः। रक्त आरक्तः[15]। अन्यत्र, अनुरक्तः। सन्। 'पुनः' वाक्यालङ्कारे। अन्यत्र, भूयः। वारुणीं पश्चिमां दिशं, चुम्बति प्राप्नोति। अन्यत्र, वरुणसम्बन्धिनीं काञ्चित्स्त्रियं

---

127 O king the sun, having clasped ऐन्द्री (=1. the eastern quarter; 2. a damsel belonging to India) and having touched her निम्नोन्नतs (=1. having roamed over the high and low lands of the east; 2. having gently rubbed the damsel's depressed and elevated limbs) with his करs (=1. rays 2. hands), now falls low (=1. declines in the evening; 2. morally falls down as a result of his sins) and, becoming रक्त (=1 red; 2 impassioned), again kisses वारुणी (=1. reaches the western direction, or 2. kisses a damsel belonging to Varuṇa, or 3. drinks wine).

---

१. 'रिक्ता'—अ. २ 'विरमितेत्यर्थः' इति ब क पुस्तकयोः पाठः. ३. इदं वाक्यं नास्ति ब पुस्तके. ४ 'रवेरस्तवर्णने'—इ. ५. पश्चिमं 'निजपक्षच्छिद्रीता—' इत्याद्युदाहरण सवृत्तिकमतः पूर्वमेव दत्तं क्ष पुस्तके. ६. 'शुचिः'—आ. ७. 'आलिङ्ग्य'—आ. ८. 'प्राप्य'—आ. ९. 'अथ क्ष'—आ. १०. 'अथ च' —आ. ११. 'निम्नोन्नतानर्थो-न्नाभिकुचाद्यवयवान्'—आ. १२. नास्ति अ पुस्तके. १३. 'शुचिः'—आ. १४ अत उत्तरं 'अथ च कश्चन शुद्धः पुमान्' इत्यधिकं आ पुस्तके. १५. 'आरक्तकिरणः'—आ, इ.

चुम्बति। मुखे चुम्बिते नायिका चुम्बिता, इति व्यवहारात्। यद्वा, वारुणीं मदिरां चुम्बति पिबति जारकर्म कृत्वा पुनर्मद्यपानं करोतीत्यर्थः।

अत्र सूर्यस्योदयास्तयोर्वर्णने प्रस्तुते, 'ऐन्द्रीं', 'वारुणीम्' इति स्त्रीलिङ्गनिर्देशात्, 'अयं रविः' इत्यादौ पुंलिङ्गनिर्देशात्, 'पतन्', 'रक्तः', 'करैः', 'समालिङ्ग्य', 'चुम्बति' इतिपदानां श्लेषमहिम्ना च, शुद्धवंशीयः कश्चिदेकत्र जारकर्म कृत्वा परलोकभ्रष्टः सन्पुनरन्यां चुम्बतीत्यप्रस्तुतोऽप्यर्थः प्रतीयते, इति समासोक्तिः।

यथा वा—

निजपक्षच्छिद्भीता
शैली राघवनरेश ! दृढपक्षा।
सौजन्यामृतसिन्धौ
दुर्धर्षे त्वयि विलीनास्ते ॥१२८॥

हे राघवनरेश! दृढपक्षा दृढपक्षपाता। स्थिरा, इत्यर्थः। अन्यत्र, दृढगोत्रा। निजो यः पक्षः स्थैर्यरूपस्तं छिन्दन्तीति तथोक्ताः। खिलाः, इत्यर्थः। तेभ्यो भीता। तत्र न तिष्ठतीत्यर्थः अन्यत्र, इन्द्राद्भीता शैली सतां स्वभाव-

---

128 O king Rāghava in thee, an unassailable ocean of the nectar in the form of gentility, submerges शैली ( 1 conduct of the good· ■ a feminine mountain) that ■ दृढपक्षा ( 1 constant or faithful; 2. possessing solid wings) and is afraid of निजपक्षच्छिद् (—1. the wicked who cut off their own wing of firmness or faithfulness; 2 Indra who clips the wings of mountains.)

---

१. इदं वाक्यं नास्ति आ पुस्तके. २. 'मद्यं'—आ, इ. ३. इदं पदं नास्ति आ इ पुस्तकयोः. ४. 'इत्यत्र'—आ. ५. 'शुचिः'—आ. ६. 'इत्यत्र'—आ. ७. अतः पूर्वं 'शुचिः' इत्यधिकं आ पुस्तके. ८. 'आलिङ्ग्य'—आ. ९. 'इत्यादिपदश्लेषमहिम्ना च'—आ. १०. इदमुदाहरणं आ पुस्तके 'राजन्नैन्द्रीं समालिङ्ग्य—' इत्युदाहरणात्पूर्वमेव शोधरूपेण दत्तम्; ■ पुस्तके त्विदं वर्त्तमानं न दृश्यते. 'अत्र शोधपत्रिका' इति लिखित्वा तत्र खण्डितत्वं प्रदर्शितं, किं तु निर्दिष्टा शोधपत्रिका पुस्तके नैवोपलभ्यते. ११. 'क्व पि च नरेन्द्र दृढपक्षा'—आ. १२. 'हे राघवनरेश... दृढगोत्रा' इत्यस्य स्थाने 'नरेन्द्रेति सम्बोधनम् दृढः स्थिरः, पक्षो मतं गोत्रं च, यस्याः सा। स्थिरेत्यर्थः। दृढगोत्रा च' इति आ पुस्तके. १३. 'चञ्चलस्वभावाः'—आ. १४. 'इत्यर्थः' इति नास्ति ■■ पुस्तके. १५. 'इन्द्राद्भीता च'—आ.

पद्धतिः पर्वतस्त्री च। [1]दुर्धर्षे। एकत्रः, खलैः; अन्यत्र, इन्द्रादिभिः। सौजन्यामृतसागरे त्वयि लीनास्ते। कापि स्थिरा शैली खलेभ्यो भीता सती त्वय्येव तिष्ठतीत्यर्थः[1]।

अत्र स्थिरशैलीशालिनः सौजन्यनिधेर्दुर्धर्षस्य राज्ञो वर्णने प्रस्तुते, [2]इन्द्रा[3]द्भीता सपक्षा पर्वतस्त्री समुद्रे [4]लीनेत्यप्रकृतः समुद्रवृत्तान्तः प्रतीयते, [5]इति समासोक्तिः[5]

[6]साधारणधर्मनिबन्धना, यथा—

कलानिधिः शुचिः श्रीमान्कान्तिमाञ्जनरञ्जनः।
उदञ्चन्राघवः पादैर्दर्पं हरति मानिनाम् ॥१२९॥

पादैः। चरणप्रहारैरित्यर्थः। मानिनामभिमानवताम्

अत्र राज्ञो वर्णने प्रस्तुते सकलविशेषणानां चन्द्रसाधारण्यान्मानवतीनां मानियूनां च किरणैर्मानमोचनकर्तुश्चन्द्रस्य वृत्तान्तः प्रतीयते।

[7]सारूप्यनिबन्धना, यथा—

पुरा पूर्णस्तडागो यः पद्मिनीहंससङ्कुलः।
अधुना नीरसः सोऽयं कुशकाशबकैर्वृतः ॥१३०॥

अत्र तडागवृत्तान्ते प्रस्तुतेऽप्रस्तुतस्य कस्यचित्कुटुम्बिनो धनधान्यसमृद्धिशालिनः सम्प्रति प्राप्तदुर्दशस्य पुंसो वृत्तान्तः प्रतीयते।

---

129. Raghava who is कलानिधि (=1 a receptacle of 64 fine arts; 2 a store-house of 16 lunar digits), शुचि (=1 pure 2. bright), श्रीमत् (=1. endowed with wealth or dignity 2. possessing the twelfth lunar digit called Śrī) कान्तिमत् (=1 endowed with beauty or lustre; 2. possessing the tenth lunar digit called Kanti) and जनरञ्जन (=1. who gratifies his subjects; 2. who gives delight to people), dispels while rising, मानिनां दर्पं (= 1. proud people's haughtiness; 2. angry lovers' jealous pride) with his पाद's ( 1. feet, i.e. kicks; 2. rays).

130. The very tank that was formerly full (of water) and thronged with lotus plants (or clusters of lotuses) and swans has now become waterless and scattered over with Kuśa and Kaśa grass and with cranes.

---

१. 'दुर्धर्षे...तिष्ठतीत्यर्थः' इतिं भागो नास्ति आ पुस्तके. २. 'सौजन्यसिन्धोर्दुर्धर्षस्य'—आ. ३. 'इन्द्रभीता—आ. ४. 'लीनेत्यप्रस्तुतः'—आ. ५. इदं पदद्वयं नास्ति [illegible] पुस्तके. ६. साधारणधर्मनिबन्धनाया उदाहरणं तद्वृत्तिश्च नास्ति आ इ पुस्तकयोः. ७. सारूप्यनिबन्धनाया उदाहरणं तद्वृत्तिश्च नास्ति आ [illegible] पुस्तकयोः.

[1]अत्र [2]श्लेषाद्विशेषणसाम्यात्सारूप्याद्वा यदप्रस्तुतवृत्तान्तप्रत्यायनं, तत् प्रस्तुते विशेष्येऽप्रस्तुतवृत्तान्तसमारोपार्थं, सर्वथैव प्रस्तुतानन्वयिनः कविसंरम्भगोचरत्वायोगात् । अतः समासोक्तावप्रस्तुत[3]वृत्तान्तसमारोप-आरुताहेतुः न तु रूपक इवाप्रस्तुत[4]समारोपोऽप्यस्ति । 'मुखं चन्द्रः' इत्यादौ मुखादौ चन्द्रत्वाद्यारोपहेतुमुखचन्द्रादि[5]पदसमभिव्याहारवत्

'[6]राजन्नैन्द्रीं समालिङ्ग्य करैर्निम्नोन्नतान्स्पृशन् ।
अयं रँविः पतन्रक्तः पुनश्चुम्बति वारुणीम् ।'

इत्यादौ जारत्वाद्यारोपहेतोस्तद्वाचकपद[7]समभिव्याहार[8]भावात् । पूर्वोदाहृते

'वीरैर्भोग्यानेकगा भूरसाध्वी—'

इति रूपके त्वसाधारणवृत्तान्ताद्धरिणा वराहेण कृष्णेन चाभेदोऽवगम्यते । एवम्

'अवलोक्य राघव ! महौषधयः—'

इत्येकदेशविवर्त्तिरूपकेऽपि च 'कुसुमेक्षणैः' इतीक्षणान्वयानुरोधात्, 'चलत्किसलयाग्रकरैः' इत्यत्र करान्वयानुरोधाच्चौषधिषु निजकान्तदर्शनानन्दितनायिकात्वसमारोपोऽवगम्यते । न चात्र तथा गमकं किञ्चिदस्ति येन तदनुरोधादनुक्तमपि जारत्वादिकं समारोपणीयमिति दिक् । अत्र प्रतीयमानार्थस्य प्रस्तुतार्थेऽन्वयाद् गुणीभूतत्वेन ध्वनिरूपता ।

२५ परिकरः, २६ परिकराङ्कुरश्च

**साभिप्रायं पदं यत्र विशेषणविशेष्ययोः ।**
**अलङ्कारौ परिकरपरिकराङ्कुरौ मतौ ॥४१॥**

---

***Kārikā 41*** *When a significant word stands for an adjective or for a noun the figures Parikara and Parikarāṅkura are respectively said to occur.*

---

१ अत उत्तरं ग्रन्थभागः साधारण्येन त्रिष्वपि अ आ ▮ पुस्तकेषूपलभ्यते. २. 'श्लेषाद्विशेषणसाम्याद्वा'—आ, इ. ३. 'ºवप्रस्तुतव्यवहारसमारोपº'—आ. ४. 'इवाप्रस्तुतरूपसमारोपो'—आ. ५. 'ºदिशब्दसमभिº'—आ, इ. ६. पूर्वार्धो नास्ति आ इ पुस्तकयोः. ७. अत्र 'शुचिः' इति पाठः त्रिष्वपि ▬ आ ▮ पुस्तकेषु. ८. 'इत्यत्र सूर्ये जारत्वाद्यारोपº'—आ, इ. ९. 'ºसमभिव्याहारस्याभावात्'—आ, इ. १०. अ पुस्तकस्थस्य 'पूर्वोदाहृते...ध्वनिरूपता ।' इति भागस्य स्थाने 'अधिकं चान्यत्र द्रष्टव्यम् ।' इत्येव आ पुस्तके, 'इति दिक् । विस्तरभयाद्विरम्यते ।' इत्येव च इ पुस्तके.

यत्र काव्ये, विशेषणविशेष्ययोः। विशेषणे विशेष्ये चेत्यर्थः। साभिप्रायं पदम्। साभिप्रायाणि पदानीत्यर्थः। 'स्यात्' इति शेषः तत्र परिकरः परिकराङ्कुरश्चालङ्कारौ मतौ। 'अलङ्कारौ' इति द्विवचनाद्विशेषणे साभिप्रायपदप्रयोगे परिकरः, विशेष्ये तथात्वे ■ परिकराङ्कुरः।

परिकरः, यथा—

अन्यदेवान्परित्यज्य श्रीपतिर्माधवो मया।
वर्णितोऽनुपदं तेन युक्तमेव विधीयताम् ।१३१।

अन्यदेवानपरराज्ञोऽपरामरांश्च। परित्यज्योपेक्ष्य श्रियो राज्यलक्ष्म्या इन्दिरायाश्च पतिः माधवो माधवरायो नृपो विष्णुश्च मया ग्रन्थकर्त्रा अनुपदं बहुशः। वर्णितः। श्लेषेणोभयोरपि वर्णनात् तेन श्रीपतिना माधवेन प्रकृतराज्ञा विष्णुना च। युक्तमेव श्रीपतेः स्वस्य योग्यमेव विधीयताम्।

अत्र 'श्रीपतिः' इति विशेषणं श्रीदानसामर्थ्याभिप्रायगर्भम्।

यथा वा—

व्यासः समग्रो न मया निषेवितो नाराधितोऽप्यादिकविः स वाल्मिकिः।
नोपासिता नीलसरस्वतीत्यहं प्रभो ! कथं ते गुणवर्णने क्षमः ।।१३२।।

---

131. Leaving aside other देव (1. kings; 2 gods), I have at each stage glorified Madhava (1. Peşava Madhavarāo I; 2. God Viṣṇu) who is श्रीपति (1. lord of the royal majesty ■ treasury, 2. husband of Lakṣmī the Goddess of wealth). May he (or He) grant me what befits his (or His) dignity!

132 I have neither waited upon Vyāsa, the all-knowing, nor propitiated Valmiki the primeval poet, nor worshipped (the Deity) Nilasarasvatī Hence O lord, how ■ [ competent to describe thy virtues ?

---

१. 'च'—आ, इ. २. 'पदानि'—इ. ३. 'इत्यादिति शेषः' इति नास्ति ■ पुस्तके. ४. नास्ति ■ इ पुस्तकयोः. ५. 'साभिप्रायपदसत्त्वे'—आ. ६. 'ऽन्यामराश्च'—अ. ७. 'माधवरावो' इति ■ इ पुस्तकयोः; आ पुस्तके त्विद पदं नास्त्येव. ८. नास्ति अ पुस्तके. ९. 'प्रतिपद्य'—आ, इ. १० 'श्लेषेणेत्यभिप्रायः'—आ. ११. 'तेन विष्णुना राज्ञा च'—आ. १२. 'राघवेन'—इ. १३. '०सामर्थ्याभिप्रायम्'—अ. १४. १३४ तमं 'मातामहो हिमस्थान—' इत्याद्युदाहरणमतः पूर्वमेव शोधरूपेण आ पुस्तके पठितम्.

'[1]हे प्रभो !' इति प्रकृतराज्ञो विष्णोरपि च सम्बोधनम् ।

अत्र 'व्यासः समज्ञः' इत्यादीनि विशेषणानि प्रकृतराज्ञो विष्णोरपि ■पारगुणवर्णनसामर्थ्यसम्पादनोद्भावनमुखेन 'नाहं सर्वज्ञः, न वा काव्यापूर्वसृष्टिकर्ता, न वा नील[2]सरस्वतीदत्तवरः' इत्यभिप्रायगर्भाणि ।

यथा वा—

चतुर्मुखोऽहं न षडाननोऽपि नो
सहस्रवक्त्रोऽथ फणीश्वरोऽपि नो ।
गुण्याग्रणे ! माधव ! सार्वभौम ! ते
गु[3]णाकरं वक्तुमहं कथं क्षमः ॥१३३॥

अत्र 'नाहं चतुर्मुखः' इत्यादीनि विशेषणानि गुणकथन[4]सामर्थ्याभिप्रायगर्भाणि ।

यथा वा—

मा[5]तामहो हिमस्थानं स्वर्धुनी पितृमूर्धनि ।
स देवः पातु यस्याङ्के सिद्धिबुद्धी प्रिये स[6]ति ॥१३४॥

अत्र 'हिम—' 'स्वर्धुनी' पदे परितापशमनसामर्थ्याभिप्रायगर्भे । एवं 'सिद्धिबुद्धी' पदं तद्दानसामर्थ्याभिप्रायगर्भम् ।

---

133 I am neither the four-mouthed God (i e Brahmadeva) nor the six-mouthed God (i e Kārttikeya) nor the thousand-mouthed lord of serpents (i e. Śeṣa). O Emperor Madhava who rankest foremost among the meritorious how am I fit to relate thy store of good qualities?

134. May the god (i e. Gaṇeśa), whose maternal grand-father is ■■ abode of snow, whose father bears the celestial river (viz, the Ganges) on his head and whose mistresses, viz, Siddhi (Accomplishment) and Buddhi (Intelligence) sit on his auspicious lap, protect (thee)!

---

१. 'हे प्रभो हे माधवनृप हे विष्णो इत्यपि च'—इति आ पुस्तके. २. 'न वा सरस्वतीदत्तवरः'—अ". ३. 'इक्त. कथं वर्ण्यितुं गुण्यकरम्' इति पाठः चतुर्थपादस्य आ पुस्तके. ४. 'गुणकथनसामर्थ्या०'—अ, इ. ५. ■■■ पुस्तके त्विदमुदाहरणं १३२ तमाद् 'व्यासः समज्ञो न मया—' इत्याद्युदाहरणात्पूर्वमेव शोधरूपेण सवृत्तिकं पठितम्. ६. 'सती' —अ, आ, इ. ७. 'परितापसामर्थ्याभिप्राये'—अ. ८. 'सिद्धिबुद्धीपदे'—अ, इ. ९. '०भिप्रायगर्भे'—अ, इ. °

[illegible] सर्वत्र [1]श्रीपतेर्माधवस्य सकाशाच्छ्रीप्राप्तिरूपस्य, तदीयगुणवर्णनाशक्तत्वरूपस्य, [2]परितापशमनसामर्थ्यादिरूपस्य[3] च व्यङ्ग्यस्य वाच्य एवोपस्कारकत्वान्न ध्वनित्वव्यपदेशः अत एवास्यालङ्कारस्य वाच्यपरिकरत्वात् 'परिकरः' इति संज्ञाप्यन्वर्था

[4]यैस्तु केचित्—"निष्प्रयोजनविशेषणोपादानेऽपुष्टार्थत्वदोषस्योक्तत्वात्प्रयोजनवत्त्वं विशेषणस्य दोषाभावमात्रं, न कोऽप्यलङ्कारः; एकस्मिन्साभिप्रायानेकविशेषणोपादाने परं विच्छित्तिविशेषशालित्वात् 'परिकरः' इत्यलङ्कारमध्ये परिगणितः।" इति, तच्चिन्त्यम्। चिन्ताबीजं [illegible] श्लेषयमकादिष्वपुष्टार्थदोषाभावात् तत्र साभिप्रायस्यैकस्य विशेषणस्य विच्छित्तिविशेषशालितया परिकरत्वोपपत्तौ न किञ्चिद्बाधकम्। यथा—

सुतपसां तपसां फलमुत्सृज-
न्सुमनसां मनसामनुरञ्जनः।
वसुमतोऽसुमतोऽर्थविवृद्धिदः
सुविनयो विनयोऽपि च भूपते! ।१३५॥

हे भूपते! [5]सुष्ठु विनयः सुविनयः आर्जवं। विशिष्टो नयो विनयः सुशिक्षिता मतिरपि च सुतपसां [5]सुष्ठु तपांसि येषां तेषाम्। 'असुमतां प्राणिनाम्' इति वचनविपरिणामेनान्वयः। तत्सम्बन्धितपसां फलम् उत्सृजन् ददत् सुमनसामसुमतां सम्बन्धिमनसामनुरञ्जनः। वसुमतो धनशालिनः। असुमतः प्राणिनः। सम्पद्विवृद्धिकरः।

[illegible] 'सुतपसाम्' इति दानयोग्यत्वाभिप्रायं, 'सुमनसाम्' इति मनोरञ्जनयोग्यत्वाभिप्रायं, 'वसुमतः' इति सम्पद्विवृद्ध्याकाङ्क्षायोग्यत्वाभि-

---

185. O king! sincerity as well [illegible] modesty yields the fruit (usually) resulting from the austerities of persons practising austere penances, delights the minds of noble-minded persons and abundantly increases the riches of wealthy persons.

---

१. 'श्रीपतेर्माधवसकाशा०' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु. २. नास्ति [illegible] पुस्तके. ३. अत आरभ्य परिकराङ्कुरालङ्कारोदाहरण यावद्भागो नास्ति आ इ पुस्तकयोः; इ पुस्तके चिह्नविशेषेण खण्डितत्वं प्रदर्श्य 'अत्र शोधपत्रम्' इति लिखितं, किं तु शोधपत्र पुस्तके नैवोपलभ्यते. ४. 'सुष्ठुर्विनयः' इति प्रमादयुक्तः पाठ आधारभूते अ पुस्तके. ५. अत्रापि 'सुष्ठूनि तपांसि' इति प्रमादयुक्तः [illegible] आधारभूते ब पुस्तके.

प्रायम् अत्र यमकसत्त्वेनापुष्टार्थत्वदोषाभावात्परिकरत्वे न किञ्चिद्बाधकम् । न च 'अत्र पद्ये साभिप्रायाणि बहूनि पदानि, न त्वेकम्' इति भ्रमितव्यम् । फलदानाद्यनेकेषु प्रत्येकमेकैकमेव पदं साभिप्रायम् ।

यथा वा—

उदरसम्भृतिमात्रनिमित्ततः
कृपणयाचनचाटुविलज्जितः ।
अशरणः शरणं हि गतोऽस्म्यहं
सुकरुणाकरुणार्थदमीश्वरम् ॥१३६॥

सुकरुणया करुणेभ्योऽर्थमभीष्टार्थं ददातीति तथोक्तः, तम् । ईश्वरं शिवं प्रकृतराजानमपीत्यर्थः ।

एवं चात्रैकैकस्मिन्नेकैकस्य साभिप्रायविशेषणस्य विच्छित्तिविशेषशालितयालङ्कारत्वसिद्धावन्यत्रापि तस्यात्मलाभः केन वार्यताम् ? एकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः सर्वैरपि स्वीकृत एव । तद्वत्परिकरोऽपि । दीक्षितैरपि—

'अतियजेत निजां यदि देवता-
मुभयतश्च्यवते जुषतेऽप्यधम् ।
क्षितिभृतैव सदैवतका वयं
वनवतानवता किमहिद्रुहा ।'

इत्यादौ यमकसत्त्वेनापुष्टार्थत्वदोषानवतारात् 'वनवता' इत्येकेनापि साभिप्रायेण विशेषणेन परिकरं निर्दुष्टं व्यवस्थाप्य, "एवमन्यत्राप्येकस्मिन्साभिप्राये विशेषणे सत्यन्यत्र यमकादिसत्त्वे लब्धजन्मा परिकरो युक्त एव" इत्युक्तम् ।

अत्र दीक्षितोदाहृतपद्ये हि पुरुहूतपूजोद्युक्तान्नन्दादीन्प्रति भगवतः कृष्णस्य "गोवर्धनगिरिरेवास्माकं रक्षकत्वेन दैवतमिति स एव पूजनीयः, न खल्वरक्षकः पुरुहूतः" इत्येवंपरं 'वनवता' इति गोवर्धनगिरेर्विशेषणं

---

186. Verily I, who [illegible] sorely ashamed of flattering and imploring misers merely for the purpose of support of life and have become helpless, have sought shelter of ईश्वर (=1. God S'iva; 2. a lord viz., the Pesava) who grants desired objects to piteous people out of compassion

"काननवत्त्वान्निर्झरादिमत्त्वाच्च पुष्पमूलफलतृणजलादिभिरारण्यकानामस्माकमस्मद्धनानां गवां चायमेव रक्षकः" इत्यभिप्रायगर्भम्। गोवर्धनगिरेः पूज्यत्वे 'वनवता' इति साभिप्रायं, पुरुहूतस्य हेयत्वे 'अनवता' इति तथा; इत्येकस्मिन्पद्ये तथाविधपदद्वयसत्त्वेऽपि न क्षतिः, निमित्तभेदात्।

[1]परिकराङ्कुरः, यथा—

चतुर्भुजश्चतुर्विद्याः प्रयच्छतु चतुर्भुजैः।
[2]देवे . तेऽष्टभुजा [3]देवीः सिद्धीरष्टाष्टभिर्भुजैः। १३७॥

अत्र 'चतुर्भुजः' इति, 'अष्टभुजा' इति च विशेष्ये विद्याचतुष्टयाष्टमहासिद्धिदानशक्त्यभिप्रायगर्भे।

## २७. श्लेषः

नानार्थशब्दविन्यासः श्लेष इत्युच्यते बुधैः॥
वर्ण्यावर्ण्यतदुभयानेकनिष्ठस्त्रिधा मतः ॥४२॥

अनेकार्थशब्दविन्यासः श्लेषः ■ त्रिधा — वर्ण्यानेकविषयः, अवर्ण्यानेकविषयः, वर्ण्यावर्ण्योभयानेकविषयश्चेति।

तत्राद्यः, यथा—

उमापतिर्गिरिशयः पूतना मारदो विभुः।

---

137. May, O king, the Four handed ( God Viṣnu) award thee the four lores with his four hands and may the Eight-handed (= Goddess Durga) award thee eight divine faculties with her eight hands.

***Kārika 42.*** *A composition of words bearing various senses is termed Slesa by the learned. It is regarded to be of three kinds inasmuch as the various senses relate to the subject of description (viz., the Upameya), to something which is not the subject of description (viz., the Upamāna) or to both.*

138(*a*). "O king! may the all-pervading God (viz., S'iva), who is Uma's husband, sleeps on the mountain (Kailāsa) has sanctified people has killed Cupid, has tied up a serpent (on his body) and is (consequently) terrific (or ■ not terrific although he has tied up ■ serpent), stand for thy happiness!

---

१. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि ■ ■ ■ पुस्तकेषूपलभ्यते.
२. अत्र आ पुस्तकस्था टिप्पणी—'हे राजन्' इति. ३. 'देवी' —अ, आ, इ.

मुदे भवतु ते राजन् । बद्धनागो भयङ्करः ॥१३८॥

हे राजन् माधवनृप ! उमापतिः शिवः, ते तव, मुदे भवतु । कथंभूतः ? गिरिशयः कैलासशयः । पूता नरो यस्माद्, यद्वा पूताः पाविताः नरो येन, स तथोक्तः अन्तर्भावितण्यर्थत्वाश्रयणात्। मारं कामं द्यतीति मारदः । कामदहनः, इत्यर्थः । विभुः प्रभुः बद्धसर्पोऽत एव भयङ्करः । बद्धसर्पोऽप्यभयङ्करः, इति वा । 'उ' इति सम्बोधने । मापतिर्विष्णुस्ते मुदेऽस्तु । कथंभूतः ? गिरिर्गोवर्धनः शये हस्ते यस्येति तथोक्तः मारो मरणम् । भावे घञ् तं ददातीति मारदः । पूतनाया मारदो मरणप्रदः । बद्धनागः कालियनागबन्धनकर्ता । अभयङ्करो लोकानामभयप्रदः ।

आशिषि हरहर्योरुभयोरपि प्रकृतत्वेन प्रकृतानेकविषयः ।

यथा वा—

प्रभो ! नदीनतनया श्रीराघव . सुखामृता ।

---

Or (*b*) O, king may the all pervading God (viz., Viṣṇu), who is Lakṣmī's husband, holds the mountain (Govardhana) on his hand, has inflicted death on Putanā, has chained up (or brought under control) the serpent (Kaliya) and causes security (to people), stand for thy happiness !

189(*a*). O revered king Rāghava ! may Lakṣmī (lit. the daughter of the lord of rivers, i e, of the ocean), whose nectar-like speech is delightful and who pleases and sanctifies everybody, confer enormous prosperity on thee along with thy family !

Or, (*b*) O revered king Raghava may the river (viz Sūryadehā) that is a daughter of the Sun, is full of agreeable waters, is [redacted] object of devotion to all and purifies all, grant supreme happiness to thee along with thy family !

Or, (*c*). O revered king Raghava ! may thy beloved, who is daughter of a noble, whose nectar-like tongue is pleasant and who purifies

---

१. 'राघवनृप'—इ. २. नास्ति अ पुस्तके. ३. 'स तथोक्तः' इति पदद्वय नास्ति अ पुस्तके. ४. 'अन्तर्भावितण्यर्थोऽत्र वा'—आ. ५. आ पुस्तके अयं पदच्चयो नास्त्येव; 'बद्धसर्पोऽप्यभयद इति वा' इति पाठः इ पुस्तके. ६. 'मरणं मारः'—इति पाठः क्वित्क्वपि अ आ [redacted] पुस्तकेषु. ७. 'कालियनागशास्ता'—आ. ८. 'अभयङ्करोऽभयप्रदः'—आ; 'लोकानामभयङ्करोऽभयप्रदः'—इ ९. 'राज्ञ आशिषि'—अ १. १०. 'श्रीमाधव—आ.

पाविनी सकुटुम्बस्य प्रिया तेऽस्तु सुशर्मदा ॥१३९॥

हे प्रभो श्रीराघव ! नदीनाभिनः समुद्रः, तस्य तनया पुत्री लक्ष्मीः । सकुटुम्बस्य सपरिवारस्य ते । सुशर्मदा सुसुखप्रदा । अस्तु । कथंभूता ? सुखानि सुखकारीण्यमृतान्यध्यवसानाद्वचांसि यस्याः सा तथोक्ता प्रिया सर्वजनप्रीणनकर्त्री । पाविनी पापहन्त्री च । यद्वा । इनः सूर्यः, तस्य तनया । नदी सूर्यदेहा । ते सुशर्मदास्तु । कथंभूता ? – सुखामृता सुख-जला, सर्वप्रिया, पाविनी च । यद्वा । हे प्रभो श्रीराघवनृप ! दीनो रङ्कः, तस्य तनया पुत्री नेति नदीनतनया श्रीशालिगृहस्थपुत्री । कुलीनेति यावत् । सुखामृता निर्गीर्णाध्यवसानात्सुखैकार्यमृतप्रायवचना । पाविनी सदाचार-संरक्षणात्पापहन्त्री । ते तव प्रिया धर्मपत्नी । सकुटुम्बस्य ते शर्मदा गार्हस्थ्यसुखप्रदास्तु । यद्वा । हे प्रभो राघव रामचन्द्र ! ते प्रिया सीता । सकुटुम्बस्य । 'मे' इति शेषः । सुशर्मदास्तु । विशेषणान्युक्तार्थप्रायाणि[15]।

आशीर्वचने सकलानामपि प्रकृतत्वात्प्रकृतानेकविषयः ।

---

others (with her chastity), give excessive delight to thee along with thy family !

Or, (*d*). O venerated God Rāma ! may thy beloved (viz., Sītā), who is a daughter of a great personage, whose nectar-like tongue is charming and who sanctifies all, confer supreme happiness on me along with my family !

---

१. 'श्रीमाधव'—आ, इ. २. 'शर्मदास्तु' — आ; 'सुशर्मदा सुखदास्तु'—इ. ३. सर्वप्रीणनकर्त्री'—अ. ४. नास्ति आ ■ पुस्तकयोः. ५. नास्ति ■ पुस्तके. ६. 'अथ' —अ. ७. अत उत्तरं 'पुत्री' इत्यधिकं आ पुस्तके. ८. 'शर्मदा भवतु'—आ. ९. नास्ति ■ पुस्तके. १०. नास्ति आ ■ पुस्तकयोः. ११ नास्ति इ पुस्तके. १२. 'माधवनृप' —अ; 'श्रीमाधव'—आ. १३. 'निर्गीर्याध्यवसानात्' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु. १४. '०त्सुखकारिवचना'—अ. १५. यद्वा, हे प्रभो माधव विष्णो ! नदीन-तनया समुद्रपुत्री ते प्रिया लक्ष्मीः सकुटुम्बस्य, 'मे' इति शेषः, सुशर्मदा भवतु '—इति पाठः ■ पुस्तके. अयमर्थ आदौ वर्तमानोऽपि पश्चान्निष्कासितो दृश्यते इ पुस्तके. १६. नास्ति ■ पुस्तके. १७. 'सर्वस्यापि'—आ.

अप्रकृतानेकविषयः, यथा—

[1]राजन् ! कमलपत्राक्ष ! मुखं ते कान्तकोमलम् ।
अब्जेन तुल्यमाभाति मृगाङ्काकृतसंस्थितिना ॥१४०॥

[2]हे राजन् [3]माधव ! हे कमलपत्राक्ष ! ते [4]तव, कान्तं सत्, कोमलं मुखम् अब्जेन चन्द्रेण कमलेन च, तुल्यं सदृशम्, आभाति । कथंभूतेन ? मृगेणाङ्क उत्सङ्गेऽकृता सत्तिरासत्तिर्यस्येति तथोक्तः, तेन । [5]कलङ्कशून्येत्यर्थः । [6]अभूतोपमेयम् । कमलपक्षे—मृगाङ्केण चन्द्रेणाकृता सत्तिरासत्तिर्यस्येति तथोक्तं, तेन । चन्द्रासत्तौ [7] सङ्कुचितं भवेदिति तत्परिहृतम् ।

[8]अत्रोपमानभूतयोश्चन्द्रकमलयोरवर्ण्यत्वेनाप्रकृतानेकविषयः ।

[9]अथवा वा—

प्रज्वालयन्दिवा रात्रौ विद्विषां हृदयानि ते ।
श्रीमाधव ! प्रतापोऽयं चित्रभानुसमद्युतिः ॥१४१॥

सूर्यस्य रात्रावग्नेश्च दिवा [10] द्युतिमत्त्वमिति मिलितस्यैव प्रतापोपमाधूर्वहत्वम्, इति समतया श्लेषेणोभयोरप्युपादानम् ।

---

140 (*a*). O king endowed with eyes resembling lotus-petals ! thy lovely and delicate face shines like the moon that is not associated with the spot of antelope on her body

Or, (*b*). O king endowed with eyes resembling lotus-petals ! thy lovely and delicate face appears like a lotus that has no proximity to the antelope-marked moon

141 O respected Mādhava ! this प्रताप (=1 thy majesty or valour; 2. a feudatory chief named Pratāpa), intensely burning the hearts of thy enemies during day and night, bears a lustre similar to that of चित्रभानु (=1. the Sun' 2 fire)

---

१. 'छत्रं सदण्डं निर्दण्ड विरोधा राघवप्रभोः । अब्जेन तुल्यमाभाति परस्परविरागिणा ' इति पाठः अ पुस्तके, तत्र पद्ये वृत्तावपि च बहवो भ्रमा दृश्यन्ते. २. 'हे राजन्...ते' इति भागो नास्ति अ पुस्तके. ३. 'राघव'—इ. ४. नास्ति आ पुस्तके. ५. 'कलङ्कशून्यचन्द्रसदृशमित्यर्थः'—आ. ६. 'अभूतोपमेयम्' इति नास्ति आ इ पुस्तकयोः. ७. 'अत्र' इति पदं नास्ति आ इ पुस्तकयोः. ८. इ पुस्तके अत उत्तरमेकं पत्रं नष्टम्. ९. इदमुदाहरणं तद्वृत्तिश्च अ पुस्तके एव दृश्यते.

यथा वा —

उच्चैःपदसमारूढमनेकाश्वरथं विभो ! ।
प्रतापे नस्तु तं भोस्ते मित्रं विजयतेतराम् ॥१४२॥

भो विभो राजन् ! ते अतापे नः प्रतापप्रभुः, तं प्रसिद्धं, मित्रं सूर्यम्, अमित्रं शत्रुं च, विजयतेतराम्। कथंभूतौ तावुभौ ? उच्चैःपदसमारूढं, गगनगॉमिनमित्यर्थः। शत्रुपक्षे, उच्चैःपदं दुर्गभूतं पर्वतादि समारूढं येन स तथोक्तः, तम्। पुनः कथंभूतौ ? अनेके सप्त, अश्वा यत्र तादृशो रथो यस्य, तं तथोक्तम्। शत्रुपक्षे, अनेकं बहु, अश्वरथं यस्य, तं तथोक्तम्। एतादृशं बलवत्तरमपीत्यर्थः। अथ च, भो विभो ! ते मित्रं मित्रजातं, तव प्रतापेन हेतुना, लोकैः स्तुतं सद्, विजयतेतरां सर्वोत्कर्षेण वर्तते।

अत्राप्यप्रकृतानेकविषयः।

---

142 (*a*). O king ! when thy अताप (= valour or majesty) is present (by his side), our अताप ( a chief named Pratapa) indeed surpasses the Sun that has ascended the highest point (in the sky) and owns a chariot drawn by several (i. e. seven) horses

Or (*b*) O king ! when thy [redacted] (= majesty or valour) is present (to help him), our अताप ( a chief named Pratāpa) certainly vanquishes the enemy taking shelter in a lofty (*i e.* inaccessible) place and possessing numerous horses and chariots.

Or, (*c*). O king ! supreme is thy group of friends that, on account of thy majesty (or valour), has risen to a high status possesses numerous horses and chariots and is extolled by people

---

१. '०श्वरथप्रभुम् ।'—आ. २. 'श्रीराघव ! प्रतापस्ते...'—आ. ३. 'भो विभो ....विजयतेतराम्' इत्यस्य स्थाने 'हे श्रीराघवनृप ! ते प्रतापो मित्र सूर्यमिव शत्रुं विजयते-तराम् ।' इति पाठः आ पुस्तके. ४. 'गगनारूढमित्यर्थः'—आ. ५. 'शत्रुपक्षे, उच्चैःपदं ...सर्वोत्कर्षेण वर्तते' इत्यस्य स्थाने 'शत्रुपक्षे, उच्चैःपद दुर्गविशेषं प्रतिष्ठाविशेष वा समारूढमाश्रितं प्राप्त च। पुनः कथंभूतौ ! अनेकेऽश्वा यत्र तादृशो यो रथस्तस्य प्रभुं स्वामिन । प्रबलमपीति भावः। अथ च, ते प्रतापस्तेजस्विता मित्रं सखिवर्गं विजयतेतरां वर्धयतितराम्। "ज्वलितं न हिरण्यरेतस चयमारुन्दति भसनां जनः" इति न्यायादिति भावः।' इति पाठः आ पुस्तके. ६. इदं वाक्यं अ पुस्तक एव दृश्यते.

प्रकृताप्रकृतोभयानेकविषयः, यथा—

कलानिधिः शुचिः श्रीमान्कान्तिमाञ्जनरञ्जनः ।
राजा लब्धोदयः पादैर्दर्पं हरति मानिनाम् ॥१४३॥

राजा प्रकृतो नृपः । लब्धोदयः प्राप्तराज्यः सन् । पादैश्चरणैः । पादप्रहारैरित्यर्थः । मानिनामभिमानवतां, दर्पं हरति अथ च, उदयाचलमारूढो राजा चन्द्रः । 'सोमोऽस्माकम्—' इति श्रुतेः । पादैः किरणैः । मानिन्यश्च मानिनश्च मानिनः, तेषां । दर्पं मानं हरति । मानकृतविरहभाजां मानखण्डनं करोतीत्यर्थः ।

अत्र वर्णनीयस्य राज्ञः प्रस्तुतत्वमिति चन्द्रोऽप्रकृतः । अतः प्रकृताप्रकृतोभयानेकविषयः ।

अत्र प्राचीनाः प्रकृताप्रकृतोद हरणे 'कलानिधिः—' इत्यादौ प्रकरणवशात्प्रकृतार्थे झटिति बुद्धिस्थे, पश्चाद् 'राजा', 'कलानिधिः', इत्यादिश्लिष्टसाधारणधर्मवाचकानां पदानां परस्परसमभिव्याहारबलात्तद्विषयकशक्त्युन्मेषपूर्वकमप्रकृतार्थः स्फुरतीति शब्दशक्तिमूलं ध्वनिमामनन्ति ।

---

143 (*a*) This king, who is ■ receptacle of 64 fine arts, is pure, is endowed with majesty (or wealth) and beauty and keeps his subjects contented, dispels the haughtiness of arrogant people by means of his kicks (lit. feet), as ■■■ as he attains rise (i.e. power).

Or, (*b*) The moon, who is ■ store-house of 16 lunar digits, is bright, possesses S'rI and Kanti ( the twelfth and the tenth lunar digit respectively) and grat fies people, removes angry lovers' jealous pride by means of her rays ■■■■ as she reaches the Eastern Mountain.

---

१. 'राजा प्रकृतो...करोतीत्यर्थः ।' इत्यस्य स्थाने 'कलानां लावण्यचातुर्यादीनां निधिः, शुचिः शुद्धाचारः, श्रीः शोभा तच्छाली, कान्तिमाञ्जनरञ्जनकर्ता राजा नृपो माधवः, लब्धोदयः प्राप्तराज्यः सन्, पादैश्चरणैर्लक्षणया पादप्रहारैरित्यर्थः, मानिनामभिमानवता दर्पं हरति अथ च, लब्धोदय उदयाचलमारूढो राजा चन्द्रः, 'सोमोऽस्माकम्—' इति श्रुतेः, पादैः किरणैः, मानिन्यश्च मानिनश्चेत्येकशेषेण मानिनस्तेषां दर्पं मानं हरति । विरहिणां मानखण्डनं करोतीत्यर्थः '—इति पाठः आ पुस्तके. २. 'प्रकृतत्वमिति'—आ. ३. 'इति' —आ. ४. 'प्रकृताप्रकृतयोः श्लेषः'—आ. ५. 'पश्चाद्राजा तत्कृतवैरिदर्पहरणादिवाचिनो "राजा", "पाद"पदानां साधारणधर्मवाचकानां पदानां च परस्परसमभि०'—आ. ६. 'शब्दशक्तिमूलकं'—आ.

अत्र नव्याः—"[1]ध्वनित्वव्यपदेशः प्रकृताप्रकृताभिधानमूलकस्योपमादेरलङ्कारस्य व्यङ्ग्यत्वाभिप्रायगर्भः, न त्वप्रकृतार्थस्य व्यङ्ग्यत्वमूलकः। शक्तिप्रतिपाद्येऽप्रकृतार्थेऽभिधेयत्वावश्यकत्वे व्यक्तेरनपेक्षणात्। प्रकृतार्थेऽभिहिते पश्चादप्रकृतार्थः परिस्फुरतीति [illegible] व्यङ्ग्यत्वमेवेति चेद्, विलम्बेनाप्रकृतार्थस्फूर्तौ गूढश्लेषोऽस्तु, न तु व्यङ्ग्यत्वं; तस्य विलम्बेनाप्यभिधया स्फुरिते व्यक्त्यनपेक्षणात्

[2]'अयमतिजरठाः प्रकामगुर्वी-
रलघुविलम्बिपयोधरोपरुद्धाः।
सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्ति ॥'

इत्यत्र समासोक्तौ यथा प्राकरणिकेऽर्थे झटिति बुद्धिस्थे पश्चाद्विशेषणसाम्यादप्रकृतवृद्धवेश्यादिवृत्तान्तप्रतीतौ गूढश्लेषः समासोक्तेरङ्गतया सर्वैरङ्गीकृतः, तथात्रापि गूढश्लेषः, न तु ध्वनित्वबुद्धिः कार्या।" इत्यादि वदन्ति।

[3]अत्रेदं विभावनीयम्। प्राचीनमते प्रकृताप्रकृतश्लेषः क्वापि न स्यात्, सर्वत्रैवात्राप्रकृतार्थस्य व्यङ्ग्यत्वात्। नवीनमते च,

"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥"

इतिप्रकाशसूत्रविरोधः, प्रकरणस्यापि शक्तिनियमनकर्तृसंयोगादिषु पाठात्। शक्तेर्नियमनं च तैरन्यत्र स्मरणाननुकूलत्वम्। एवं च, प्रकृताप्रकृतश्लेषे प्रकरणेनापरशक्तेर्नियन्त्रितत्वाच्छब्दशक्तिमूलो ध्वनिरावश्यकः। तथापि प्रकृताप्रकृतश्लेषस्थले उभयोरर्थयोर्यदि तात्पर्यं, तदा श्लेषालङ्कारः। प्रकरणबलेन प्रकृतार्थे झटित्यवगते पश्चात्तात्पर्यबलाद्-प्रस्तुतोऽप्यर्थोऽभिधयैवावगम्यते, तात्पर्यार्थसत्त्वेन शक्तेरनियमनात्। न

---

१. अतः पूर्वं 'अत्र' इत्यधिकं आ पुस्तके. २. 'अयमतिजरठाः...इत्यादि वदन्ति' इत्यस्य स्थाने 'समासोक्तौ "राजन्नैन्द्रीं समालिङ्ग्य—" इत्यादौ यथा प्राकरणिकेऽर्थे झटिति बुद्धिस्थे पश्चाद्विशेषणसाम्यादप्रकृतार्थप्रतीतौ गूढश्लेषः समासोक्तिरङ्गतया सर्वैरङ्गीकृतस्तथात्रापि गूढश्लेषो न तु ध्वनित्वबुद्धिः कार्येत्यादि वदन्ति' इति आ पुस्तके. ३. 'अत्रेदं विभावनीयम् ...अप्रकृतत्वाद्विरम्यते' इति दीर्घो भागः [illegible] पुस्तक [illegible] वर्त्तते. तत्रापि चायं भागो लेखनप्रमादप्रचुरो वर्त्तते.

"मास्तु सति तात्पर्यार्थे शक्तेर्नियमनं, तथापि तादृशतात्पर्यग्राहकस्याभावात्कथमेतत् ?" इति वाच्यम् । तात्पर्यस्य फलबलकल्प्यत्वाद्यत्र प्रामाणिकानां श्लेषालङ्कारव्यवहारः, तत्रैवोभयत्र तात्पर्यस्योन्नेयत्वात् । यत्र चोभयत्र तात्पर्यं नास्ति प्रामाणिकानां च तथा व्यवहारस्तत्र शक्त्यन्तरस्य नियमनाद्व्यञ्जनयैवाप्रकृतार्थप्रतीतिरिति तत्र ध्वनित्वव्यपदेश इति युक्तः पन्थाः ।

संयोगादयः, यथा—

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥"

संयोगेनाभिधानियमनं 'सशङ्खचक्रो हरिः' इत्यत्र शङ्खादिसंयोगेन 'हरि'शब्दस्याच्युते । 'अशङ्खचक्रो हरिः' इत्यत्र विप्रयोगेण संयोगध्वंसरूपेण 'हरि'शब्दस्याच्युते, ध्वंसस्य प्रतियोगिपूर्वकत्वात् । 'रामलक्ष्मणौ' इत्यत्र 'राम'पदस्य लक्ष्मणसाहचर्येण दाशरथौ विरोधिता सहानवस्थानं वध्यघातकभावश्च 'छायातपौ' इत्यत्र 'छाया'पदस्यातपाभावे विरोधिता सहानवस्थानं; वध्यघातकभावश्च विरोधिनोः कयोश्चित्तत्त्वोपगमायाम् । 'रामार्जुनगतिस्तयोः' इत्यत्र रामार्जुनपदयोर्भार्गवकार्त्तवीर्ययोः । अर्थः प्रयोजनम् । 'स्थाणुं भज भवच्छिदे' इत्यत्र भवोच्छेदरूपप्रयोजनवशात् 'स्थाणु'शब्दस्य भवे प्रकरणं वक्तृश्रोतृबुद्धिस्थता यथा 'सर्वं जानाति देवः' इत्यत्र 'देव'शब्दस्य राजनि । संयोगातिरिक्तसम्बन्धेन परपक्षव्यावृत्तौ धर्मो लिङ्गम् । यथा 'कुपितो मकरध्वजः' इत्यत्र मकराकारध्वजसमुद्राभ्यां व्यावृत्तेन समवायसम्बन्धवता कोपेन 'मकरध्वज'शब्दस्य कामे नियतार्थकत्वम् । शब्दान्तरसामानाधिकरण्यं शब्दस्यान्यस्य संनिधिः यथा 'देवस्य त्रिपुरारातेः' इत्यत्र 'त्रिपुराराति'शब्दसामानाधिकरण्याद 'देव'शब्दस्य शम्भौ, अन्यस्य 'देव'शब्दार्थस्य राज्ञस्त्रिपुरारातित्वाभावात् । सामर्थ्यं कारणत्वम् । यथा 'मधुना मत्तः कोकिलः' इत्यत्र 'मधु'शब्दस्य वसन्ते, अन्यस्य कोकिलमादनासामर्थ्यात् । औचिती अर्हता । यथा 'पातु वो दयितामुखम्' इत्यत्रोत्कण्ठितमनोरथसाधनौचित्येन 'मुख'-

शब्दस्य साम्मुख्ये। यद्यप्यत्र सामर्थ्यं सम्भवत्येव, तथापि 'मधुना' इत्यत्र तृतीयया यथा कारणत्वबोधस्तथात्र तद्बोधाभावेनौचितीमात्रज्ञानादेव शक्तिनियमनमिति ततो विशेषः। देशो यथा 'भात्यत्र परमेश्वरः' इत्यत्र 'अत्र' इति राजधानीदेशात् 'परमेश्वर'शब्दस्य राजनि। कालो यथा 'चित्रभानुर्विभाति' इत्यत्र 'चित्रभानु'पदस्य दिवा दिवाकरे, रात्रौ वह्नौ। व्यक्तिः पुंस्त्वादिलिङ्गम्। यथा 'मित्रं भाति' इत्यत्र नपुंसकलिङ्गात् 'मित्र'शब्दस्य सुहृदि, 'मित्रो भाति' इत्यत्र पुंल्लिङ्गात्सूर्ये। स्वरः उदात्तादिः। वेदे बाहुल्येन ततोऽर्थप्रतीतिः। यथा 'इन्द्रशत्रो वर्धस्व' इत्यत्र 'इन्द्रशत्रो' इत्यस्यान्तोदात्तत्वे षष्ठीतत्पुरुषव्यक्ताविन्द्रस्य शातनकर्मत्वं लभ्यते। इति दिक्। अप्रकृतत्वाद्विरम्यते।

सा[2] पुनर्द्विविधः—सभङ्गश्लेषोऽभङ्गश्लेषश्च।

'उमापतिर्गिरिशयः—'

इत्यादौ सभ[3]ङ्गश्लेषः।

'राजन्! कमलपत्राक्ष!—'

इत्यादा[4]वभङ्गश्लेषः तत्र सभङ्गश्लेषः शब्दालङ्कारः, अभङ्गश्लेषस्त्वर्थालङ्कारः, इति केचित् उभावपि शब्दालङ्कारावित्यन्ये। उभावप्यर्थालङ्कारावित्यप्पयदीक्षिताः। [5]अधिकं चान्यत्र द्रष्टव्यम्।

## २८. अप्रस्तुतप्रशंसा

**अप्रस्तुताद्वर्ण्यमानात्प्रस्तुतावगतिर्यदि।**
**अप्रस्तुतप्रशंसा सा तदा ज्ञेया मनीषिभिः ॥४३॥**

वर्ण्यमानादप्रस्तुतात्प्र[6]स्तुतावगतिर्हि सम्बन्धे सति भवति। स च

---

*Kārika 43. If from a thing not in question being related the knowledge of the thing in question is derived, the figure is to be regarded by intelligent people as Aprastutapras'amsā.*

१. 'इत्यस्योद त्तत्वे' इति पाठ आधारभूते ■ पुस्तके. २. अत अ १८५ अन्यभागः साधारण्येन अ आ पुस्तकयोर्दृश्यते. इ पुस्तके तु नष्टे पत्रेऽस्य भागस्य विद्यमानत्वं सम्भावितं स्यात्. ३. 'राभङ्गः'— आ. ४. 'इत्यादावभङ्गः'—आ. 'अधिकं कुवलयानन्दे तत्राप्यवशिष्ट चित्रमीमांसायां च द्रष्टव्यम्' इति पाठः आ पुस्तके. ६.'०दप्रस्तुतात्प्रस्तुतास्प्रस्तुतावगतिर्हि'— अ.

सम्बन्धः क्वचित्सादृश्यं, क्वित्कार्यकारणभावः, क्वचित्सामान्यविशेषभावश्च तत्र सादृश्यरूपे सम्बन्धे सदृश एकस्मिन्वर्णिते तत्सदृशान्तरस्यावगम इत्येक एव भेदः। कार्यकारणभावसम्बन्धे कार्यात्कारणस्य, कारणाद्वा कार्यस्यावगतिरिति द्वौ भेदौ। सामान्यविशेषभावसम्बन्धे सामान्याद्विशेषस्य, विशेषाद्वा सामान्यस्यावगतिरिति द्वौ भेदौ। इत्येवं पञ्चप्रकारा सा। तदुक्तम्—

'कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा॥'

तत्र सादृश्यनिबन्धना, यथा—

बलिष्वेकः कृती राजन्! योऽन्यं कुम्भीन्द्रकुम्भतः।
विदारयति नो जातु क्षुधितोऽपि स्ववर्त्तने॥१४४॥

हे राजन्! बलशालिषु स एकः कृती पुरुषार्थी, क्षुधितोऽपि यः स्ववर्त्तने निजव्यवहारनिमित्तं, कुम्भीन्द्रकुम्भतो गजेन्द्रकुम्भतः, अन्यं मृगादिकं, जातु न विदारयति।

अत्राप्रस्तुतस्य सिंहस्य प्रशंसा प्रशंसनीयत्वेनाभिमते प्रस्तुते सिंहसदृशे क्षुद्रहननान्निवृत्ते बलवत्तरहननकर्तरि महावीरे सम्बोध्ये राज्ञि पर्यवस्यति।

यथा वा—

कुम्भीन्द्रकुम्भदलनक्षमे सिंहेऽनुधावति।
वृथैव मृगयूथस्य कूर्दनं गगनोपरि॥१४५॥

144. O king! among the mighty he alone is blessed who, though hungry, never tears asunder for his livelihood anything but the temple of a lordly elephant.

145. When the lion, competent to break asunder the temple of a lordly elephant (or, of Airāvata), is approaching from behind, it is indeed futile for the flock of deer to leap up to the sky.

१. अत उत्तरं 'अप्रस्तुतप्रशंसा' इत्यधिकं [illegible] पुस्तके. २. 'बलवत्स्वेकः' इति छन्दोभङ्गयुक्तः पाठ उभयोरपि अ [illegible] पुस्तकयोः. ३. 'हे राजन्...न विदारयति' इति वृत्तिः [illegible] पुस्तक एव दृश्यते. ४ 'अत्र सिंहस्याप्रस्तुतस्य प्रशंसा'—अ. ५. महावीरसम्बोध्ये'—अ. ६. 'सम्बोध्यराशि'—आ. ७. पश्चिमम् 'उदयत्येव कुटिलो—' इत्युदाहरण [illegible] पुस्तके शोधरूपेण [illegible] पूर्वमेव दत्तम्.

सङ्गीभूय स्थितान्[1] शत्रून्प्रति योद्धुं प्रचलितं प्रकृतराजानं प्रत्युक्ति[2]रियम्। 'हे राजन्' इति शेषः

अत्राप्रस्तुतस्य सिंहस्य प्रशंसा प्रशंसनीय[3]त्वेनाभिमते प्रस्तुते राज्ञि पर्यवस्यति। सिंहेनानुद्रुतस्य मृगयूथस्य यथा कूर्दनश्रमो निष्फलस्तथा त्वयानुद्रुतस्य शत्रुसङ्घस्य[4] प्रयासोऽपि निष्फलः, इति तात्पर्यार्थः।

यथा वा—

उदयन्नेव कुटिलो द्वेष्टा कमलिनीगणे।
परिणामे कलङ्कीति[5]पदमाप्नोति चन्द्रमाः ॥१४६॥

कञ्चिदुद्दिश्य सत्यवसरे राजानं प्रति कस्यचिदुक्तिरियम्। अप्रा[6]प्रस्तुतस्य चन्द्रस्य वृत्तान्तकीर्तनं दुर्नयचारिणि स्त्रीद्वेषकर्तर्युदयोन्मुखे तेजस्विस[7]म्भाविते परिणामे लब्धापयशसि कस्मिंश्चित्[8][9]पुंसि पर्यवस्यति।

अत्र 'कुटिल'शब्दश्लेषमूलया दुराचरणसम्बन्धाभावेऽपि तत्सम्बन्धरूपया, अथ च 'कमलिनी' इति स्त्रीलिङ्गनिर्देशमूलया स्त्रीद्वेषसम्बन्धाभावेऽपि तत्सम्बन्धरूपया चातिशयोक्तिभ्यामुत्थापिता या 'परिणामे कलङ्की' इतिशब्दश्लेषमूला परिणामेऽपयशोरूपकलङ्कित्वसम्बन्धाभावेऽपि तत्सम्बन्धरूपातिशयोक्तिः, तयोत्थापितेयमप्रस्तुतप्रशंसा। श्लेषमूलकरूपकोत्थापिता सेति वा 'प्रशंसा'[10][11]शब्दः स्तुतिनिन्दासाधारणकीर्तनमात्रपरः

---

146. The moon who as soon as risen, is कुटिल (= 1. curved; 2. crooked-natured) and hostile towards the host of lotus creepers, suffers, ■ ■ result of it, the title कलङ्किन् (=1 spotted; ■ stained).

---

१. 'स्थितेषु शत्रुषु योद्धुं'—आ. २. 'प्रति कस्यचित्कवेरुक्तिरियम्'— आ. ३. 'वर्णनीयत्वेना०'—आ. ४. 'शत्रुसङ्घस्यापि प्रयासो—' —आ. ५. ■■ पुस्तके त्विदमुदाहरणं पूर्वस्मात् 'कुम्भीन्द्रकुम्भदलन—' इत्युदाहरणात्प्रागेव शोधरूपेण दत्तम्. ६. 'स्त्रीद्वेषकर्तरि लोकनिन्दास्पदे उदयोन्मुखे'— आ. ७. 'तेजस्विपरिगणिते'— आ. ८. पदद्वयं नास्ति आ पुस्तके. ९. 'कस्मिंश्चित्' इति नास्ति आ पुस्तके. १० 'अत्र कुटिलशब्द.....सेति वा' इति भागः केवलं अ पुस्तके दृश्यते, ■■ पुस्तके नास्ति. ११. आ पुस्तकेऽस्य वाक्यस्य स्थाने 'अत्र प्रशंसापदं कीर्तनमात्रपरं, न तु स्तुतिपरम्।' इति वाक्यं वर्त्तते.

कार्यनिबन्धना, यथा—

राजंस्तव दोर्लता यदि तदा कल्पद्रुणा ह्रीयतां
खड्गश्चेत्तव नन्दकाङ्कगवता गर्वोऽतिसंत्यज्यताम् ।
तापश्चेत्तव सर्वदिक्षु विसृतः सूर्याटनं साम्प्रतं
कीर्तेश्चेत्तव मण्डलं सुविमलं युक्तः कलङ्को विधौ ॥१४७॥

राजन् ! तव प्रतापसत्त्वे निष्फलीभूतस्य सूर्यस्य लज्जया देशाटनं साम्प्रतं । युक्तमित्यर्थ ! सुतरां निर्मले तव कीर्तिमण्डले सति [2]निष्प्रयोजनीभूतस्य विधोरपयशोरूपः कलङ्कोऽपि युक्तः, इत्यर्थः शेषं सुगमम् ।

[3] कल्पद्रुमादिगतलज्जादिरूपाण्यौचित्येन कविसम्भाविताानि कार्याण्यभिहितानि । तानि न वस्तुकार्याणि, किं त्वभीष्टप्रदत्वादिविशिष्टदोर्लतादिज्ञानकार्याणि प्रस्तुतेषु कारणेषु दोर्लतादिषु कल्पद्रुमादिभ्योऽप्युत्कर्षमवगमयन्ति

कारणनिबन्धना, यथा—

श्रीमन्माधवरायाय ! ते करलतां स्रष्टुं विधाता पुरा
सामग्र्या घटनां [4] किल यत्नेन समादाय [5] ।

---

147. O king ! when the creeper in the form of thy hand is there, the celestial tree must blush up when thy sword is there, God (Viṣṇu) must give up his exultance on account of (his sword) Nandaka; when thy majesty, spread in all quarters, is there, the Sun's roaming is quite opportune and when the extremely bright (or stainless) circle of thy glory is there, the कलङ्क (=1. spot; stain) on the moon is but proper.

148. O revered Mādhavarāya ! it appears the Creator long ago collected (i. e. set aside) a stock of materials for fashioning thy creeper-like hand and, wise he was, he, taking (other) materials that sur-

---

१. उत्तरं 'सा' इत्यधिकं पुस्तके. २. अत आरभ्य ग्रन्थभागः पुस्तकेऽप्युपलभ्यते. ३. 'कलङ्को युक्तः'—आ, इ. ४. 'कविसम्भाव्यमानानि'—आ, इ. ५. इदं पदं नास्ति इ पुस्तकयोः. ६. 'दोर्लतादिषूत्कर्ष०'—आ, इ. ७. सवृत्तिकमिदमुदाहरणं केवलं पुस्तके वर्त्तते. आदौ सवृत्तिकं वर्तमानमपि पश्चादिष्टासितमिदं दृश्यते पुस्तके. ८. '०न्माधवराय'—आ.

पूर्वं कल्पतरुं ससर्ज तु तथा चिन्तामणिं कामदं
धेनुं कामदुघां पटुत्वविधये किं भूतवर्गं कृती ॥१४८॥

हे श्रीमन्माधवराय ! विधाता ब्रह्मा, पुरा तव करलतासृष्टेः पूर्वं, ते तव, करलतां दोर्लतां, स्रष्टुमग्रे तां निर्मातुं, तादृश्याः सामग्र्याः कारणकलापस्य, घटनां मेलनं, चकार । 'किल' इत्यलीके । स विधाता, यस्याः सामग्र्याः, शेषं घटनातोऽवशिष्टांशं, समादाय गृहीत्वा । किं ■ ? पटुत्वविधये । अभीष्टदातृत्वपरोपकृतिक्षमायास्ते करलताया निर्माणार्थं ■■■■ पाटवविधानाय, इत्यर्थः । पूर्वं त्वद्दोर्लतानिर्माणात्पूर्वं । 'तथा' चार्थे । कामदं चिन्तामणिं, तथा कामदुघां धेनुं, तथा भूतवर्गं भूतानि पृथिव्यादीनि, ससर्ज । 'किम्' इति वितर्के ।

अत्राप्रस्तुताया राज्ञो दोर्लतानिर्माणसामग्र्याः शेषतो विधातृकृतकल्पतरुप्रभृतिनिर्माणकथनेन तत्कार्यीभूतायां वर्णनीयत्वेन प्रस्तुतायां करलतायां कल्पतरुप्रभृतिभ्योऽप्युत्कर्षोऽवगम्यते ।

यथा वा—

[2]श्रीमन्नाघव ! ते प्रतापयशसोः सृष्टिं विधास्यन्विधिः
सामग्र्या घटनां चकार किल यच्छेषं समादाय किम् ।
सूर्यं वाडवमग्निमत्र कृतवान् गङ्गां विधुं क्षीरधिं
पश्चान्निर्मितवान्प्रतापयशसी किं वर्णयामो वयम् ॥१४९॥

---

vived and with ■ view, as it were, to gaining skill, first created the celestial tree, the gem Cintamani (=the philosopher's stone) fulfilling one's desires, the (celestial) cow yielding all desires and the group of elements.

149. O revered Raghava ! it appears the Creator, intending to perform the creation of thy majesty (or valour) and glory, collected (i.e. set aside) a stock of materials. Taking the remaining materials he (first) fashioned in this world the Sun the Submarine fire, the Ganges, the moon and the Milky Ocean and thereafter created (thy) majesty (or valour) and glory. How can we describe it ?

---

१. '०राव'—आ.  २. 'भूपालेश ! भवत्प्रतापयशसोः'—अ. .

[1]हे श्रीमन् राघवनृप ! ते प्रतापयशसोः सृष्टिं निर्मिणं, विधास्यन् करिष्यन्, विधिर्ब्रह्मा, तादृश्याः सामग्र्या घटनां चकार। 'किल' इत्यलीके यस्याः सामग्र्या, शेषं घटनातोऽवशिष्टांशं, समादाय गृहीत्वा। किं नु ? अत्र जगति, सूर्यं, वाडवं वडवानलम्, अग्निं वह्निं, गङ्गां, विधुं चन्द्रं, क्षीरेधिं क्षीरसागरं च, कृतवान् निर्मितवान्। यद्यात्, सामग्रीशेषात्सूर्यादिनिर्माणेन सामग्रीं परीक्ष्येत्यर्थः। प्रतापयशसी[2] निर्मितवान्। यं यं किं वर्णयामः, प्रतापयशसोः सामग्रीं तज्जन्यप्रतापयशसी च किं वर्णयामः ? वर्णयितुमशक्ता वयमित्यर्थः[3]।

अत्राप्रस्तुतायाँ राज्ञीः प्रतापयशसोः सामग्र्याः शेषतो विधिकृतसूर्यादिनिर्माणकथनेन कारणैकलापरूपतादृशसामग्रीकार्यीभूतयोर्वर्णनीयत्वेन प्रस्तुतयोः प्रतापयशसोः सूर्यादिभ्यो गङ्गादिभ्यश्चोत्कर्षोऽवगम्यते[13]।

यथा वा—

भूतवर्गं विधायादौ यत्सामग्र्यवशेषतः।
तत्सामग्र्या नु विदधे रायं नारायणं विधिः ॥१५०॥

अत्राप्रस्तुताया यस्याः सामग्र्याः शेषतो भूतवर्गनिर्माणकथनात्तत्सामग्रीनिर्मिते वर्णनीयत्वेन प्रस्तुते नारायणरायनृपे भूतवर्गतोऽप्यधिकापरोपकृतिशैल्यवगम्यते।

---

150 The Creator as it were, created Narayana Raya out of the special stock of materials after he had previously created the group of elements from the remaining materials.

---

१. 'हे भूपालेश भवत्प्रतापयशसोः'—अ. २. नास्ति आ पुस्तके. ३. अत उत्तर 'मेलनं सम्पादनमिति यावत्' इत्यधिकं आ पुस्तके. ४. नास्ति इ पुस्तके. ५. 'वाडवाग्निमग्नि'—अ. ६ नास्ति आ पुस्तके. ७. 'पश्चात्सूर्यादिनिर्माणानन्तरं कौशलं सम्पाद्येति भावः' इति वाक्यपाठः आ पुस्तके. ८. अत उत्तरं '"ते" इत्यस्यान्वयः' इत्यधिकं आ पुस्तके. ९. 'वयं किं...वयमित्यर्थः' इत्यस्य स्थाने 'ते प्रतापयशसी वयं किं वर्णयामः' इत्येव आ पुस्तके. १०. 'अत्राप्रस्तुतीभूतायाः'—आ. ११. 'नास्ति आ पुस्तके. १२. 'तत्कार्यीभूतयो०'—आ; 'तादृशसामग्रीकार्यीभूतयो०'—इ. १३. अत उत्तरं 'उत्प्रेक्षानुप्राणितेयमप्रस्तुतप्रशंसा' इत्यधिकं आ इ पुस्तकयोः. १४. सवृत्तिकमिदमुदाहरणं आ पुस्तक एव वर्त्तमानत्वेन दृश्यते, प्राग्वर्त्तमानमपि पश्चान्निष्कासितं च इ पुस्तके. १५. 'रावं'—आ. १६. 'नारायणरावनृपे'—आ.

[1]एतास्तिस्रोऽप्यप्रस्तुतप्रशंसा उत्प्रेक्षासङ्कीर्णाः ।

सामान्यनिबन्धना, यथा—

अन्यायाद्विनिवृत्ता ये गच्छन्तो न्यायवर्त्मनि ।
उद्घाट्य गोपुरं सम्यक्स्वपन्त्यन्तःपुरे हि ते ॥१५१॥

'त्वया न्याय्यं वर्त्मानुसर्तव्यम्' इति विशिष्य राजानं प्रति वक्तव्ये गौरवसंरक्षणाय केनचित्सामान्यतोऽभिहितम्, इति सामान्याद्विशेषार्थावगतिः ।

विशेषनिबन्धना, यथा—

उदञ्चनेव सविता निहन्ति रोधक तमः ।
अतस्तेजस्विनामग्रे गण्यः सर्वनमस्कृतः ॥१५२॥

[2]'उदयोन्मुखैस्तेजस्विभिः [3]प्रतिकूलाः शासनीयाः' इति सामान्यतो वक्तव्ये नीतिकोविदेन केनचिद्राजानं प्रति विशेषार्थोऽभिहितः, इति विशेषात्सामान्यार्थावगतिः ।

[4]एवमुदाहरणान्तराणि द्रष्टव्यानि । यथा—

[5]श्रीमन्माधव ! कृष्णजन्मनि पुरा भूमण्डलप्रक्रम-
श्रान्ता कीर्तिरियं तवातिविमला वारां निधौ मज्जिता ।

---

151. They (i.e. the kings), who have desisted from injustice and are going by the track of justice, indeed enjoy a sound sleep in their harems, leaving their town-gates (or principal gates) wide open.

152. The Sun dispels the obstructive darkness no sooner than he rises. Hence he, adored by all, is to be counted at the top of the brilliant.

153. O revered Mādhava ! this extremely bright (or pure) कीर्ति (= glory) of thine, fatigued due to her circumambulation round the globe of earth long ago during thy existence as Kṛṣṇa, had bathed in

---

१. इदं वचनमपि केवलं आ पुस्तके दृश्यते. २. 'लब्धाधिकारैस्तेजस्विभिः'—आ, इ. ३. अतः पूर्वं 'प्रथमतः' इत्यधिकं आ पुस्तके. ४. अस्य स्थाने 'अप्रस्तुतप्रशंसाया एवैव सम्बन्धा इति न नियमः, अन्येष्वपि सम्बन्धेषु तद्दर्शनात् । उदाहरणानि ग्रन्थान्तरे द्रष्टव्यानि । दिङ्मात्रमिह प्रदर्श्यते ।' इति आ पुस्तके, 'उदाहरणानि ग्रन्थान्तरे द्रष्टव्यानि ।' इत्येव इ पुस्तके. ५. 'राजन्माधव'—अ.

निधौताङ्गगलत्परागपटलं तस्यास्तु जानीमहे
चन्द्रं मन्दरमन्थनैः किल घनीभूतं भवन्तं हरिम् ॥१५३॥

'नाविष्णुः पृथिवीपतिः' इति शास्त्राद्विष्णोः प्रकृतराज्ञश्चाभेद-मङ्गीकृत्येदं पद्यम्। 'श्रीमन्माधव' इति प्रकृतराज्ञः सम्बोधनम्। पुरा कृष्णजन्मनि पृथिवीमण्डलभ्रमणश्रान्ता तवेयं जगत्प्रसिद्धा कीर्तिः समुद्रे स्नाता, इत्यर्थः। तु पुनः। तस्याः कीर्तेः, निधौतानि यान्यङ्गानि तेभ्यो विगलत् समुद्रमध्ये निपतच्च तत्परागपटलं चेति तथोक्तं तादृशाङ्गनिपत-द्रेणुपुञ्जं, चन्द्रं जानीमहे। चन्द्ररूपता कथं सम्पन्नेत्यतः परागपटलस्य विशेषणमाह — मन्दराचलेन समुद्रमथनदण्डभूतेन मन्थनानि, तैर्घनी-भूतं। नवनीतवदित्यभिप्रायः। भवन्तं सम्बोध्यं राजानं, हरिं विष्णुं जानीमहे

अत्र ह्यप्रस्तुते चन्द्रे विष्णुरूपिणः प्रकृतराज्ञः समुद्रमज्जननिधौ-ताया कीर्तेरङ्गविगलन्मन्थनघनीभूतपरागपुञ्जत्वेनोत्प्रेक्षणं प्रक्षालनशुद्धायाः कीर्तेः स्वाङ्गीवर्गलत्परागरूपिणश्चन्द्ररूपात्कार्यादुत्कर्षं प्रत्याययति। अत्रा-

---

the ocean We regard the ▬▬ of fragrant powder trickling from her thoroughly washed limbs to have condensed as the moon due to the churnings of Mandara, as it were. Indeed we regard you to be God Visnu

---

१. 'ोकृत्यैतत्पद्यम्'—आ. २. 'राजन्नाधवेति'—अ; 'हे श्रीमन्माधवेति'—आ; 'श्रीमन्नाधवेति'—इ. ३. 'राज्ञः'—आ. ४. 'पृथिवीभ्रमणश्रान्ता'—आ. ५. पदं नास्ति ▬ पुस्तके. ६. पदद्वयं नास्ति आ पुस्तके. ७. 'निधौताङ्गेभ्यो विगलत्समुद्र-जलमध्ये निपतत्परागपटलं रेणुपटलं तच्चन्द्रं जानीमहे'—आ; 'निधौताङ्गेभ्यो विगल-त्समुद्रजले निपतत्परागपटलं रेणुपुञ्जं चन्द्रं जानीमहे'—इ. ८. 'सम्पन्नेत्यत आह'—आ. ९. 'मथनदण्डीभूतेन'—आ; 'मथनदण्डीभूतेन'—इ. १०. 'मथनानि' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु. ११. पदद्वयं नास्ति आ पुस्तके. १२. नास्ति आ ▬ पुस्तकयोः. १३. ▬ "जानीमहे" इतीहाप्यन्वेति'—आ. १४. 'ोधनीभूतरेणुपुञ्ज०'—आ, इ. १५. 'स्वाङ्गगल-द्रेणुपुञ्जरूपिणश्चन्द्रादुत्कर्षं'—आ; 'स्वाङ्गगलत्परागरूपिण०'—इ. १६. अत्र ▬ पुस्त-कस्था टिप्पणी— 'क्षालितं वस्तु प्रक्षालनजलमध्यगतस्यापेक्षया निर्मलं भवतीति लोकरीतिः.' १७. अस्य वाक्यस्य स्थाने 'न हि कीर्तेर्जलमध्यपतिततदङ्गरेणुपुञ्जस्य च कार्यकारणभावादिः सम्बन्धोऽस्ति, कीर्तेर्ज्ञानां तच्छुरेणुपटलस्य च कवितर्कितत्वेन गगनकुसुमायमानत्वात्। अतः कवितर्किताश्रयाश्रयिभावादिसम्बन्धेऽप्यप्रस्तुतप्रशंसावगन्तव्या।' इति भागः ▬ पुस्तके.

प्रस्तुतप्रशंसायां वाच्यार्थस्याप्रस्तुतत्वाद्वर्णनीयत्वेनाभिधायामपर्यवसितायां ततः प्रस्तुतार्थस्याभिव्यक्तिरलङ्कृतिरूपैव, ■ ध्वनिः ।

[1]किंच, अत्र पञ्चैव सम्बन्धा इति न नियमः; सम्बन्धान्तरेऽप्यप्रस्तुतप्रशंसाया दर्शनात् ।

यथा—

करत्वं ? दाशरथेः कृते किमधिकं प्राणान्प्रहातुं परान्
ये दक्षाः समरेषु वानरभटाः शैलोन्नताः कोटिशः ,
तेषामङ्गणभूमिमार्जनकृतामन्तर्गतोऽहं किया-
नित्थं पङ्क्तिरुशिरःपुरो गदितवान्पायात्स वातात्मजः ॥१५४॥

अत्र इष्टपुरुषार्थस्य हनुमतः 'उक्तविशेषणविशिष्टवानरभटाङ्गणमार्जनकृत्स्वन्तर्भूतोऽहं कियान् ?" इत्युक्तावप्रस्तुतवानरभटोत्कर्षकथनं प्रशंसनीयत्वेन प्रस्तुतस्य दाशरथेरत्युत्कर्षं प्रत्याययति । न ह्यत्र वानरभटानां दाशरथेश्च जन्यजनकभावादिः सम्बन्धोऽस्तीति प्रकृते सेव्यसेवकभावसम्बन्धेऽप्यप्रस्तुतप्रशंसा, इति मन्तव्यम् ।

यथा वा—

राजन् ! धान्यपरं यशस्तव महत्संखण्डयन्नित ध्रुवं
हिम्नायों मुशलेन शैत्यगिरिणा ब्रह्माण्डगर्ते भृशम् ।

---

154. 'Who art thou ?'—

—'Of what account am I who ■ included among the persons sweeping the court-yards of the armies of mountain-high warrior-monkeys who, to say nothing more ■ prepared to sacrifice (even) their supreme lives in battles for the sake of Rāma (lit. Das'aratha's son).''— May Hanuman (lit. the Wind's son) who spoke thus before Rāvaṇa (lit. one endowed with ■ row of heads) protect (thee) !

155. O king ! the (celestial) ■ of the quarters, as it were, profusely crush the supreme grain in the form of thy great glory with the pestle in the form of the Snow-mountain (i. e. Himālaya) in the hollow(i.e mortar)in the form of the universe (lit the Creator's primeval

---

१. अत आरभ्य प्रस्तुताङ्कुरालङ्कारव्याख्या यावद्भागः ■ पुस्तक एवोपलभ्यते.

दिङ्नागैः किल कर्णशूर्पमरुता सम्मार्जयन्तीव त-
ज्जाने तत्तुषचूर्णमेतदखिलं चन्द्रांशुजालं लसत् ॥१५५॥

अत्र चन्द्रांशुजाले प्रकृतराज्ञो यशोरूपधान्यविशेषतुषचूर्णत्वेनोत्प्रेक्षणं राज्ञो यशसस्तत्सारांशरूपं कमप्युत्कर्षं प्रत्याययति। न ह्यत्र यशोरूपधान्यविशेषतत्तुषचूर्णयोः कार्यकारणभावादिः सम्बन्धोऽस्तीति सहोत्पत्तिकत्वलक्षणसम्बन्धेऽप्यत्राप्रस्तुतप्रशंसाभ्युपेया। पूर्वपद्ये शुद्धा, अत्र तूत्प्रेक्षाद्यलङ्कारान्तरोत्थापिता, इति विशेषः।

## २९. प्रस्तुताङ्कुरः

[1]प्रस्तुतार्थे निगदिते [2]प्रस्तुतं द्योत्यते यदि।
तदालङ्कारनिपुणा वदन्ति प्रस्तुताङ्कुरम् ॥४४॥

[3]यदि प्रस्तुतार्थे वर्णितेऽभिमतमन्यत्प्रस्तुतं द्योत्यते, तदालङ्कारकोविदाः प्रस्तुताङ्कुरमलङ्कारं वदन्ति।

यथा—

वर्षतापि समं देव! कृतमेकं समञ्जसम्।
स्वातौ यदद्य भवता मुक्ता आपस्तु शुक्तिषु ॥१५६॥

स्वातिनक्षत्रदिने मेघे वर्षति सति तत्रैव दानकाले[4] प्राप्ते पात्रविशेषे

---

egg) and have it cleaned, as it were, by the guardian-elephants of the quarters with the fanning of the winnowing-baskets in the form of their ears. The powder of its chaff has as it were become the entire brilliant mass of lunar rays

*Kārikā 44. If, a thing in question being related, another thing in question is thrown light upon, persons versed in Poetics declare the figure Prastutāṅkura.*

156. O cloud! uniformly as you have been raining, you have done a thing quite reasonable inasmuch as you have poured water into pearl-oysters today while the moon coincides with the star Svāti (i. e. *Arcturus*).

---

1. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि आ इ पुस्तकेषु वर्त्तते. २. 'द्योत्यते प्रस्तुतं यदि'—आ. ३. इदं पदं नास्ति आ पुस्तके. ४. 'दानकालेऽपि'—आ.

दानं कुर्वाणं राजानमुद्दिश्य [1]मेघं प्रति कस्यचिदुक्तिरियम् । हे देव मेघ ! [3]समं सर्वत्र समानं, वर्षता जलं मुञ्चतापि, भवतैकं समीचीनं कृतम् । एकं किम् ? यत्, अद्य स्वातिनक्षत्रे । तु पुनः । शुक्तिषु, आपो [5]जलानि । मुक्ता उज्झिताः । 'मुक्ता'पदश्लेषेण 'शुक्तिषु [6]मुक्ता आपो मुक्ताफलानि भवन्ति' इत्यर्थोऽपि [8]व्यक्तीकृतः ।

अत्र प्रस्तुतेन वाच्यार्थेन मेघप्रशंसारूपेण पुण्यकाले प्राप्ते सुपात्रे दानं कुर्वतः प्रस्तुतस्य राज्ञः प्रशंसा द्योत्यते ।

यथा वा—

रसं पिबन्तो जगतोऽपि नीरसाः
संतापयन्तः सुमनःप्रमाथिनः ।
तिग्मद्युतेरंशुचया हिमद्युते !
त्वया जगत्तापहृतामृतीकृताः ॥१५७॥

दुष्टनिग्रहं कृत्वा जगत्संतापहारिणः प्रकर्तुराज्ञः प्रशंसां द्योतयन्कश्चनोदितं चन्द्रं प्रस्तुतीकृत्य वदति— । हे हिमद्युते चन्द्र ! जगत्तापहृता त्वया, तिग्मद्युतेः सूर्यस्य, अंशुसमूहा अमृतीकृता अमृतशीतलाः कृताः । प्रतिहतैः सूर्यकिरणा एव चन्द्रकिरणा अमृतमयेन चन्द्रेण सङ्गत्यामृतमया भवन्तीत्यर्थस्य शास्त्रप्रसिद्धत्वात् । कीदृशा अंशुचयाः ?— [11]जगतो [13]रसं पिबन्तोऽपि नीरसा रूक्षाः । रसशोषणकर्तृभिरार्द्रैर्भवितव्यमित्यर्थोऽपिना

---

157. O moon (lit. O cold-rayed one) the multitudes of the Sun's (lit. the hot-rayed's) rays, which, though absorbing the world's water, are arid, scorch the universe and [illegible] flowers to wither have been rendered nectarean (or lifeless) by thee who dispellest the world's agonies.

---

१. अतः पूर्वं 'प्रस्तुतम्' इत्यधिकं आ पुस्तके. २. 'मेघराजम्'—अ. ३. नास्ति अ इ पुस्तकयोः. ४. नास्ति [illegible] पुस्तके. ५. 'उज्झिता'—अ. ६. 'स्पष्टीकृतः'—आ. [illegible]. 'लोकसन्तापहारिणः'—आ. ८. 'राज्ञ'—आ, इ. ९. 'अमृतवच्छैत्यं नीताः' —आ. १०. 'प्रतिहताः सूर्यकिरणा एव चन्द्रकिरणा इति शास्त्र दिति भावः' इति संक्षिप्तं वाक्यं आ पुस्तके. ११. पद नास्ति आ पुस्तके. १२. अत उत्तरं 'सकाशात्' इत्यधिकं इ पुस्तके. १३. अत उत्तरं 'जलम्' इत्यधिकं आ पुस्तके.

द्योत्यते। जगत्संतापकारिणो जगत्संतापकर्तारः। पुष्पग्लानिकराः।

अत्र प्रस्तुतेन चन्द्रप्रशंसनेन कस्यचित्क्रूरप्रभोः सम्बन्धिनो लोकधनापहारिणो जगत्संतापकारिणः सुजनप्रमाथिनः सेवकान्निजमहिम्ना सौम्यान्विधाय लोकसंतापहर्तुः प्रकृतराज्ञो माहात्म्यं द्योत्यते, इति प्रस्तुताङ्कुरोऽलङ्कारः।

द्योत्यस्याप्रस्तुतत्वे त्वियं समासोक्तिः स्यात्। चन्द्रवर्णने प्रस्तुते श्लेषेण लक्षणया चाप्रस्तुतार्थपरैः पदैरप्रस्तुतस्य कस्यचित्सौम्यप्रभोर्वृत्तान्तस्य परिस्फुरणात्। तथा हि, हे हिमद्युते सौम्यस्वभाव! जगत्संतापहर्त्रा त्वया, रसं सारभूतं धनादि, पिबन्तोऽपि हरन्तोऽपि, नीरसा निर्धनाः, लोकसंतापकारिणः सुजनानामुन्मूलनकर्तारो घर्मद्युतेरंशुचयाः कस्यचित्क्रूरपुंसोऽनुचराः, अमृतीकृता निजप्रतापेन शासनेन वा सौम्यतां नीताः, यद्वा मृतीकृताः मृतप्रायाः कृताः, इत्यर्थः परिस्फुरति।

यथा वा—

मित्रेण मित्रवर्गेण बहुलेन विरोधिनः।
पञ्चदशादिनं वृद्धिश्चन्द्र! ते नियतः क्षयः॥१५८।

बहुभिर्मित्रैस्तद्वर्गेण च सह विरोधं कुर्वाणं कञ्चिदन्तरङ्गपुरुषं

---

158 O moon! (only) for fifteen days is the increase and (thereafter) certain is the decrease of thee that art inimical to मित्र (=1. the Sun; 2. a friend), to his group of favourites and to the dark fortnight (or to his large group of favourites).

---

१. 'सन्तापकारिणः'—आ, इ. २. नास्ति आ पुस्तके; 'जगत्परितापकर्तारः' इति अ पुस्तके. ३. नास्ति आ पुस्तके. ४. 'जगन्निःसारं कुर्वाणान्सन्तापकारिणः'—आ. ५. 'प्रस्तुताङ्कुरः'—अ. ६ राजोऽप्रस्तुतत्वे'—आ. ७. 'समासोक्तिरपि'—अ, इ. ८. 'चन्द्रवर्णने...परिस्फुरति' इति ग्रन्थभाग आदौ सङ्गत्यधुना निष्कासितो दृश्यते इ पुस्तके. ९. 'क्षुठन्तोऽपि—आ. १०. 'निःसारा दरिद्रा इति यावत्, पापादिति भावः'—आ. ११. अतः पूर्वं 'सुमनसाम्' इत्यधिकं आ पुस्तके. १२. 'कस्यचित्क्रूरस्यानुचराः'—आ. १३. नास्ति अ पुस्तके. १४. 'सौम्यस्वभावतां'—आ. १५. 'मित्रेषु मित्रवर्गे बहुषु विरोधं...'—आ; 'बहुषु मित्रेषु मित्रवर्गेषु अ विरोधं...'—इ. १६. 'कञ्चिदन्तरङ्गं प्रति भयं द्योतयन्स्वयं...'—आ.

प्रत्यनिष्टं द्योतयन्स्वेयं राजा चन्द्रं प्रस्तुतीकृत्याह— हे चन्द्र ! मित्रेण सूर्येण, मित्रवर्गेण सूर्यवर्गेण, सूर्यमित्रीभूतकमलादिनेत्यर्थः । बहुलेन कृष्णपक्षेण सह विरोधिनस्ते । पञ्चदशदिनं, तदभिव्याप्येत्यर्थः, वृद्धिः । तदुत्तरं क्षयो नियतो[11] ध्रुवः[12] ।

अत्र[13] बहुलमित्रतद्वर्गविरोधिनश्चन्द्रस्यावश्यं भावी क्षय इति वाच्यार्थेन, 'मित्र''बहुल'शब्दश्लेषेण, पञ्च वा दश वा दिनानि वृद्धिरित्यर्थस्यापि भङ्ग्या सूचनेन च, कश्चिन्मित्रादिविरोधिनं प्रति "इष्टमित्रैर्बहुभिर्विरोधिनस्तेऽल्पैरेव दिवसैर्नियमेन क्षयो भविता" इत्यनिष्टं द्योत्यते, इति प्रस्तुताङ्कुरः । पुरुषस्याप्रस्तुतत्वे तु श्लेषनिबन्धना समासोक्तिः ।

अत्र प्रस्तुताङ्कुर उक्तोदाहरणेषु सर्वत्र वाच्यार्थस्य प्रस्तुतत्वेन तत्राभिधायां पर्यवसितायामर्थसौन्दर्यमहिम्नाभिमतार्थाभिव्यक्तिर्ध्वनिरूपैव । लोचनकारोऽप्यत्रान्यापदेशध्वनिं मेने[14] । अलङ्कारमध्ये लिखनपरिगणने प्राचीनसम्प्रदायानुरोधेन । यत्र त्वभिव्यक्तोऽप्यर्थः कविना स्वोक्त्याधिक्षिप्यते, तत्रालङ्काररूप एव ध्वनिरिति सर्वसम्मतम् यथा—

चित्रं कनकलतेयं धत्ते बिम्बं शुकेन संदष्टम् ।
स्वाङ्गोदितमिति काचिच्छ्रुत्वौष्ठं पाणिना पिदधे ॥१५९॥

---

159. "Oh wonder ! This golden creeper bears the (ruddy) Bimba fruit pierced by a parrot"—on hearing this utterance referring to her own body a certain lady covered her lip with her palm.

---

१. 'स्वयम्' इति पदं नास्ति ब पुस्तके. २. अत उत्तरं 'सख्या च' इत्यधिकं आ पुस्तके. ३. नास्ति आ पुस्तके. ४. नास्ति ब पुस्तके. ५. 'कमलादिना सखिवर्गेण च'—आ. ६. नास्ति ब पुस्तके. ७. अत उत्तरं 'बहुभिश्च' इत्यधिकं आ पुस्तके. ८. नास्ति ब पुस्तके. ९. 'तावत्पर्यन्त'—आ. १०. नास्ति आ पुस्तके. ११. ब उत्तरं 'क्षयो' इत्यधिकं ब पुस्तके. १२. नियमेन क्षयः' इति अ पुस्तके; 'मित्रादिभिः सह विरोधफलमिति भावः' इति आ पुस्तके. १३. 'अत्र बहुलमित्र...सान्यैवालङ्कृतिर्ध्वनेरिति' इत्यस्य भागस्य स्थाने 'अत्र मित्रादिभिः सह विरोधं कुर्वाणं कञ्चिदन्तरङ्गं प्रति विरोधिनस्ते पञ्च वा दश वा दिनानि समीचीनानि, नियमेन ते क्षयो भवितेति भयं द्योत्यते।' इति ब पुस्तके. इ पुस्तके त्वयं भागो नास्त्येव, तत्र निर्दिष्टं शोधपत्रमपि नोपलभ्यते. १४. '०न्योपदेशध्वनिं' इति पाठ आधारभूत (अ) पुस्तकस्थः. १५. अस्पष्टोऽत्र पाठ आधारभूते अ पुस्तके.

इत्यादावलङ्काररूप ध्वनिः । तदुक्तं ध्वनिकृता—

"शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः ।
यत्राविष्क्रियते स्वोक्त्या सान्यैवालङ्कृतिर्ध्वनेः ॥" इति ।

## ३०. पर्यायोक्तम्

### (अ) प्रथमम्

[1]गम्यं विवक्षितं यत्र भङ्ग्यन्तरेण सूच्यते ।
पर्यायोक्तालङ्कृतिः सा विबुधैस्तत्र कीर्तिता ॥४५॥

यदेव स्वासाधारणरूपेण गम्यं विवक्षितं तदेव भङ्ग्यन्तरेण विवक्षितरूपादपि चारुतरेण रूपान्तरेण यत्राभिधीयते, तत्र पर्यायोक्तालङ्कृतिः ।

यथा—

[2]जगत्त्रयनिवासेन विभुना शेषशायिना ।
शेषशायीकृतो येन शेषः सोऽस्तु मुदे तव ॥१६०॥

शेषः शेषेणागोऽपि शेषे शेतेऽसौ शेषशायीकृतः । कुक्षिस्थाखिल-

---

***Kārika 45.*** *When that which is to be intimated and is intended to be indicated is expressed by means of a circumlocutory mode of speech, there is declared by the learned the well-known figure Paryāyokta.*

160. May He (i. e. God Viṣṇu) stand for thy happiness,—He who accommodates the three worlds within Himself, is all-pervading and, शेषशायिन् (= sleeping on the serpent S'eṣa) He Himself is, has turned S'eṣa himself into शेषशायिन् (i. e., because the serpent, like all other objects of the universe, forms part of the all-pervading God who sleeps him).

---

१. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि अ आ पुस्तकेषु वर्तते. २. 'उरगोऽपि चतुष्पादः कृतो येन महात्मना ।' इति पाठः पूर्वार्धस्य आ पुस्तके. ३. अतः पूर्वं 'येन महात्मना, उरसा गच्छतीत्युरगः पादरहितोऽपि सर्पः कालियनागश्चतुष्पादः पशुः । कालियनागो भगवता पशुवद्धात्रा नासायां इति पुराणप्रसिद्धम् । पादरहितोऽपि चतुष्पादः इति भङ्गी येन महात्मना' इत्यधिकं आ पुस्तके. ४. अतः पूर्वं 'अपि' इत्यधिकं पुस्तके.

भुवनस्य भगवतः शेषशायित्वेन तत्कुक्षिगतस्य शेषस्यापि शेषशायित्वं नान्तरीयकतया सिद्धमित्यभिप्रायः ।

[illegible] महात्मा वासुदेवः स्वासाधारणरूपेण कृष्णत्वेन गम्यो विवक्षितः । [illegible] विवक्षितरूपाच्चारुतरेण शेषशायित्वकारित्वरूपेण रूपान्तरेणाभिहितः, इति पर्यायोक्तम् ।

यथा वा—

विद्युल्लतौजा वद वीर ! वीरघः कौमोदकीनन्दकमानमोचनः ।
खड्गः पतन्कस्य गले तवाधुना चतुर्भुजांशं प्रथितं करिष्यति ॥१६१॥

'अद्य कं जेतुं गच्छसि ?' इति प्रष्टुकामस्य कस्यचिज्जेतुं प्रचलितं राजानं प्रत्युक्तिरियम् । हे वीर ! तडिल्लताप्रभो वीरघः कौमोदकीनन्दकयोर्गर्वमोचनस्तव खड्गः कस्य पुंसो गले पतन्सन् चतुर्भुजांशं विष्णोरंशं । 'नाविष्णुः पृथिवीपतिः' इति शास्त्रात् । प्रथितं विख्यातं कर्तुमिच्छति । वद कथय । कौमोदक्युपादानं विष्णोर्भुजचतुष्टयगतैरनेकायुधैर्विधीयमानं कार्यं तदंशस्य भवतः खड्गेनैव सम्पाद्यत इत्यर्थं व्यनक्ति ।

अत्र 'अद्य कतमं जेतुमभिलाषस्तव ?' इति गम्योऽर्थो विवक्षितः । [illegible] भङ्ग्यन्तरेणाभिहितः, इति पर्यायोक्तम् ।

(आ) द्वितीयम्

**व्याजेन केनचिदिष्टसाधन यद्धि गम्यते ।**
**पर्यायोक्तं तदप्याहुः परेऽलङ्कारकोविदाः ॥४६॥**

---

161. *Tell me O hero, on whose neck would now fall thy sword, that possesses the splendour of forked lightning, kills warriors and dispels the pride of Kaumodakī ( =Viṣṇu s mace) and Nandaka (=Viṣṇu [illegible] sword), and would (thereby) make Vıṣṇu s incarnation (=the king addressed) renowned ?*

**Kārika 46.** *If the accomplishment of [illegible] desired object through some pretext is suggested, it, too, is termed Paryāyokta by other rhetoricians.*

---

१. 'तत्कुक्षिस्थस्य'—आ. २. अत उत्तरं 'उरगेऽपि चतुष्पादत्वकारित्वरूपेण' इत्यधिकं आ पुस्तके. ३. 'शेषे शेषशायित्वकारित्वरूपेण'—आ, इ. ४. अत उत्तरं 'च' इत्यधिकं आ पुस्तके. ५. 'अभिलषसि'—आ. ६. 'तडिल्लतानाभो'—अ. ७. 'कं'—अ.

यथा—

समागते राघवरायराजनि
क्रीडागृहं राजवधूजनाकुलम् ।
शनैःशनै राजवधूसखीजनै-
र्निर्यातमेवाशु मिषेण सस्मितम् ॥१६२।

अत्र केनचिन्निमेषेण निर्यातानां राजवधूसखीजनानां राजतद्वध्वोः स्वाच्छन्द्यसम्पादनरूपेष्टसाधनं गम्यते, इति पर्यायोक्तम् ।

यथा वा—

राधानेत्रगतं रेणुमपनेतुं सकैतवः ।
फूत्कुर्वंस्तन्नयनयोर्धूर्तः कृष्णो मुदेऽस्तु वः ॥१६३॥

पूर्वस्मिन्नुदाहरणे परेष्टसाधनम्, अत्र ■ मुखनिःश्वासै राधानेत्र-गतपरागापनयनमिषेण नेत्रचुम्बनादिरूपं स्वेष्टसाधनम्, इति विशेषः ।

## २१. व्याजस्तुतिः

क्रियमाणा स्तुतिर्यत्र निन्दायां पर्यवस्यति ।
निन्दा यत्र स्तुतौ तद्वद्व्याजस्तुतिरलङ्कृतिः ॥४७॥

यत्र क्रियमाणा स्तुतिर्निन्दायां पर्यवस्यति, यत्र निन्दा स्तुतौ तद्वत् क्रियमाणा निन्दा स्तुतौ यत्र पर्यवस्यति, तत्रापि व्याजस्तुतिरलङ्कारः ।

---

162. As soon ■ king Rāghavarāya arrived at the pleasure-house thronging with hosts of royal ladies, the queen's female friends instantly made their exit gently with smiles under some pretence.

163. May cunning Kṛṣṇa hissing at Rādhā's eyes under the pretext of extracting the dust-atoms entered therein, stand for your welfare!

*Kārikā 47. When praise that is expressed results into censure, so also censure that is expressed results into praise, the figure is Vyājastuti.*

---

१. 'राघवरावराजनि'—अ; 'माधवरावराजनि'—आ, इ. २. '०राजवधूसखी-जनैः'—आ, इ. ३. 'राजा तद्वध्वोः' इति पाठभिन्नेष्वपि ■ आ ■ पुस्तकेषु. ४. 'मुख-श्वासै'—अ.

स्तुत्या निन्दा, यथा—

खलोऽतिनिपुणो राजन्ननेकगुणवान्कृती ।
निर्दोषं कुरुते दुष्टं गुण्यं गुणविवर्जितम् ॥१६४॥

प्रस्तावसरस्य कस्यचिद्राजानं प्रत्युक्तिरियम् । निर्दोषं पुरुषं दुष्टं सदोषं कुरुते, इत्येको गुणः; दुष्टं निर्दोषं कुरुते,इति द्वितीयः;गुण्यं प्रशस्तगुणं गुणविवर्जितं [1]निर्गुणं कुरुते, इति तृतीयः; गुणविवर्जितं गुण्यं कुरुते, इति चतुर्थः । 'दुष्टं गुण्यं कुरुते' इत्यर्थे द्वौ गुणौ दोषापह्नवो गुणारोपश्च । 'गुण्यं दुष्टं कुरुते' [2]इत्यर्थे द्वौ [3]गुणौ गुणापह्नवो [4]दोषारोपश्च । 'दुष्टं गुणविवर्जितं स्वात्मानं निर्दोषं गुण्यं [5]कुरुते' इत्यर्थेऽपि द्वौ [6]गुणौ दोषा[7]पह्नवो गुणारोप[8]श्च।

[9]स्तुत्या निन्दायाः प्रतीतिः ।

निन्दया स्तुतिः, यथा—

दानवीरं नाटयता त्वया माधव ! किं [10]।
[11]उत्पाट्य मेरुशृङ्गाणि नैव दत्तानि भिक्षवे ॥१६५॥

'सुमेरुशृङ्गाणि विना सर्ववस्तुप्रदाता त्वम्' इति स्तुतिरवगम्यते ।

यथा वा—

सुजनैर्यत्कृते न्यस्तं साक्षीकृत्य [12]महेश्वरम् ।

---

164 O king! a very shrewd and competent villain is endowed with numerous excellences. He turns [9] innocent person into [9] wicked one a wicked person into [9] innocent one, a meritorious person into [9] meritless one, [9] meritless person into [9] meritorious one, [9] vicious person into a meritorious one, a meritorious person into [9] vicious [9] and himself, wicked and meritless, into an innocent and meritorious one.

165. What hast thou done O Mādhava, while gesticulating the sentiment of chivalrous liberality (or imitating [9] extremely liberal hero)? Thou hast certainly not torn out the peaks of (the golden mountain) Meru and given them away to a mendicant.

166. May the Ganges protect (you)—the Ganges who is ill-mannered inasmuch [9] she does not give back the (mortal) body cast down,

---

१. नास्ति [9] पुस्तके. २.'इत्यर्थेऽपि'—आ. ३. पदं नास्ति [10] पुस्तके. ४. इमानि पदानि न सन्ति [9] पुस्तके. ५. 'उत्पाद्य'—अ, आ. ६. 'सुजनैर्यच्चटे'—आ, इ. ७. 'सतीपतिम्'—आ.

न ददाति पुनर्देहं गङ्गा सावतु दुर्नया ॥१६६॥

मैहेश्वरं साक्षीकृत्य न्यस्तं त्यक्तं न्यासीकृतं च, देहं शरीरं, पुनर्ने ददाति न प्रयच्छति

सदाशिवं साक्षीकृत्य न्यासीकृतं शरीररूपं वस्तु न ददातीति निन्दा। तया प्राणिनां गर्भवासदुःखं निराकरोतीति स्तुतिः प्रतीयते।

यथा वा—

विमानाभं समारुह्य रथं योद्धुं त्वयि स्थिते।
विमानानि समारूढाः शत्रवः किं कृतं त्वया ॥१६७॥

'हे राजन्' इति शेषः विगतं मानेमियत्ता यस्याः सा तथोक्ता, आभा कान्तिर्यस्य तं तथाभूतं रथं। विमानस्येवाभा यस्येति वार्थः। समारुह्य त्वयि योद्धुं स्थिते सति शत्रवो भवद्द्विषः, विमानानि सत्कारार्थमिन्द्रप्रेषितानि, समारूढाः। 'भवन्ति' इति शेषः। त्वया किं कृतं कः पुरुषार्थः कृतः?

'अपकारिणः प्रत्युत स्वतोऽप्युत्कृष्टतां नीताः' इति निन्द्यार्थो 'शत्रवो रणे हताः' इति स्तुतिः प्रतीयते, इति व्याजस्तुतिः।

एवं यत्रान्यस्तुत्यापरस्य स्तुतिः प्रतीयते, तत्रापि व्याजस्तुतिः।

यथा—

---

or entrusted as deposit in her own hands by virtuous people making Great God Śiva their witness.

167. No sooner didst thou stand for fighting riding on a chariot bearing the appearance of an aerial car (or possessing immeasurable lustre) than the enemies ascended the heavenly cars. What indeed didst thou achieve?

---

१. 'उमापति'—आ. २. 'शिवं'—अ; 'साम्बशिवं'—आ. ३. 'शरीरं'—अ; नास्त्येव आ पुस्तके. ४. नास्ति ■ पुस्तके. ५. 'मानं परिमाणमियत्तेति यावत्'—आ. ६. नास्ति आ पुस्तके. ७. 'वा रथं'—आ. ८. अत उत्तरं ■ "रणाङ्गणे" इति शेषः'—इत्यधिकं आ पुस्तके. ९. नास्ति ■ ■ पुस्तकयोः. १०. अत उत्तरं 'भवता' इत्यधिकं आ पुस्तके ११. अत उत्तरं 'इत्यर्थः' इत्यधिकं आ पुस्तके. १२. 'निन्दा तया'—आ. १३. ■■ पदद्वयं नास्ति ■ इ पुस्तकयोः. १४. 'एवं यत्रान्यस्तुत्या...नर्मवचनमिदम्' इति भागो न दृश्यते ■■ पुस्तके. ■ पुस्तके स्वयं शोधरूपेण विहितो दृश्यते. १५. '०स्तुत्यान्यस्तुतिः'—इ.

असुकरमनरैः किमहो
तपः पुरानेन कुत्र संतप्तम् ।
अधरसमं तव सुन्दरि .
नूत्नमङ्कुरं पिको दशति ॥१६८॥

अत्र पिकस्तुत्या सम्बोध्यनायिकाधरपानकर्तुः स्तुतिः प्रतीयते । उद्याने प्रकृतराज्ञोऽवरोधानां मध्ये कस्याश्चित्काञ्चित्प्रति नर्मवचनमिदम् ।

अन्यनिन्द्यापरस्य स्तुतिः, यथा—

इहोद्याने रम्ये सुभगकदलीचूतनलिनी-
जपाद्राक्षावल्लीमिलदलिसुवल्लीततियुते ।
तरुः शाखोटोऽयं विततबहुशाखी न घटते-
ऽफलच्छायो रोद्धा वनसुभगवृक्षान्तरगतेः ॥१६९॥

अत्र शाखोटकतरोर्निन्द्योद्यानगतान्यतरूणां प्रशंसा व्यज्यते । परं त्वत्र व्याजस्तुतिमूलाप्रस्तुतप्रशंसाप्यस्ति बहूनां सज्जनानां समाश्रयस्य केनचिद्दुष्टेन परकार्यभञ्जकेनाप्याश्रितस्य महाजनस्य वृत्तान्तः प्रतीयते ।

यथा वा—

इह नूतनचूततरौ रटन्तु करटाः सुखेन मदमत्ताः ।
कर्णामृतमिव सुगिरः कथं पिकस्यापि ते करिष्यन्ति ॥१७०॥

---

168. Ah strange Where did this cuckoo practise austerities such as cannot be easily practised (even) by gods ? O lovely damsel ! it bites a fresh sprout resembling thy lower lip

169. This Śākhoṭa tree, that has expanded its several branches is fruitless and shadeless and obstructs the course of other trees that look lovely (even) in a forest, does not look harmonious in this garden that contains rows of beautiful plantain trees, mango-trees, lotus-plants, Japā-plants, grape-creepers and other delicate creepers on which bees assemble.

170. Crows inflated with pride (or, mad with intoxication) may freely crow on this new mango-tree; (but) how indeed would they as well produce the cuckoo's charming tones that act as nectar to the ear ?

---

१. 'असुकरमनरैः'—अ. २. 'अन्यनिन्द्यापरस्य...किमर्थमिति ■ न जानीमः' इति दीर्घो भागः केवलं ■ पुस्तके वर्त्तते, आ ■ पुस्तकयोस्तु नास्त्येव.

अत्र हि काकनिन्दया पिकस्य स्तुतिः प्रतीयते। अत्रापि व्याजस्तुतिमूलाप्रस्तुतप्रशंसाप्यस्ति। अप्रस्तुतेन काकवृत्तान्तेन कस्यचिद्विदुषः समीपे गत्वा स्थितस्य वाचालस्य मूर्खस्य वृत्तान्तः प्रतीयते।

अन्यस्तुत्यापरस्य निन्दा, यथा—

मूर्खो धन्यतमो न वेत्ति नितरां पाण्डित्यसम्पादन-
क्लेशं भैक्ष्यमजस्रमत्ति समये निद्राति निद्रागमे।
नो जानाति महाजनार्जवकृतेर्दुःखं नृपद्वारिको
यद्दण्डासिभयं न च पि विदितं ज्ञातं न देशाटनम्॥१७१॥

अत्र मूर्खस्तुत्या नृपादिसेवानिर्विण्णस्य कस्यचिद्विदुष आत्मनिन्दा व्यज्यते। राज्ञः पुरो भिक्षुकपण्डितस्योक्तिरियम्।

अत्रेदं चिन्तनीयम्- । एकस्य स्तुत्यापरस्य स्तुतिरेकस्य निन्दयापरस्य स्तुतिश्च यथा व्याजस्तुतिः, तथैकस्य निन्दया तदपरस्य निन्दैकस्य स्तुत्या तदपरस्य निन्दा चेति द्वयमपि 'व्याजनिन्दा' इत्येव वक्तुं युक्तम्। उभयोः स्तुत्यात्मकव्याजस्तुतेः प्रतिद्वन्द्वीभूता यथोभयोर्निन्दात्मिका व्याजनिन्दा, तथैकस्य निन्दया तदपरस्य स्तुत्यात्मकव्याजस्तुतेः प्रतिद्वन्द्विन्ये कस्य स्तुत्या तदपरस्य निन्दात्मिका व्याजनिन्देत्येकस्य स्तुत्या तदपरस्य निन्दा यत्र प्रतीयते तस्या व्याजस्तुतिमध्ये लिखनं किमर्थमिति तु न जानीमः।

## ३२. व्याजनिन्दा

ऐकस्य निन्दया यत्र व्यज्यते सापरस्य चेत्।
व्याजनिन्देति कथितालङ्कृतिस्तत्र तान्त्रिकैः॥४८॥

---

171. A fool is most blessed. He is completely unaware of the toils required for acquiring profound learning, always eats at the due hour food procured by begging, goes to bed at the advent of sleep, never experiences the pains of the task of flattering big people, is unconscious of the terror of the raised rod and sword of a king's door keeper and is also ignorant of travelling abroad.

*Kārikā* 48. *Where from the (expressed) censure of one that of another is suggested, there the figure* ■ *said to be Vyājanindā by the scientists (i.e. Poeticians)*

---

१. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि अ आ ■ पुस्तकेषूपलभ्यते.

यथा—

निन्द्यः कुम्भोद्भवश्चन्द्र ! येन[1] न पीतोऽब्धिगो भवान् ।
निन्द्यः कृष्णोऽपि येन त्वं मन्दरेण न चूर्णितः १७२ ।
निन्द्यो माधवराय[2]स्य प्रतापोऽपि सुदुःसहः
येन त्वं नैव दग्धोऽसि यथास्माकं मनस्तथा ।१७३॥
इति राजंस्तवारीणां पत्न्यो विरहकातराः
प्रलपन्ति प्रमुह्यन्ति मुहु[3]र्नक्तं ससूचनम् ॥१७४॥

अत्र वाच्यया निन्दया चन्द्रनिन्दा व्यज्यते प्रघट्टकेन[4] च प्रकृतराज्ञः प्रताप[5]तिशयो वर्णि[6]तः ।

यद्यपि 'अन्यस्तुत्या तदन्यस्य स्तुतिः' इत्याद्युक्तव्याजस्तुतौ व्याजनिन्दायामपि चाप्रस्तुतप्रशंसावतरति, एकस्य स्तुत्यापरस्य स्तुतौ व्याजनिन्दायां यथैकस्य निन्दयापरस्य स्तुतावेकस्य स्तुत्या तदन्यस्य निन्दायां पुनर्वैधर्म्येण; तथापि स्तुत्या निन्दाया निन्दया स्तुतेश्चाभिव्यक्तिरिति वैचित्र्यसद्भावाद्व्याजस्तुतिः पृथगङ्गीकृता । यत्र सारूप्यं वर्तते, तत्राप्रस्तुतप्रशंसाव्याजस्तुत्युभयं, स्थलविशेषेऽप्रस्तुतप्रशंसाव्याजनिन्दोभयं च यत्र चान्यस्तुत्यान्यनिन्दान्यनिन्दयान्यस्तुतिश्च, तत्र सारूप्याभावेऽपि च स्तुत्या स्तुतिरूपा

---

172 174. O moon! Agastya (lit the Pitcher-born one) is to be blamed that he did not swallow you up who were contained in the ocean; Krsna, too, is to be blamed that he did not crush thee to powder with the mountain Mandara Madhavarāya's extremely irresistible valour (or unbearable majesty) too, is to be blamed that it has not, to be sure burnt thee as it has done our hearts"— thus, O king, lament and faint with indications thy [redacted] wives, distressed with separation frequently during nights

---

१. 'येन पीतोज्झितो भवान्' इति पाठो द्वितीयचरणस्य आ पुस्तके. २. 'माधवरायस्य'—अ, आ; 'राघवरावस्य'—इ. ३. 'प्रतपन्ति (—प्रपतन्ति ?) दिवानिशम्' इति पाठोऽन्तिमचरणस्य [redacted] पुस्तके. ४. इदं वाक्यं नास्ति आ पुस्तके. ५. 'प्रतापाधिक्यं' अ. ६. 'वर्णितम्' —अ. ७. 'यद्यप्यन्यस्तुत्या ... ..ध्वनित्वव्यपदेशः' इति भागो नास्ति आ पुस्तके; [redacted] पुस्तके त्वस्य स्थाने 'यद्यपि व्यजस्तुतौ व्याजनिन्दायामपि चाप्रस्तुतप्रशंसावतरति, तथापि स्तुत्या निन्दाया निन्दया स्तुतेश्चाभिव्यक्तिरिति वैचित्र्यसद्भावाद्व्याजस्तुतिः पृथगङ्गीकृता ' इत्येव पाठः.

वैधर्म्येणाप्रस्तुतप्रशंसा व्याजस्तुतिरित्युभयम् । यत्र चैकस्यैव स्तुत्यादितो निन्दादिकं प्रतीयते, [illegible] शुद्धा व्याजस्तुतिः । यत्र च स्तुतिर्निन्दा वा नास्ति, तत्र शुद्धाप्रस्तुतप्रशंसा । इति विवेकः

'ससूचनम्' इति स्वोक्त्याविष्करणान्न ध्वनित्वव्यपदेशः ।

## ३३. आक्षेप·

(आ) प्रथमः

प्रथमं स्वयमुक्तस्य प्रतिषेधो विचारणात् ।
विधीयते यत्र तत्राक्षेपालङ्कार इष्यते ॥४९॥

यथा—

अभीष्टं देहि भो राजन्नथ वास्ति सुरद्रुमः ।
पाहि माधव[2] ! मां पाहि नो चेदस्त्यपरो हरिः ॥१७५॥

अत्र राज्ञः सकाशात्प्रार्थितस्याभीष्टदानस्येप्सितप्रदं कल्पवृक्षं मनसि विचार्य 'अथ वा' इत्यनेन निषेधः सूचितः । एवं प्रार्थितस्य प्रतिपालनस्य प्रतिपालनसमर्थमन्यं विष्णुं मनसि विचार्य सूचितो निषेध आक्षेपालङ्कारः[3]।

यथा वा—

विशङ्कनीयो यवनोऽतिदुर्मदः
प्रदीयतां वीरभटा रणस्य भूः ।

---

*Kārika 49.* *When, on consideration, contradiction is made of something uttered by oneself previously the figure is regarded as Akṣepa.*

175 Give me, O king the object of my desire, or (don t give for) there exists the celestial tree (to give it to me). Give me, O Madhava, shelter· if not, another Hari (i e Supreme God) is existent (to give me shelter)

176. "O brave warriors ! you must apprehend the most ferocious Yavana (=the Mohamaden general at Sindkhed, Udgir or Panipat) and yield him [illegible] place for fighting (by slightly withdrawing yourselves

---

१. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि [illegible] आ [illegible] पुस्तकेषूपलभ्यते.
२. 'राघव'—अ, इ. ३. 'आक्षेपः'—आ.

युध्यन्तु वा नैव निवृत्त्यतां[1] रणा-
त्स्वर्गोऽथ वावारिधि भूः स्वहस्तयोः ॥१७६॥
विश्वासेरायेण[2] विनोदिता भृशं
सर्वेऽपि वीरा हयहस्तिसादिनः ।
समं निपेतुर्यवनार्णवे महो-
दधौ सुपर्णा इव पन्नगाकुले ॥१७७॥
विश्वासेरायो[3] वदति स्म वज्रिणं
प्रयच्छ देवेन्द्र ! जयं महाहवे ।
सम्प्रेष्यतां वाप्सरसां सुनर्त्तनै—
र्विभ्राजमानं त्वरया विमानकम् ॥१७८॥

इमानि चासत्कृतविश्वासेराययुद्धवर्णनपद्यानि । म्लेच्छाधीशेन स्वकीयैर्वीरभटैः सह रणभूमौ निपतिते सति राजा विश्वासेरायः स्वकीयान्वीरान् भटांश्च प्रत्याह—। भो वीरभटाः ! दुर्मदो यवनः प्रभूतो यवनाधीशो विशङ्कनीयः। इतरवद्वेला न कार्या, इति भावः। रणसम्बन्धिनी भूः प्रदीयतामस्मै रणाय भूः प्रदीयतां। किञ्चित्परावृत्त्य रणभूर्दीयताम्, इत्यर्थः। इति प्रथमोक्तस्य 'वाथ वा युध्यन्तु, रणान्नैव निवृत्त्यतां रणभूने

---

from the battle-field). Or, rather you keep ▬ fighting and do by no means desist from the battle field. Either the heaven or the land stretching to the ocean shall come into our hands.'

177 All the warriors, riding on horses and elephants, fell when strongly goaded by Vis'vasaraya, upon the ocean of the Yavanas, as do eagles upon the Great Ocean thronging with serpents

178. Viśvāsaraya addressed Indra, "O lord of gods ! grant ▬ victory in this great battle' or quickly send (thy) aerial car flashing with the excellent dances of celestial nymphs.'

---

१. 'निवर्त्यताम्' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु. २. 'विश्वासरावेण'—अ, आ, इ. ३. 'विश्वासरावो'—अ, आ, इ. ४. '०विश्वासराव०'—अ,आ, इ. ५. 'विश्वासरावः'—अ, आ, इ. ६. इदं पदद्वयं नास्ति आ पुस्तके. ७. 'इतरवद्वेला'—अ; 'हेला'—आ. ८. 'रणसम्बन्धिनी भूः प्रदीयताम' इति पदत्रय नास्ति ▬ इ पुस्तकयोः. ९. 'रणभूः'—आ, इ. १०. 'रणाय भूर्दीयता०'—आ, इ. ११. 'नैव'—आ, इ. १२. 'निवर्त्यताम्' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु.

देया' इति निषेधो विचार्य कृतः 'एते भयादेव स्रस्ताः' इति शत्रोर्दर्पो मा भूदिति विचार्य कृतो निषेध आक्षेपः ।

एवं तृतीयश्लोके च देवाधीशं विजयं सम्प्रार्थ्य 'वा विमानं सम्प्रेष्यताम्' इत्युक्त्या वैकल्पिको निषेधो विचार्य सूचितः, इत्यत्राप्याक्षेपः। मध्यन्तनीयं पद्यं तु तत्रत्यसन्दर्भप्रदर्शनायेहोपन्यस्तम् ।

(आ) द्वितीयः

निषेधः स्यात्तदाक्षेपो निषेधो यदि बाधितः ।
अन्यार्थे पर्यवसन्नो विशेषाक्षेपको भवेत् ॥५०॥

—इत्यलङ्कारसर्वस्वकारादयः निषेधमात्रं नाक्षेपः, किं तु यदि चेन्निषेधो बाधितो निषेधाभासरूपोऽन्यस्मिन्नर्थे पर्यवसन्नः सन् किञ्चिद्विशेषाक्षेपको भवेत्तदाक्षेपालङ्कारः स्यात्, इत्यर्थः ।

यथा—

राजन्यमौले ! शास्त्रज्ञ ! न वयं बान्धवास्तव ।
दादाराघवपादैर्वो विश्लेषो नोऽतिदुःसहः ॥१७९॥

दादाश्रीराघवचरणैः सह राज्ञः श्रीमाधवरायस्य चित्तविश्लेषे सति राजानं प्रति बन्धुजनोक्तिरियम् । निजबन्धुजनोक्तौ 'न वयं बान्धवाः' इति निषेधोऽनुपपन्नो निषेधाभासरूप उभयोर्विरोधभञ्जनोचितकैतवबचन परिहारेणाप्तवादित्वे पर्यवस्यन् 'चित्तविश्लेषमपहाय परमैकमत्येन यथा-

---

*Karikā 50.* *(According to the author of the Alankarasarvasva and other rhetoricians) Ākṣepa occurs when there is an express denial, which, being inconsistent under the circumstances, passes into some other sense and thereby conveys some special meaning.*

179 O (Madhava) who art foremost among the rulers and art conversant with the S'āstras we are not thy kinsmen; (but) your separation with revered Rāghava Dāda is extremely unbearable to us.

---

१. 'भयादेव' इति नास्ति आ पुस्तके. २. 'मा भूदित्यादि'—आ. ३. 'देवाधीशात्'—इ. ४. नास्ति ▮ पुस्तके. ५ 'श्रीमाधवरावस्य'—अ, आ, इ. ६. 'निजबान्धवोक्तौ'—आ, इ. ७. 'उभयोर्विरोधमोचनोचित०'—आ; 'उभयोश्चित्तविश्लेषमोचनोचित०'—इ. ८. '०विश्लेषं विहाय'—आ. ९. 'परस्परमैकचित्त्येन'—आ.

पूर्वं राज्यंधूर्वोढव्या' इति विशेषार्थमाक्षिपति, इत्याक्षेपालङ्कारः ।

अस्मत्कृतविश्वासराययुद्धवर्णने यथा—

समागतं शत्रुबलं रणाङ्गणे
श्रुत्वापि चारेण निवेदितं पुरः ।
चचाल नैवासनतो महाबली
विश्वासरायो निजदेवतां यजन् ॥१८०॥

ऊचुस्तदा मन्त्रिवराः समर्था
वयं न राजंस्तव वीर मन्त्रिणः ।
समागता शत्रुचमू रणाङ्गणे-
ऽस्मानेवमाज्ञापय हन्यतां रिपुः ॥१८१॥

श्रुत्वेति राजा निजगाद सत्वरं
भवादृशानां बलवीर्यशालिनाम् ।
साहाय्यतो मे विजयोऽस्ति सर्वदा
करोमि खड्गेन हतारि भूतलम् ॥१८२॥

अत्र सङ्कटे प्राणदातृणां मन्त्रिणामुक्तौ 'न वयं मन्त्रिणः' इति निषेधो बाधितो निषेधाभासरूपो महाप्रभावुपदेष्टुमसमर्थानां मन्त्रिणा-

---

180. Although he heard, as already proclaimed by his spy, that the enemy's forces had assembled on the battle-field, Viśvāsaraya, great and mighty, did not, to be sure, stir from his seat while worshipping his own Deity.

181. Then his competent chief ministers said. "O brave king: we are not thy ministers. The hostile army has gathered on the battle field; (hence) bid us thus, 'kill the enemy.'

182. Hearing this, the king (i. e. Viśvasarāya) quickly replied, "Victory is always present with me on account of the assistance of people like you who are endowed with might and valour I (myself) am wrenching the surface of the earth devoid of the enemy"

---

१ 'राजधू०'—आ, इ. २. '०विश्वासराय०'—अ, आ, इ. ३. 'विश्वासरायो' —अ, आ, इ. ४. 'सहायतो' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु ५. 'निरारि' इति पाठस्त्रिष्वपिअ आ इ पुस्तकेषु. आ पुस्तके मूलतो 'हतारि इति पाठ आसीद्यः पश्चात्संशोध्य 'निरारि' इति कृतो दृश्यते. ६. इदं पद नास्ति अ पुस्तके. ७. 'मन्त्रिणाम्' इति पदं नास्ति इ पुस्तके. ८. 'आभासरूपो'—आ.

मात्रवादित्वे पर्यवस्यन् 'रणाङ्गणे प्रभुसत्त्वे सैनिकाः प्राणान् हातुमिच्छन्ति, नान्यथा; अथ च, शत्रुबले रणाङ्गणमागते विलम्बो हानिकर इति युद्धाय त्वरितव्यम्।' इत्याद्युपदेशविशेषमाक्षिपति, इत्याक्षेपालङ्कारः। प्रथमचरमपद्ये तत्रत्यसन्दर्भावगमाय।

(इ) तृतीयः

विधिर्व्यक्तीकृतो यत्र निषेधेन तिरोहितः।
भवेत्तत्राप्यलङ्कार आक्षेपः कथितो बुधैः ॥५१॥

यत्र व्यक्तीकृतो विधिर्निषेधेन तिरोहितो भवेत्, तत्रापि बुधैः 'आक्षेपः' इत्यलङ्कारः कथितः।

यथा—

नाथ! यास्यसि चेद्याहि मार्गाः सन्तु तवानघाः।
तत्र श्रोष्यसि वृत्तान्तं मदीयक्षेमसम्भवम्। १८३॥
इच्छास्ति गन्तुं यदि नाथ! गम्यतां
क्रोडीकृतस्तिष्ठति नो महोदधिः।
नेयं दिनं त्वत्कथया कथञ्चन
त्वया [redacted] सर्वाणि दिनानि मत्कथा ॥१८४॥

---

**Karika 51.** *When the expressed permission or enjoining of something becomes enveloped in its (suggested) contradiction, there, too, the figure Ākṣepa is declared by the learned.*

183. O lord! do go if thou must go. May thy way be immune from danger. There indeed wouldst thou hear the account concerning my well-being (i.e death ironically).

184. O lord do depart if there is (in thee) a desire for departure. The great ocean does not remain clasped to one's bosom (i.e. in restraint). A day (and not the night) may somehow be passed (by me) with talks concerning thee, thou however must pass all the days (henceforth) with tales concerning [redacted] (as I shall be no more alive).

---

१. 'जीवं'—आ. २. नान्यथेति विलम्बो हानिकर इत्याद्युपदेश'—अ; 'नान्यथेति युद्धाय त्वरितव्यमित्याद्युपदेश०'—आ; 'नान्यथाथ च शत्रुबले रणाङ्गणमागते विलम्बो हानिकर इत्याद्युपदेश०'—इ. ३. 'सन्दर्भावगमाय'—अ. ४. 'श्रोष्यति—आ. ५. 'मदीयं दैवनिर्मितम्'—आ. ६. 'जेतुं'—अ. ७. 'नाथ'—अ. ८. 'वैवार्यते नैव मया महीपतिः'—आ.

गन्तुं स्पृहा चेद् व्रज नाथ ! ते शिवं
न रुध्यते पामरयेव पाणितः ।
मनो मदीयं भवदास्यलग्नकं
तप्तं हि गन्ता सदृशं हिमद्युतिम् ॥१८५॥

[1]श्रीपेषवा[2]माधवरायराज्ञो
नियाणि[3]कालेऽनुचरो भटौघः ।
इति प्रियाणां गदितैर्निरोद्धुं
न्यस्तैरपि स्वामिपरो न रुद्धः ॥१८६॥

प्रथमपद्ये 'याहि' इत्यनेनाविष्कृतो विधिः 'मदीयक्षेमसम्भवं वृत्तान्तं श्रोष्यसि' इत्यतो व्यङ्ग्येन निषेधपर्यवसन्नेन तिरोहितः, इत्याक्षेपालङ्कारः । इच्छाँस्तीति । दिनमेको दिवसः, त्वत्कथया भवद्वार्तया, [illegible]

---

185 O lord ! do go if thou likest to go May prosperity crown thee ! You cannot be kept restrained by a poor woman (like myself) with her hands. My mind fixed on your face shall, while burning (with the fever of separation) repair to the moon (lit. the cold-rayed one) that resembles your face or that is the fitting place for the occasion i.e, I shall die. (Or, my mind, burning with the fever of separation, shall, solely devoted to S'iva, repair to the moon that is the fitting place for the occasion, i e., I shall die while meditating upon God S'iva)

186. On the occasion of the revered Peşava king Mādhavarāya's expedition the band of his attendant warriors could not supremely devoted to the master as they were, be held up (at home) even by these utterances of their beloveds meant to check them.

---

१. अस्य पद्यस्य स्थाने 'इत्युच्यमानोऽपि पुरन्ध्रिवर्गैः प्रयाणकाले नृपतिः कदाचित् । सासा मनोरञ्जनमाशु कृत्वा प्रयाति नीतौ निपुणो जयार्थम् ॥' इति पद्यं [illegible] पुस्तके. २. 'श्रीपेषवामाधवरावराज्ञो'—अ; 'श्रीपेषवाराघवरावराजः'—इ. ३. 'प्रयाणकाले०'—इ. ४. 'इत्यनेन स्पष्टीकृतो'—आ; 'इत्यनेन व्यक्तीकृतो'—इ. ५. 'दैवनिर्मित मदीयं वृत्तान्तं'—आ. ६. 'श्रोष्यति' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु. ७. 'इच्छास्तीति' नास्ति [illegible] पुस्तके. ८. अत उत्तरं 'हे नाथ ! मया महीपतिर्न निवार्यते महीपतिरित्यनेन "राजा मित्रं कस्य दृष्टं श्रुतं वा" इत्यर्थो व्यज्यते' इत्यधिकं आ पुस्तके. ९. नास्ति अ पुस्तके.

महता कष्टेन, नेयं निर्गमनीयम् । त्वां विना राज्या नेतुमशक्यतया प्राण त्यागस्यैव वरत्वात्, इत्यभिप्रायः । तु पुनः, त्वया भवता । मम सा कथा, तया मत्तया । मत्कथया, इत्यर्थः । सर्वाणि दिनानि सर्वे दिवसाः । 'नेयानि' इति वचनविपरिणामेनान्वयः । 'मम वार्तामात्रं शेषो भविता' इति व्यङ्ग्योऽर्थः ।

अत्रापि 'गम्यताम्' इत्यनेन स्पष्टीकृतो विधिर्व्यङ्ग्येन निषेधपर्यवसानेन तिरोहितः ।

गन्तुमिति । हे नाथ ! गन्तुं स्पृहा चेद्, व्रज । ते शिवं भद्रम् । 'अस्तु' इति शेषः पामरेणेव निकृष्टयेव । पाणिभ्यामिति पाणितः । क्रोडीकृत्येत्यर्थः । भवतो मुखे लग्नकं चक्षुर्द्वारा मुखे आसक्तं लग्नकोऽपि चक्षुर्व्यापारत एव भवतीति व्यन्यते मदीयं मनस्तप्तं त्वद्विरहानलपरितप्तं सत् । सदृशं तव मुखसदृशं । यद्वा, शैत्यकरत्वात्परितप्तस्य सदृशं योग्यं, न तु विसदृशं । हिमद्युतिं चन्द्रं । गन्ता गमिष्यति । भवेदास्यलग्नकस्य परितप्तस्य मे मनस्त्वन्मुखसादृश्याच्छैत्यकरत्वाच्च हिमद्युतिरेव शरणम्, इति वाक्योऽर्थः । यद्यपि विरहिणां परितापकरत्वाच्चन्द्रो विसदृश एव, तथाप्येतस्या अधुना तदज्ञानान्नास्ति क्षतिः[19] । 'म्रियमाणानां मनश्चन्द्रे विलीयते' इति श्रुत्या मरणं व्यज्यते । यद्वा, तप्तं विरहस्मरतापाभ्यां परितप्तं, मदीयं[20] मनः । भवस्य शिवस्य । स्मरारित्वादिति भावः । दास्यं दासभावः, तत्र लग्नकमासक्तं

---

१. नास्ति ■ पुस्तके. २. 'नेतुमशक्यत्वादिति भावः'—आ. ३ अयं भागो नास्ति आ पुस्तके. ४. नास्ति ■ पुस्तके. ५. 'मत्ता'—आ. ६. 'मम वार्तामात्रं...व्यङ्ग्योऽर्थः' इत्यस्य स्थाने '"सर्व"पदाच्चिरञ्जीवित्वस्याशीरपि व्यज्यते' इति आ पुस्तके. ७. 'हे नाथ...चेद्व्रज' इति नास्ति अ पुस्तके. ८. नास्ति अ पुस्तके. ९. नास्ति आ ■ पुस्तकयोः. १०. नास्ति अ पुस्तके. ११. 'भव-मुखे'—आ. १२. नास्ति ■ पुस्तके. १३. 'हिमद्युतित्वा०'—आ, इ. १४. नास्ति ■ पुस्तके. १५. 'परितप्तस्य शैत्यकर एव शरणम्' इत्येव वाक्यपाठः ■ पुस्तके. १६. 'शीतकर एव'—इ. १७. '०चन्द्रशरणं विसदृशमेव'—आ. १८. 'तदज्ञानादग्रे जीवनाशाया असत्वाच्च न क्षतिः'—आ. १९. अत उत्तरं 'यद्वा सदृशमतितापकरत्वाद्योग्यं हिमद्युति गन्ता, विरहिणा दावानलतुल्ये तत्र ...पातं करिष्यतीति तात्पर्यार्थः ।'—इत्यधिकं आ पुस्तके. २०. 'मे'—अ. २१. 'सेवकत्वं'—आ. २२. 'लग्नकम्' इति पदं नास्ति आ पुस्तके.

सच्चन्द्रं शरणं गन्ता, इति वाच्योऽर्थः । 'मम स्मरारिस्मरणं कुर्वत्याः सत्या' प्राणा गमिष्यन्ति' इति व्यङ्ग्योऽर्थः ।

अत्र हि 'ब्रज' इत्यनेन व्यक्तीकृतो विधिर्व्यङ्ग्यार्थेन निषेधपर्यवसन्नेन तिरोहितः ।

## ३४. विरोधाभासः

अर्थान्तरानवगमे विरोधो यत्र भासते ।
विरोधाभास इत्युक्तोऽलङ्कारस्तत्र तान्त्रिकैः ॥५२॥

यथा—

असुरकृतनुतिर्यो देवसङ्गीतकीर्ति-
रवनसुखितमर्त्योऽमर्त्यसौख्यप्रदायी ।
अहितदहितदायी रम्यहारो विहारी
स जयति नरदेवो मानहन्तातिमानी ॥१८७॥

---

*Karikā 52. Where contradiction (or inconsistency) appears due to the non-comprehension of the other sense, the figure is declared to be Virodhabhasa by the scientists (i.e rhetoricians).*

187. Victorious is the king (viz., the Pesava) who, though देवसङ्गीत-कीर्ति ( one whose glory is sung by gods), ■ असुरकृतनुति (=1 one who is not extolled by gods; 2. one who is praised by demons) who, though अवनसुखितमर्त्य ( one who has made the mortals happy by one ■ protection), is अमर्त्यसौख्यप्रदायिन् (=1. one who does not give happiness to the mortals; 2. ■■■ who gives delight to gods); who, though हितदायिन् ( one who grants the salutory object) is अहितद (=1. one who does not grant the salutary object; 2 one who kills the enemies); who though रम्यहार (= one wearing ■ charming necklace), is विहारिन् (=1 one who does not possess a necklace; 2. one who indulges in sports); and, who, though अतिमानिन् ( one possessing extreme self-respect), is मानहन्तृ ( 1. one who sacrifices one's self-respect; 2. one who dispels the haughtiness of the enemies).

---

१. नास्ति ■■ पुस्तके. २. 'गन्तेत्यर्थ.'—आ. ३. 'स्मरारिजर्प'—आ. ४. 'कुर्वाणाया:'—आ. ५. 'स्पष्टीकृतो'—आ. ६. 'इत्याहुस्तत्रालङ्कारकोविदाः'—आ. ७ 'मानहन्ताभिमानी'—आ.

सुरा देवाः, तैः कृता नुतिः स्तुतिर्यस्य स तथोक्तो न भवतीत्यसुरकृतनुतिः; यो देवैः सुरै सङ्गीता कीर्तिर्यस्येति तथोक्तः। इति विरोधः। 'असुरैर्म्लेच्छैः कृतनुतिः' इति परिहारः। अवनेन रक्षणेन, सुखिताः सुखं नीताः, मर्त्या मनुष्याः, येन स तथोक्तः; मर्त्यानां सौख्यप्रदायी न भवतीत्यमर्त्यसौख्यप्रदायी। इति विरोधः। 'अमर्त्या देवाः, तेषां सौख्यप्रदायी, देवप्रीणनकर्तेत्यर्थः' इति परिहारः। हितमीप्सितं न ददातीत्यहितदः; स चासौ हितदायी च। इति विरोधः। 'अहितान् शत्रून्घ्नतीति तथोक्तः' इति परिहारः। रम्यहारो रमणीयहारः; यो विहारी हाररहितः। इति विरोधः। 'विहरतीति विहारी क्रीडाशाली' इति परिहारः मानहन्ता मानखण्डनकर्ता; योऽतिमानी इति विरोधः। 'शत्रूणां मानहन्ता' इति परिहारः। स नरदेवो राजा श्रीमाधवरायः, जयति सर्वोत्कर्षेण वर्त्तते।

## ३५. विभावना

(अ, आ) प्रथमा, द्वितीया च

कारणेन विना यत्र कार्योत्पत्तिर्निबध्यते।
तथा समग्रहेतूनामसत्त्वेऽपि विभावना ॥५३॥

यथा

श्रीमाधवे शासति भूः सुसस्यसू-
र्विना प्रयत्नेन वनं सुवन्यभूः।

---

*Kārika 53. Vibhāvana occurs when an effect is described to arise without a cause and also when it is described to arise in the absence of its cause in its entirety (i e with only a partial presence of its cause).*

188 While revered Madhava is reigning the earth yields excellent corn and the collection of trees, plants etc. bears fine fruits etc. even without toils (viz., of cultivators and gardeners), the town (viz , Poona)

---

१. देवास्तेभ्यः'—आ. २. 'हितमीप्सितं ददातीत्येवंशीलो हितदायी योऽहितद इति विरोधः' इति वाक्यपाठः आ पुस्तके. ३. नास्ति ■ इ पुस्तकयोः. ४. 'रमणीय-मुक्तादारो'—आ. ५. 'योऽभिमानीति'—आ. ६. 'राजा श्रीमाधवरावो'—अ; 'राजा माधवरायो'—आ; 'राजा श्रीराघवरावो'—इ. ७. 'श्रीराघवे'—इ.

दण्डं विना पूरखला हि दुर्हृदो
विनैव युद्धं सुहृदो भवन्ति ॥१८८॥

भूः सस्यं धान्यं सूते सा तथोक्ता । वनं वृक्षादिजातं, सुवन्यानां सुष्ठुफलादीनां, भूराश्रयः ।

अत्र कर्षककृतकुल्याजलसेककुशकाशशाद्वलाद्यपनयनादियत्नरूपकारणाभावेऽपि सस्यनिष्पत्तिर्वने च वन्यफलादिनिष्पत्तिरुक्ता । एवं राजदण्डाभावेऽपि खलेषु साधुता वर्णिता अकृतेऽपि युद्धे शत्रूणां कौटिल्यत्यागो वर्णितः । 'श्रीमाधवे भुवं शासति–' इत्युक्त्या राज्ञः पुण्यप्रभावप्रतापातिशयरूपेण हेत्वन्तरेण गम्येन परिहारः ।

'तथा' चार्थे समग्रहेतूनामसत्त्वेऽपि । हेतूनामसमग्रत्वेऽपि, इत्यर्थः । 'कार्योत्पत्तिर्निबध्यते–' इति पूर्वेणान्वयः तत्रापि विभावना यथा—

श्रीराघवधनुर्मुक्ता रामार्जुनशरोपमाः ।
अस्पृष्ट्वापि रिपून्बाणा नयन्ति यममन्दिरम् ॥१८९॥

अत्र रिपुमरणहेतूनां राघवधनुर्मुक्तबाणानामसमग्रत्वं स्पर्शनवैकल्यम् ।

दण्डी त्विमां विभावनां विशेषोक्तिमाह । तन्मते प्रकृते राघवधनुर्मुक्तबाणेभ्यः संत्रासातिशयो विशेषोक्तिः ।

---

becomes devoid of the wicked even without (the enforcement of) punishments, and the enemies become friends even without (being engaged in) fights.

189. The arrows, resembling those of Rāma and Arjuna, charged from revered Rāghava's bow conduct the enemies to Yama's abode without touching them.

---

१. अतः पूर्वं 'सस्यसूः' इत्यधिकं आ पुस्तके. २. 'वृक्षादि'—आ. ३. 'वन्यानां'—आ, इ. ४. 'फलादीना'—आ, इ. ५. 'ºजलसेकशाद्वलकुशकाशाद्यपनयनादिº'—आ. ६. अत उत्तरं 'तेन च राज्ञः पुण्यप्रभावातिशयो व्यक्तीकृतः' इत्यधिकं आ पुस्तके. ७. 'युद्धेऽकृतेऽपि'—आ, इ. ८. अस्य वाक्यस्य स्थाने 'तेन च राज्ञः प्रतापातिशयो व्यक्तीकृतः ।' इति वाक्यं [illegible] पुस्तके. ९. 'श्रीराघवे'—इ. १०. 'श्रीमाधवधनुर्मुक्ता' —अ, आ. ११. 'माधवधनुº'—अ, आ. १२. 'निदर्शना'—आ. १३. 'माधवधनुº'—आ. १४. 'त्रासातिशयविशेषोक्तिः'—अ; 'संत्रासातिशयविशेषोक्तिः'—आ, इ.

(इ) तृतीया

प्रतिबन्धकसद्भावे कार्योत्पत्तिर्निबध्यते ।
यत्र तत्रापि सा प्रोक्तालङ्कारनयवेदिभिः ॥५४॥

यथा—

आश्चर्यमति राजेन्द्र . त्वन्नेत्रकमलद्वयम्
मुखेन्दोः संनिधानेऽपि विकसत्सुमनोहरम् ॥१९०॥

अत्र कमलविकसनप्रतिबन्धकस्येन्दुसंनिधानस्य सत्त्वेऽपि कमल-विकसनं निबद्धम्, इति विभावना ।

यथा वा—

राजंस्तवारिवनिता विस्फार्य नेत्रकैरवम् ।
प्रतापतपनप्लुष्टं पश्यन्ति पतिदिक्पथम् ॥१९१॥

'कैरवम्' इति जातावेकवचनम् । पलायितानां पतीनां दिक्पथम् ।
अत्र कैरवविकसनप्रतिबन्धकस्य तपनसम्बन्धस्य सद्भावेऽपि नेत्र-कैरवविकसनं निबद्धम् ।

---

*Kārikā 54. Where an effect is described to arise in face of the presence of an obstructive factor, there, too, the same figure (viz., Vibhāvana) has been declared by rhetoricians*

190. Extreme wonder, O lord of kings The highly fascinating pair of lotuses in the form of thy eyes is blooming even in the proximity of the moon in the form of thy face.

191. O king ! thy enemies' damsels expand the कैरवस ( ■ particular type of lotuses opening at moon-rise) in the form of their eyes and observe the neighbouring territories of their (fleeing) husbands to have been burnt by the Sun in the form of thy प्रताप (—1. thy valour or majesty, 2. a particular chief thy feudatory named Pratapa).

---

१. 'विकसनप्रतिबन्धकस्य मुखेन्दुसन्निधानस्य'—आ. २. 'नेत्रकमलविकसन'—आ ३. 'प्रतापतपनसम्बन्धस्य—अ, इ. ४. 'नेत्रकैरव—' इत्यतः परमेकं पत्रं नष्टं इ पुस्तके.

(ई, उ) चतुर्थी, पञ्चमी च

अकारणाद्विरुद्धाद्वा कार्योत्पत्तिर्निबध्यते ।
विभावनाद्वयं तत्र ज्ञेयमन्याद्विचक्षणैः ॥५५॥

[1]उभयमपि, यथा—

मुखात्पीयूषधारेयं निःसरत्यद्भुतं तव ।
लोकसंतापहारी सन्भवान्संतापयत्यरीन् । १९२॥

पूर्वार्धे अकारणान्मुखादमृतोत्पत्तिर्वर्णिता । उत्तरार्धे च विरुद्धात्कार्यजनिर्निबद्धा ।

(ऊ) षष्ठी

कार्यतश्चेत्कारणस्य जनिर्यत्र निबध्यते ।
तदापि तत्र सा प्रोक्ता पञ्चेताः स्युर्विभावनाः ॥५६॥

यथा—

तवासिधाराकालिन्दी नयन्ती स्पृशतो दिवम् ।
प्रतापतपनं सूते नीलाप्युज्ज्वलमद्भुतम् ॥१९३॥

अत्र श्यामादुज्ज्वलस्य विरूपकार्यस्योत्पत्तेर्वक्ष्यमाणविषमालङ्कृति-

---

**Kārika 55.** *When an effect is described to arise from something that is not its cause or from some contrary element, there should be recognised by the intelligent another pair of Vibhāvanā*

192. Ah strange! This stream of nectar issues forth from thy mouth. Dispeller of people's sufferings — you are, you cause suffering to your enemies.

**Kārikā 56** *When a cause is described to arise from its effect, there, too, the same figure (viz., Vibhāvanā) has been declared. There are thus six varieties of Vibhāvanā.*

193. Ah strange! Kālindī (=the river Yamunā said to be the daughter of the Sun) in the form of the edge of thy sword conducting to the heaven those who come in contact with it though dark-blue, brings forth the brilliant Sun in the form of thy majesty

---

१. 'उभयं रथ – अ. २. '०दुज्ज्वलस्यकार्यस्यो०'—अ.

सङ्कीर्णेयं विभावना। यदि च 'न दीनगलगामिनी' इति पाठः, तदा शुद्धा। सा दीनकण्ठगामिनी नेति न दीनगलगामिनी। कालिन्द्यपि समुद्र-कण्ठगामिनी, पतित्वात्।

'कारणेन विना यत्र कार्योत्पत्तिर्निबध्यते–' इत्येतस्यैव लक्षणस्य सर्व-(स्व)स्य सर्वत्र सम्भवे षड्विधाप्रपञ्चनं तु बुद्धिवैशद्याय

### ३६. विशेषोक्तिः

सत्यां कारणसम्पत्तौ कार्यं यत्र न जायते।
तत्र वृद्धैर्निगदिता विशेषोक्तिरलङ्कृतिः ॥५७॥

यथा—

प्रदीप्तेऽतिथिदारिद्र्यदावाग्नौ क्षिपतोऽपि ते।
दानवारीणि सस्नेहं स्नेहनाशो न दृश्यते। १९४।

'हे[3] नृप!' इति शेषः सस्नेहं सप्रेम। श्लेषो न विवक्षितः, स्नेहस्य घृतादेः प्रत्युत वह्निप्रदीपिकरत्वात्। यथा कथञ्चिद्दातुं स्थितस्य कृपणस्य तु प्रेमनाशो भवतीति हृदयम्

### ३७. असम्भवः

असम्भाव्यार्थनिष्पत्तावसम्भाव्यत्ववर्णनम्।
क्रियते यत्र तत्रोक्तासम्भवालङ्कृतिर्बुधैः ॥५८॥

---

**Karikā 57.** *Where the effect does not arise although the operation of its cause is present there has been declared the figure Vis'eṣokti by the old (rhetoricians).*

194. Although thou hast been pouring with affection the ceremonious waters employed for giving away charities into the enormously blazing forest-conflagration in the form of the guests' poverty, still the perishing of thy affection ■ not marked.

**Kārikā 58.** *Where incomprehensibility is related of the accomplishment of something held to be impossible of accomplishment, there the figure Asambhava has been declared by the learned.*

१. इदं वाक्यं ■ पुस्तक एव दृश्यते, आ पुस्तके नास्ति इ पुस्तके त्वेतद्भागयुक्तं पत्रं नष्टमेव. २. 'न भूपते'—आ. ३. इयं वृत्तिः केवलं ■ पुस्तके दृश्यते, आ पुस्तके नास्ति.

यथा—

समन्ताल्प्राकारां गहनपरिखां दुर्गविषमां
भटैर्वीरैर्गुप्तामभरपतिनामाङ्कितपुरीम् ।
अयोयन्त्रोद्भूतायसपृथुपतद्गोलकभयां
एवं जानीते विदलति पुरा बाजिप्रथुकः ॥१९५॥

सार्वभौमं यवनाधीशं पराभूय पेपवा श्रीराघवरायेणेन्द्रप्रस्थे गृहीते सर्वं विहाय पलायितानामनुशयानानां केषाञ्चिदुक्तिरियम्। पुरा विदलति। 'पुरा'योगे भविष्यति लट्। विदलिष्यतीत्यर्थः।

## ३८. असङ्गति

(अ) प्रथमा

विरुद्धं भिन्नदेशत्वं कार्यहेत्वोर्निबध्यते ।
यत्र तत्र प्रगदितासङ्गतिः सङ्गतैर्बुधैः ॥५९॥

यथा—

चित्रं नरेन्द्र ! गुञ्जन्ती मधूनि मधुपावली ।
पिबत्यथो[3] विमुह्यन्ति तवारित्यक्तसुभ्रुवः ॥१९६॥

---

195. Who ever dreamt (lit know) that Bāji a child (viz. Raghunāthrao Peṣavā) would overrun the city (viz., Dellu) that is marked with the name of the lord of gods (viz, Indraprastha), is rampartod on all sides, possesses (i o is secured by) impassable bravehos, is inaccessible on account of its fortress, is guarded by brave warriors and causes terror with its shower of massive (or numerous) iron-balls charged from iron-machines (i o. cannons) ?

*Kārikā 59 Where a cause and its effect are represented as having contrary and different locations, there the figure Asaṅgati has been declared by well-versed authorities.*

196. What a wonder, O king ! The humming row of bees drinks up the sweet intoxicating juices of flowers and the forsaken charming-browed damsels of thy enemies get infatuated.

---

१. 'श्रीमाधवरावेणेन्द्र०'—अ; 'श्रीराघवरावेणेन्द्र०'—आ. २. 'पुरायोगे भविष्यति लट् पुरा विदलति, विदलिष्यतीत्यर्थः'—अ. ३. 'पिबत्यथ'—आ.

[1]अकृतराजानं प्रति प्राप्तावसरस्य कस्यचिदुक्तिरियम् ।

असङ्गतिरप्यलौकिकत्वेन चारुताहेतुः । 'विरुद्धम्—' इति कथनाद्—

'भूलता वङ्किता राज्ञा प्राणाश्चलन्ति विद्विषाम् ।'

इत्यादौ नासङ्गतिः ।

(आ, इ) द्वितीया, तृतीया च

अन्यत्र करणीयस्याप्यधिकरणान्तरे कृतिः ।
कर्तव्यार्थविरुद्धस्य करणं साप्यसङ्गतिः ॥६०॥

यथा—

निजहस्ते कुवलयं कर्तुकामेन पेषवा[2] ।
कृतानि दारहस्तेषु कुवलयानि विद्विषाम् ॥१९७॥

कुवलयं भूमण्डलं, निज[3]हस्ते [4]कर्तुकामेन स्वाय[5]त्तीकर्तुमभिलषता । पेषवा । [6]तृतीयान्तमिदम् । माधव[7]रायेण विद्विषां दारहस्तेषु कुवलयानि कुत्सितकङ्कणानि कृतानि तेषां [8]सञ्जातदुर्दशत्वात्, इति भावः ।

कर्तव्यार्थतो विरु[9]द्धस्य करणं, यथा—

दरिद्रजनतायास्त्वं दारिद्र्यं छेत्तुमुद्यतः ।

---

*Karika 60.* *Asangati, again, occurs when something meant to be done in a particular location, is done in a quite different location and also when something is done contrary to what was originally meant to be done.*

197. The Peṣava, desiring to take the कुवलय (=the globe of earth) in his own hand, has put कुवलयs (=inauspicious & contemptible bracelets) in the hands of his enemies' wives

198. O lord Madhava Peṣavā ! bent as thou art on destroying the दारिद्र्य (=poverty) of दरिद्रजनता (=the group of poverty-stricken people),

---

१. इदं वृत्तिवाक्यं केवलं आ पुस्तके दृश्यते, अ पुस्तके नास्ति. २. अत्र आ पुस्तकस्था टिप्पणी—'तृतीयान्तमिदं, "सोमपा" शब्दवत्, व्युत्पत्तेः पूर्वं दर्शितत्वात् ।' इति. ३. 'हस्ते'—अ. ४. 'कर्तुं'—अ. ५. 'स्वायत्तीकर्तुमभिलषता' इति नास्ति पुस्तके. ६. 'तृतीयान्तमिदम्' इति नास्ति पुस्तके. ७. 'माधवरावेण'—अ; 'माधवेन'—आ. ८. 'दुर्दशत्वादिति'—अ. ९. 'विरुद्धकरण'—अ.

करोषि तस्या दारिद्र्यं पेषवामाधवप्रभो . ॥१९८॥

जनानां समूहो जनता। दरिद्रा चासौ जनता चेति तथोक्ता। तस्याः। दरिद्रभिक्षुसमूहस्य, इत्यर्थः। दारिद्र्यं छेत्तुं नाशयितुमुद्यतस्त्वं तस्या दरिद्रजनताया दारिद्र्यं करोषि। दरिद्रजनस्य भावो दरिद्रजनता दारिद्र्यपर्यवसन्ना, तस्या दारिद्र्यं राहित्यं करोषि। दरिद्रजनतादारिद्र्यविनाशने प्रवृत्तस्त्वं तद्विरुद्धं दरिद्रजनतादारिद्र्योत्पादनं विधत्से, इत्यर्थः। यद्वा, भावे 'तल्'प्रत्ययश्लेषं विनापि दरिद्रजनताया दारिद्र्यविच्छेदे कृते विशेषणाभावप्रयुक्तविशिष्टाभावरूपस्य दरिद्रजनतादारिद्र्यस्योत्पादनं करोषीत्यर्थः।

## ३९. विषमम्

### (अ) प्रथमम्

घटनाननुरूपस्य द्वयस्य वर्ण्यते यदि।
यत्र तत्र तदा प्रोक्ता विषमालङ्कृतिर्बुधैः ॥६१॥

अननुरूपस्य द्वयस्य अननुरूपयोर्द्वयोः, इत्यर्थः।

यथा—

असङ्ख्याः क गुणा राजन्! भवतो गुणसन्निधेः।
कुण्ठिता ■ कवेर्बुद्धिः परार्धप्रान्तचुम्बिनी ॥१९९॥

---

thou renderest दारिद्र्य (= destitution) to दरिद्रजनता (= the state of being poor, i.e. poverty).

***Kārikā 61.*** *When the association of two things that are incongruous is narrated, there the figure Visama has been declared by the learned.*

199. Whither, O king, the innumerable good qualities of you who are a real store-house of good qualities and whither the poet's blunted talent grazing within the skirts of the figure परार्ध (=the number 100,000,000,000,000.000)!

---

१. इमानि पदानि न सन्ति आ पुस्तके. २. 'दारिद्र्यरूपेत्यर्थः'—आ. ३. नास्ति आ पुस्तके. ४. '०दारिद्र्यस्योत्पादनं'—आ. ५. 'यद्वा...करोषीत्यर्थः' इति वाक्यं केवलं ■ पुस्तके वर्तते, ■■ पुस्तके नास्ति. ६. 'गुणसन्निधौ'—अ. ७. 'परार्ध्यप्रान्तचुम्बिनी'—अ; 'परार्ध्यप्रान्तगामिनी'—आ.

संश्लेषोऽपि निधिश्चेति, तस्य ।

अत्र गुणानामसङ्ख्येयत्वेन कविबुद्धेश्च परार्धसङ्ख्यातोऽग्रे स्खलितत्वेनाननुरूपयोर्द्वयोर्घटना वर्णिता, इति विषमालङ्कारः ।

(आ) द्वितीयम्

**कार्ये विरूपता यत्र विषमालङ्कृतिः परा ।**
**विभावनामध्यगतां वदन्त्येके बुधास्त्विमाम् ॥६२॥**

यथा—

तेवासिधाराकालिन्दी नयन्ती स्पृशतो दिवम्
प्रतापतपनं सूते नीलाप्युज्ज्वलमद्भुतम् ॥२००॥

अत्र श्यामादुज्ज्वलस्य विरूपकार्यस्योत्पत्तिः । परं ■ कार्यात्कारणोत्पत्तिरूपविभावनासङ्कीर्णेयं विषमालङ्कृतिः ।

यथा वा—

सुवीर्यपाणिग्रहणा ■■ राजन् ! कृपाणिका ।
प्रतापतपनं सूते श्यामाप्युज्ज्वलमद्भुतम् ॥२०१॥

---

***Karika 62*** *Another variety of Visama occurs when an effect is described to be contrary in nature (to its cause) Some authorities, however declare this figure to be included among the varieties of Vibhāvanā*

200 How strange Kalindi (= the river Yamunā said to be a daughter of the Sun) in the form of the edge of thy sword conducting to the heaven those who touch it, though dark-blue gives rise to the lustrous Sun in the form of thy majesty.

201 What a wonder, O king! Thy कृपाणिका (= ■ dagger or small sword represented here also as ■ woman) that is सुवीर्यपाणिग्रहणा (=1. held in hand by a highly valorous hero, 2. married to a highly valorous or vigorous hero), though श्यामा (=1 dark-blue in colour; 2 a special type of young damsel sixteen years of age), brings forth the brilliant Sun in the form of thy majesty.

---

१. 'विरचन'—अ. २. प्रागुदाहृतः १९३तमोऽयं श्लोकः. ३. 'श्यामादिरूपकार्य०'—अ. ४. 'इय विषमालङ्कृतिः' इति पदद्वयं नास्ति अ पुस्तके. ५. 'यद्वा'—आ. ६. 'श्यामा युज्ज्वलमद्भुतम्'—आ.

प्रतापतपनः सोऽयमुल्लङ्घ्य मेदिनीं [illegible]।
उज्ज्वलोऽपि सृजत्यर्थं मालिनं त्वयशो द्विषाम् ॥२०२

सुवीर्यस्य पराक्रमशालिपुंसः पाणिना ग्रहणं यस्याः सा तथोक्ता, सुवीर्यकृतं पाणिग्रहणं परिणयनं यस्याः सा तथोक्ता च। श्यामा नीला षोडशवार्षिकी च। पराक्रमिपुरुषपरिणीतायाः श्यामाया युक्तमेतत्, इत्यर्थो ध्वन्यते मेदिनीं पृथिवीमुल्लङ्घ्य गतः द्वीपान्तरेऽपि प्रसृतः, मेदिनीं पृथुनितम्बजघनशालिनीं काञ्चिदुपेक्ष्यान्यां प्रति गतश्च व्यभिचार्युत्पन्नं मलिनं भवतीति युक्तमेतत्, इति ध्वन्यते

पूर्वश्लोके श्यामादुज्ज्वलस्य विरूपकार्यस्योत्पत्तिर्वर्णिता, द्वितीये चोज्ज्वलप्रतापतपनाद्विरूपकार्यस्यात्यन्तमलिनस्य शत्रूणामपयशोरूपस्योत्पत्तिस्तथा, इति विषमालङ्कृतिः।

एके केचनालङ्कारिकाः, इमां विषमालङ्कृतिं, विभावनामध्यगतां विभावनान्तर्भूतां, वदन्ति। तन्मते कारणक्रमविरुद्धाच्छ्यामादुज्ज्वलोत्पत्तिरूपा पञ्चमी विभावनेयं, विलक्षणगुणशालित्वे [illegible] विषमम्।

(६) तृतीयम्

**इष्टार्थं यतमानस्यानिष्टं चेत्प्रत्युत भवेत्।**
**इष्टालाभे तदापि स्याद्विषमालङ्कृतिः परा ॥६३॥**

---

202 The very Sun in the form of (thy) majesty, that has gone abroad transcending or disregarding मेदिनी (=1. the earth; 2. a young woman endowed with massive loins and buttocks), though himself bright, procreates a dark substance, viz the ill-repute of the enemies.

***Kārikā 63.*** *If, to someone trying for a desired object, comes, on the contrary, some evil result, following the non-acquirement of the desired object, then, too, another variety of the figure Viṣama occurs*

---

१. पदं नास्त्युभयोरपि [illegible] आ पुस्तकयोः. २. 'सुवीर्येण सह' —आ. ३. अत आरभ्य ग्रन्थभागः [illegible] पुस्तकेऽपि विद्यते. ४. 'चेत्प्रत्युतं' इति पाठस्त्रिष्वपि [illegible] आ [illegible] पुस्तकेषु.

यथा—

आखुं भक्षितुमुत्फालं तन्वन्नोतुः ससम्भ्रमम्
खड्गोऽन्तरा निपतितो गत आखुः स्वयं हतः ॥२०३॥
तदेतदोतुखड्गीयन्यायेन भवतो द्विषः ।
जीवनोपाय उद्युक्ता म्रियन्तां दैवनोदिताः ॥२०४॥

(ई) चतुर्थम्

C. अनिष्टोपलम्भमात्रेऽपीदं भवति ।

यथा—

राज्ञा राजान्तरं राजन्न विश्वस्यं[2] कदाचन ।
द्विजराजः श्रितो हर्तुं वाञ्छति त्वन्मुखश्रियम् ॥२०५॥
घर्ममपनेतुमाश्रितचन्द्रं राजानं प्रति कस्यचिदुक्तिरियम् ।
अत्र मुखश्रीहरणरूपस्यानिष्टस्योपलम्भः, न त्विष्टालाभोऽपि ।

(उ) पञ्चमम्

D. इष्टानुपलम्भमात्रेऽपि विषमं भवति ।

---

203 The cat was making a hasty jump with a view to devouring the mouse; but the sword fell in the middle, the mouse ran away and the cat was itself killed.

204. May your enemies, striving for their livelihood, perish driven away by Fate following this illustration of the cat and the sword!

C. (No Kārikā) *This figure (viz., Viṣama) occurs also when there is mere occurrence of an evil result (i.e. not supplemented by the non-acquirement of the desired object,)*

205 O king ■ king must never trust in another king The moon (lit the king of the twice-born), resorted to by thee (for relief from heat), desires to rob away the beauty of thy face.

D. (No Kārikā) *Viṣama occurs also when there ■ mere non-acquirement of the desired object (i.e. not supplemented by a mishap).*

१. 'अनिष्टोपलम्भमात्रेणापीदं भवति, यथा'—अ; 'अनिष्टोपलम्भमात्रे विषमं यथा'—आ; 'अनिष्टोपलम्भमात्रे यथा'—इ. २. 'विश्वस्यमिति स्फुटम्'—आ. ३. '०मात्रेणापि'—अ. ४. इदं पदं नास्ति आ ■ पुस्तकयोः.

यथा—

कैलासमुद्धरन् शम्भुन्यस्तभारनमद्भुजः ।
दशास्यो लज्जित इति स्मयन् शम्भुर्मुदेऽस्तु वः ॥२०६॥

अत्रेष्टानुपलम्भमात्रं, न त्वनिष्टावाप्तिरपि; निजभक्ते रावणे तथा भारान्यसनात् ।

## ४०. समम्

(अ) प्रथमम्

अनुरूपयोर्द्वयोर्यत्र क्रियते यदि वर्णनम् ।
तर्हि तत्र परिज्ञेयं समालङ्करणं बुधैः ॥६४अ ॥

यथा—

गङ्गा यथा वारिनिधिं समागता
ज्योत्स्ना यथा शीतरुचिं समाश्रिता ।
कान्तिर्यथा मौक्तिकहारसङ्गता
कीर्तिर्नृप त्वामनुरूपमाश्रिता ॥२०७॥

यथा वा—

देवसेनेव सेनान्यं श्रीर्यथा पाकशासनम् ।

---

206. May God S'iva stand for your happiness!— God S'iva who is smiling because Ravaṇa, while lifting the mountain Kailāsa, was abashed as his arms bent low by the weight imposed by God S'iva (himself).

***Karikā 64a.*** *If there is a description of two things as fitting each other, there should be recognised the figure Sama by the intelligent.*

207. Glory, O king, has [illegible] to thee that art worthy of it, [illegible] the Ganges has united with the ocean [illegible] the moonlight has taken recourse to the moon, as lustre subsists in a pearl-necklace

208a. The Earth shines immensely [illegible] securing as her lord Mādhava who is worthy of her, like देवसेना (=1 the army of gods commanded by Kārttikeya; 2. the wife of Karttikeya) on securing

---

१. 'भक्तिमति'—आ, इ. २. 'तदा'—आ.

अनुरूपं पतिं प्राप्य माधवं भूर्विभात्यरम् ॥२०८अ॥

(आ) द्वितीयम्

कारणेन हि कार्यस्य सारूप्यमपि तद्विदुः ॥६४आ॥

रत्नाकरोद्भवा यास्ते नररत्नाश्रितोचिता ॥२०८आ॥

नृरत्नं नरश्रेष्ठो विष्णुः, तस्याश्रयणाद्दम्पतिभावसम्बन्धेन परस्पराश्रयाश्रयिभावसम्भवात् ।

द्वितीयविषमप्रतिद्वन्द्वीदं समम् ।

यथा वा—

मित्रतापस्य वसतिः कालकूटस्य सोदरः ।

चन्द्रः सोऽयं तपति मां प्राप्तमेतत्कुसङ्गतिम् ॥२०९॥

मित्रतापस्य सूर्यतेजसः चन्द्रे सूर्यकिरणप्रवेशनमागमसिद्धम् । 'मित्र'पदश्लेषात् सुहृदि न्यस्तवस्तुनो यथेच्छं विनियोगः कर्तुं शक्यः, इत्यर्थो ध्वन्यते ।

पूर्वोदाहरणे कारणस्वभावानुरूप्यम्, इह [illegible] कुसङ्गत्यागन्तुकदुष्टस्वभावानुरूप्यम्, इति विशेष । लक्षणेऽपि कार्यकारणोपादानमुपलक्षणम् ।

---

Kartikeya the commander in-ch ef (of gods) and like the Heaven on securing Indra;

*Karikā 64a. The conformity of* [illegible] *effect with its cause, too, is regarded as Sama.*

208 a — (The Earth) who, having got her origin from रत्नाकर (— 1. a mine of jewels ; 2. the ocean), deserves to be included among those who take shelter of the man-jewel (viz , God Viṣṇu.).

209. This moon who is a receptacle of the Sun s heat and is a uterine brother of the deadly poison called Kalakuṭa, is tormenting me who have fallen in the evil company of this person.

---

१. अत आरभ्य चित्रालङ्कारव्याख्यारम्भं यावद्भागः केवलं [illegible] पुस्तक उपलभ्यते, आ [illegible] पुस्तकयोस्तु न दृश्यते. २. 'नृरत्नाश्रितोचिता'—इत्याधारभूत [illegible] पुस्तकस्थः पाठः. ३. 'वसतिर्यः कालकूटस्य सोदरः '— इत्याधारभूत अ पुस्तकस्थः पाठः. ४. 'प्राप्तमेतत्कुसङ्गिनः'—इत्याधारभूत [illegible] पुस्तकस्थः पाठः.

(इ) तृतीयम्

यदर्थं कर्तुमुद्युक्तस्तदवाप्तिर्भवेद्यदि ।
विनानिष्टं तदाप्याहुः समं काव्यार्थकोविदाः ॥६५॥

'इष्टार्थं यतमानस्यानिष्टं चेत्प्रत्युत भवेत्—' इत्यादित्रिविधस्यापि विषमस्य प्रतिद्वन्द्वीदं समम्, इष्टावाप्तेः सत्त्वादनिष्टावाप्तेरभावाच्च ।

यथा—

श्वोऽश्वो देयो हि भवत इति राज्ञा समीरितम् ।
श्वस्तु समीरितं नाद्य लब्धोऽश्वस्तेन भिक्षुणा ॥२१०॥

यद्यपि 'नाद्य—' इत्यत्राद्यकालस्यैव निषेधः, तथापि पूर्वदिवसोदित-'श्वः'कालस्यैव 'अद्य' इत्यनेन वाच्यतया 'श्वः'कालस्यैव निषेधो लभ्यते । 'श्वो नेत्युदीरितं पश्चात्—' इति वा पाठः । तथा च, 'न श्वः' = 'अश्ववः' इत्यर्थे पर्यवसानाच्छ्लेषमहिम्ना तुरगप्रतीतिः ।

(ई) चतुर्थम्

E. इष्टार्थावाप्तिसत्त्वेऽपि श्लेषवशादसतोऽनिष्टार्थस्यापि यत्र प्रतीतिः, तत्रापि समालङ्कारः स्वीक्रियते ।

यथा—

न नूनं भोजनं कार्यमिति वैद्यैः समीरितम् ।

---

**Karikā 65.** *If there is the acquirement, without any mishap, of the object for which one is endeavouring then too, poeticians declare the figure Sama.*

210. The king uttered 'Tomorrow shall a horse be given to you." He said 'tomorrow' and not 'today', but the beggar duly procured the horse.

E. (*No Kārikā*) *When, along with the presence of the acquirement of the desired object, there also arises the apprehension, due to pun, of something (or, of a sense) undesirable and non-existent (i.e. unintended) or unfavourable, then, too the figure Sama is taken to occur.*

211. The revered physician pronounced "न नूनं भोजनं कार्यम्" (1. "Verily food must not be taken,' = the physician's sense; 2. "Food should not be taken in small quantity, i.e. should be taken in big

तदेव भोजनं [illegible] वैद्यस्याज्ञा न लङ्घिता ॥२११॥

'न नूनं भोजनं कार्यम्' इत्यस्यार्थद्वयम्– १ "नूनं निश्चितं भोजनं न कार्यम्"; २ "'नु' वितर्के, अल्पं भोजनं न कार्यम्"; इत्यपि। तत्राद्योऽर्थो वैद्याभिप्रेतः। द्वितीयस्तु श्लेषलब्धो नान्तरीयकः, 'न नु ऊनम्' इतिपदच्छेदात् 'तदेवानूनं भोजनमेव कृत्वा वैद्याज्ञा न लङ्घिता' इति विरोधाभासः। 'भोजनं न कार्यम्' इति वैद्योक्ताकरणेन विरोधः। वैद्यमुखादवगत एवार्थोऽनूनभोजनरूपः कृतः, इति परिहारः। 'भोजनं न कार्यम्' इत्यर्थान्तरप्रतीतिसद्भावेऽपि, 'ऊनमल्पं भोजनं न कार्यम्' इति वस्तुसदर्थान्तरमादाय समालङ्कारोऽप्यस्त्येव। एवं च, 'भोजनं न कार्यम्' इत्यर्थान्तरमादायानिष्टार्थस्य वैद्याज्ञोल्लङ्घनरूपस्य प्रतीतिसत्त्वेऽपि वैद्याज्ञानुल्लङ्घनरूपेष्टावाप्तिर्भवत्येव

ङ) पञ्चमम्.

F. अनिष्टार्थप्रतीतिं विना श्लेषलब्धसदिष्टावाप्तिप्रतीतिर्यत्र, तत्रापि समम्।

यथा—

श्रुतिगतार्थसायुज्याप्तये तोये तपस्यता।
चक्षुर्जन्मनि तेऽब्जेन सम्यग्लब्धं समीहितम् ॥२१२॥

राज्ञोऽवरोधे कस्याश्चित्काञ्चित्प्रत्युक्तिरियम्। श्रुतेर्वेदाद्गतोऽवगतोऽर्थ ईश्वरः। श्रुती कर्णौ, तौ गतोऽर्थो नेत्ररूपोऽपि।

अत्र श्रुतिगतनेत्रार्थसायुज्यप्राप्तौ श्लेषेणेश्वरसायुज्यप्राप्तिरूपेष्टावाप्तिः। पूर्ववदनिष्टावाप्तिप्रतीतिरिह नास्ति, इति समालङ्कारः

---

quantity.' = the sense gathered by the patient). By taking that very (i.e. big) quantity of food [illegible] has not violated the physician's direction.

F. (No *Kārika*) *When there arises the apprehension, due to pun, of the acquirement of something desired and agreeable without a reference to anything undesirable, then, too, Sama occurs.*

212. The lotus, practising austerities in water with [illegible] view to securing श्रुतिगतार्थसायुज्य (= 1. identity with something dwelling [illegible] ears, i. e. with eyes; 2. intimate union with the substance, viz God, that is inferred from the Vedas), has thoroughly attained its desire in its incarnation in the form of thy eyes.

## ■ १. विचित्रम्

विपरीतफलेच्छायां तद्यत्नश्चेद्विधीयते ।
विचित्रालङ्कृतिस्तत्र प्रोक्तालङ्कारकोविदैः ॥६६॥

यथा—

द्विषतां मुखानि मलिनी-
कर्तुं कीर्त्या धवलयसि जगत्त्वम् ।
शैत्यं कर्तुं सुहृदां
विकिरसि प्रतापदहनमपि ॥२१३॥

यथा वा—

प्रणमति गुणिजनवर्गं नरेन्द्रवन्द्योऽपि राघवः[2] सुज्ञः ।
लब्धुं सूज्ञतपदवीं गुणज्ञगुण्येषु निखिलेषु ॥२१४॥

## ४२. अधिकम्

### (अ) प्रथमम्

आधिक्यं विपुलाधारादाधेयस्य तु वर्ण्यते ।
अधिकालङ्कृतिस्तत्र विज्ञेया काव्यवित्तमैः ॥६७॥

---

*Kārika 66. If an effort expected to produce a certain effect* ■ *put forth with a desire to procure a reverse effect the figure in that case is declared to be Vicitra by rhetoricians.*

213 With ■ view to darkening the faces of thy adversaries thou brightenest the world with thy glory, and with ■ view to rendering coolness to thy friends thou also scatterest the fire in the form of thy valour or majesty.

214. Rāghava, though himself very earned and adorable even by kings, bends low before the mass of meritorious people with a view to earning a very high position among the entire appreciative and virtuous persons.

*Kārikā 67. If the contained* ■ *represented to be vaster than the container that is spacious, the figure Adhika is to be recognised by persons highly versed in Poetry.*

---

१. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि ■ आ ■ पुस्तकेषूपलभ्यते.

२. 'माधवः'—आ.

यथा—

जगतां त्रितयं यत्र सावकाशतया स्थितम् ।
ब्रह्माण्डे तत्र नो मान्ति गुणा माधवपेशवः ॥२१५॥

यथा वा—

स्थितः स विष्णुर्हृदि सावकाशं यस्योदरे त्रीणि जगन्ति मान्ति ।
समागतैः पात्रविशेषमुख्यैर्जाता मुदस्ते हृदये न मान्ति॥२१६॥

प्रकृतराजानं प्रति कस्यचित्कवेरुक्तिरियम् । 'हे राजन्' इति शेषः । ते हृदि स विष्णुः सावकाशमसम्बाधं । विषयान्तरसञ्चाराभावादिति भावः । यथा तथा स्थितः । स ■ ?– यस्योदरे त्रीणि जगन्ति मान्ति । अत्रापि 'सावकाशम्—' इत्यन्वेति ।

(आ) द्वितीयम्

आधेयाद्विपुलाद्यत्राधिकरणाधिक्यवर्णनम् ।
तत्रापि विबुधैरन्याधेकालङ्कृतिरिष्यते ॥६८॥

यथा—

ब्रह्माण्डमेतद्विपुलं वितर्कतो
ज्ञायेत नारायणराय[3]भूपतेः ।

---

215. The good qualities of Madhava Peṣava are not contained (i.e. do not find sufficient accommodation) in the Universe (lit. Brahmadeva's Egg) in which (even) the triad of worlds has been conveniently accommodated.

216. The joy springing up on account of the prominent distinguished worthies assembled (here) could not be contained in thy heart wherein spaciously dwells that very Viṣṇu in whose belly are contained the three worlds.

***Kārikā 68.*** *Where the container is described to be vaster than the contained that is spacious, there too, another variety of the figure Adhika is declared by the learned.*

217. This universe (lit. Brahman's Egg) can be decided by means of conjecture to be greater than king Nārāyaṇarāya, since

१. 'राघवपेशवः'—ह. २. 'यथा इति पदं नास्ति त्रिष्वपि अ आ इ पुस्तकेषु. ३. 'नारायणरावभूपतेः'—अ, आ, इ.

यतोऽतिसङ्ख्योऽपि महान्गुणाकरः
सम्बोधतो यत्र गतः समाप्तताम् ॥२१७॥

४३. अल्पम्

अल्पाधेयाद्यदाल्पत्वमाधारस्य प्रतीयते ।
तदाल्पालङ्कृतिः प्रोक्तालङ्कारनिपुणैर्बुधैः ॥६९॥

यथा—

तवारिपत्न्यङ्गविभूषणानां
जातोऽन्यथाभाव अहो विचित्रः ।
देवोर्मिकां[2] कङ्कणतां प्रयाता[3]
काञ्चीगुणत्वं हि गतोऽङ्गदोऽपि ॥२१८॥

४४. अन्योन्यम्

परस्परोपकारो यद्वर्ण्यते यत्र तु द्वयोः ।
अन्योन्यमिति हि प्रोक्तोऽलङ्कारस्तत्र तद्बुधैः ॥७०॥

यथा—

नैयायिकाद्यैः किल पण्डितौघै-
र्विभाति राजेन्द्र ! सभा त्वदीया ।

---

therein has been exhaustively contained, after being thronged with even his vast mine of good qualities passing enumeration.

**Kārikā 69.** *When the container is shown to be smaller than the contained that is small, the figure Alpa is declared by the authorities versed in rhetoric.*

218. Ah ! Strange is the course of alteration of the ornaments on the bodies of thy enemies' wives. O king ! verily their finger-ring has become their bracelet and their armlet has attained the characteristics of their girdle-string.

***Karika 70.*** *When two things are represented as obliging each other, there the figure known as Anyonya is declared by the authorities.*

219. O lord of kings ! verily thy royal court (or court-chamber) shines on account of the groups of Panḍitas headed by the Justices

---

१. 'ोलङ्काररसिकेबुंधैः'—आं. २. 'नृपोर्मिकाः'—आ. ३. 'प्रयाताः'—आ.

त्वत्प्रीतये चर्चितशास्त्रसाराः
कृतादरास्तेऽपि तथा विभान्ति ॥२१९॥

यथा वा—

तताक्षो नयति ग्रन्थिं स्वमूर्धनि शनैः[1] शठः ।
तत्साहाय्येऽप्यूर्ध्वबाहुर्ग्रन्थिं नोज्झति सुस्तनी ॥
वाप्यास्तटे वटे राजन्दृष्टमेतत्कुतूहलम् ॥२२०॥

प्राप्तावसरस्य कस्यचिन्मर्मवादिनो राजानं प्रत्युक्तिरियम् । तताक्षो विततताक्षः । ग्रन्थ्युत्तोलने साहाय्यैकदृर्यां[2] कुचोपरि न्यस्तचक्षुः, इत्यर्थः । शठो धूर्तः कश्चन भारवाहकः । ग्रन्थिं शनैर्मन्दं[3] मन्दं । केनचिद्व्याजेनेति भावः । नयति[4] प्रापयति । तस्य भारवाहकस्य साहाय्ये तन्निमित्तमूर्ध्वबाहुः सुस्तनी पृथुस्तन्यपि[5] ग्रन्थ्युत्तोलनाय बाह्वोरूर्ध्वकरणाद्[6] दृश्यमानकुचा काचन भारवाहिकापि ग्रन्थिं नोज्झति । केनचिन्निमेषेण सापि विलम्बते, इत्यर्थः ।

अत्र स्वमूर्धनि ग्रन्थिनयने साहाय्यं कर्तुं प्रवृत्तायाः कस्याश्चित्[7]तदर्शन-लालसायाः केनचिद्यथा[8] बहुकालं मुखदर्शनदानार्थं ग्रन्थिकानयने[9] किञ्चि-न्निमेषेण विलम्बरूप[10] उपकारः [illegible] तयापि केनचिन्निमेषेण ग्रन्थिम-

---

(viz Ramaśāstri Prabhuṇe). Having for thy satisfaction gone through discussions regarding the [illegible] of the S'astras and having been conferred with honours, they, too, on their part, shine on account of it.

220. The rogue, with his eyes stretched wide, is slowly lifting the bundle to his head; the charming-breasted woman, too, while raising up her hand for helping him, is not quitting (quickly) the bundle.

O king! this curious incident was noticed by [illegible] below the banian-tree beside the large well.

---

१. 'शठः शनैः'—आ, इ. २. इदं पददयं नास्ति आ [illegible] पुस्तकयोः. तत्स्थाने 'तस्याः' इति पदं केवलं [illegible] पुस्तके ३. नास्ति [illegible] पुस्तकयोः. ४. पददयं नास्ति [illegible] इ पुस्तकयोः. ५. 'पृथुस्तनी' इति पदं नास्ति आ [illegible] पुस्तकयोः. ६. 'बाह्वोरूर्ध्व-करणेन नग्नस्तना'—आ. ७. 'कस्याश्चित्कुचदर्शनलालसेन केनचिथथा—'—आ, इ. ८. 'यथा' इति पदं नास्ति [illegible] पुस्तके. ९ 'कुचदर्शनलाभार्थं'—आ, इ. १०. 'ग्रन्थि-नयने'—आ. ११. 'विलम्बकरणरूपः'—आ; 'विलम्बः'—इ. १२. नास्ति [illegible] पुस्तके.

मुञ्चमानया सत्या निजकुचदर्शनलालसस्य तस्य बहुकालं कुचदर्शनदानाय विलम्बरूप उपकारः कृतः, इति भवति परस्परोपकारः ।

## ४५. विशेषः

### (अ) प्रथमः

विना प्रसिद्धमाधारमाधेयं यत्र वर्ण्यते ।
विशेषालङ्कृतिस्तत्र गदिता काव्यवित्तमैः ॥७१॥

यथा—

प्रतापच्छद्मना श्रीमद्राघवं भानुभानवः ।
समाश्रित्य विना सूर्यं तपन्ति निभृतादिषु ।२२१॥

अत्र प्रतापमिषेण सूर्यकिरणानां सूर्यरूपाधारं विनैव निशागह्वरादिषु तपनं वर्णितम् । राज्ञः प्रतापेन गुहादिगतानामपि शत्रूणां मनांसि परितप्यन्ते, एवं निशायामपि, इति फलितार्थः ।

यथा वा—

उदेति चन्द्रः शङ्खे
कमले मुक्ताः प्रवालमपि चन्द्रे ।
सार्वभौमाद्य दृष्टं
सर्वं तत्कनकलतिकायाम् ॥२२२॥

---

*Kārikā 71. When a thing supported is represented as existing without its celebrated support, the figure Vis'eṣa is declared by best poeticians.*

221. The solar rays, resorting in the guise of majesty, to revered Raghava, blaze, even without the Sun, during the nights and in cavities.

222. On a conch-shell (i.e. the neck) appears the moon (i.e. the face) and on the moon appear two lotuses (i.e. the eyes) pearls (i.e. the drops of perspiration) and a coral (i.e. the lower lip). O Emperor! all this was observed today in that golden creeper (i.e. a fair and charming lady).

---

१. इदं पदद्वयं नास्ति आ पुस्तकयोः. २. 'विलम्बकरणरूपः'—आ; 'विलम्बः'—इ. ३. नास्ति पुस्तके. ४. 'सुधीभिस्तत्र गदिता विशेषालङ्कृतिर्नृभिः ।' इत्युत्तरार्धस्य पाठः पुस्तके. ५. 'काव्यपाठिभिः'—इ. ६. 'श्रीमन्माधव'—आ. ७. 'प्रतपन्'—अ,इ.

'कमले' इति प्रथमायाः द्विवचनम्। 'उदेति' इति वचनविपरिणामेनाग्रेऽप्यन्वेति।

(आ) द्वितीयः

यदैकं वस्तु कविना वर्ण्यतेऽनेकदेशगम्।
तदापि सा परिज्ञेया विशेषालङ्कृतिर्बुधैः ॥७२॥

यथा—

श्रीमाधवेनाहवतः परास्ताः कुन्ताग्रविद्धाः परिपन्थियोधाः।
पश्यन्ति वीरं रणकर्कशं तं पश्चात्पुरो दिग्विदिगन्तरेषु ॥२२३॥

यथा वा—

राघव! तवारिवर्गोऽनुभवति वनगो विसृष्टनिजवर्गः।
अन्तर्बहिरपि दिशि दिशि सा सा सेति प्रियाद्वैतम् ॥२२४॥

(इ) तृतीयः

यत्किञ्चित्कुर्वतः पुंसोऽशक्यवस्त्वन्तरं कृतम्।
भवेत्तत्रापि विज्ञेया विशेषालङ्कृतिर्बुधैः ॥७३॥

---

*Kārika 72. When one object is described to be present (simultaneously) in many places, then too, the figure is to be recognised as Vis'eṣa by the intelligent.*

223. The hostile warriors, wounded with tips of lances and vanquished in battle by revered Madhava, perceive that hero, merciless on battlefield, behind before and in various quarters and sub-quarters.

224. O Raghava! the host of thy enemies dwelling in the forest and having bidden farewell to their own people, experiences duality of their beloveds inside, outside and in every direction with the words "(There is) she", (There is) she", (There is) she.'

*Kārika 73. When a man in bringing about one result, accomplishes something else also which is impossible, then, too, is to be recognised the figure Vis'eṣa by the intelligent.*

---

१. इयं वाक्यद्वयात्मिका वृत्तिः ■ पुस्तके न दृश्यते. २. 'श्रीराघवेणा०'—इ. ३. 'दिग्विदिगन्तरेऽपि'—आ. ४. 'माधव'—आ.

यथा—

त्वामीप्सितप्रदातारं नीतिधर्मविशारदम् ।
सृजताभिनवाः सृष्टाः स्वर्द्रुरामयुधिष्ठिराः ॥२२५॥

यथा वा—

कुर्वता भवंता[1] सङ्गं कृता स्वर्द्रौ सुसङ्गतिः ।
अनुकूलयता हि त्वामनुकूलीकृतोऽर्थदः ॥२२६॥

## ४६. व्याघातः

### (अ) प्रथमः

तथाकार्यन्यथाकारि साधनं क्रियते यदि ।
व्याघातालङ्कृतिः प्रोक्ता तदा काव्यविदां वरैः ॥७४॥

तथाकारि साधनं यद्यन्यथाकारि तद्विरुद्धकारि क्रियते, तदा व्याघातोऽलङ्कारः ।

यथा—

कामो वामो मृगाङ्कोऽपि कलङ्की नृप ! तत्स्फुटम् ।
जगत्सौख्यकरैः पुष्पैः करैर्हेतो[2] वियोगिनः ॥२२७॥

---

225. The Creator, in creating thee who grantest the desired object and art proficient in Politics and in Religion, has created the celestial tree, Rama and Yudhishthira.

226. One, coming in contact with you brings oneself in the excellent association of the celestial tree. By propitiating thee one verily propitiates Kubera (lit. the wealth-yielder).

***Kārikā 74.*** *If a means which usually brings about a certain effect is represented as bringing about the contrary effect, the figure Vyaghata is declared by best rhetoricians.*

227. Cupid is adverse: the moon, too, is spotted (i.e. stained) Hence, O king ! it is obvious that they would kill the lovers separated from their beloveds by means of flowers and rays that (usually) render happiness to the world.

---

१. 'भवतः'—आ, इ. २. 'करैर्हन्तो'—अ, आ, इ.

करैः किरणैः। हस्तैरेव वियोगिनां हननकर्तरि कलङ्को युक्तः, इत्यपि ध्वन्यते ।

अत्र लोके सुखसाधनत्वेनावगतानि पुष्पाणि चन्द्रकिरणाश्च सुख-विरुद्धदुःखसाधनीकृतानि ।

(आ) द्वितीयः

यत्साधनीकृतं वस्तु केनाचिदपरेण ।
तद्विरुद्धसाधनतां नीयतेऽत्रापि तं विदुः ॥७५॥

यथा—

कान्तश्चन्द्रकरैस्तप्तां प्रियां चिरसमागतः ।
करेणैवामृशञ्शैत्यं नयंश्चन्द्रं जयत्यरम् ॥२२८॥

अत्र चन्द्रेण परितापसाधनीकृताः करा नायकेन तु संतापविरुद्ध-शैत्यसाधनतां नीताः। अरमत्यन्तं, जयति कान्त्या जितमपि कर्मणापि जयति, इत्यर्थः। चन्द्रेणानेककरैः कार्यं सम्पादितम्, अनेन त्वेकेनैव करेण सम्पादितम्। अत एवोक्तं 'कान्तः' इति, 'करेणैव' इति च ।

श्लोकद्वयमपि प्रस्तावसरस्य कस्यचिद्राजानं प्रत्युक्तिः ।

---

***Kārika 75.*** *If a certain thing used by someone as the means of a particular effect is used by another as the means of the contrary effect, then, too, they declare the same figure (viz., Vyāghāta).*

228. The lover, who is united after a long time with the beloved heated with numerous करs ( rays) by the moon and brings coolness to her by gently touching her with a single कर ( hand), highly surpasses the moon

---

१. अत उत्तरं 'हस्तैश्च' इत्यधिकं आ पुस्तके. २. 'वियोगिनां हस्तैर्हननकर्तरि कलङ्को युक्त इति भावः ' इति वाक्यपाठः आ पुस्तके. ३. नास्ति आ पुस्तके. ४. 'चन्द्रेणानेककरैः.....करेणैवेति च' इति भागो नास्ति आ पुस्तके ५. अतः पूर्वं 'कार्यं' इत्यधिकं आ पुस्तके.

(इ) तृतीयः

**सौकर्येण क्रिया यत्राप्युक्तकार्यविरोधिनी ।**
**निबध्यतेऽसौ तत्रापि व्याघातालङ्कृतिर्मता ॥७६॥**

यत्रापि सौकर्येण कार्यविरुद्धक्रियायां कारणस्य सुतरां तदानुगुण्येनोक्तकार्यविरुद्धा क्रिया निबध्यते, तत्राप्यसौ व्याघातालङ्कारः ।

यथा—

अशूरो दिवि गमनात्प्रबिभेति रणाङ्गणे ।
न बिभेति रणे शूरस्तस्मादेव तु कारणात् ॥२२९॥

राजानं प्रति कस्यचिदुक्तिरियम्[1] अशूरो दिवि गमनान्मरणाद्धेतोः,[2] रणाङ्गणे [3]बिभेति । शूरस्तस्मादेव कारणाद्दिवि स्वर्गे गमनादेव हेतोः, रणाङ्गणे न बिभेति ।

अत्र 'प्रबिभेति—' इत्युक्तकार्यविरुद्धा क्रिया 'न बिभेति—' इति क्रिया 'दिवि गमनात्—' इति कारणस्य तत्र सौकर्येणानुगुण्येन निबद्धा ।

## ४७. कारणमाला

(अ, आ) प्रथमा, द्वितीया च

**कृतो गुम्फस्तु कविभिर्यथाग्रेऽग्रान्तकारणैः ।**
**प्रोक्ता कारणमाला सालङ्कारनयगामिभिः ॥७७॥**

---

***Kārika 76.*** *Where the justification of the contrary of a said act is made by the same reason with facility, there, too, the figure Vyāghāta is held to occur.*

229. A coward is extremely terror-stricken on the battle-field on account of the apprehension of going to the heaven (i.e of death), a brave man, on the other hand is fearless on the battle-field on that very account (viz, of going to the heaven after death).

***Kārikā 77.*** *If poets string together a number of objects, each represented as cause of the preceding or of the succeeding one, the figure is termed Kāraṇamālā by rhetoricians.*

१. '...सौकर्येण कारणानुगुण्येनोक्तकार्यविरुद्धा...'—आ. २. 'इयम्' इति पदं नास्ति त्रिष्वपि अ आ इ पुस्तकेषु. ३. '०न्मरणात्कारणाद्रणाङ्गणे'—आ. ४. 'प्रबिभेति' —आ. ५. '०र्यंयाप्रक्रान्तकारणैः'—अ.

उत्तरोत्तरं प्रति कारणभूतैः पूर्वपूर्वैः, पूर्वपूर्वं प्रति कारणभूतैरुत्तरोत्तरैर्वा, कृतो यैः कविभिर्गुम्फः सा कारणमाला[1][2]लङ्कृतिः ।

यथा—

नयेन सकलं राज्यं राज्येन विभुता तया ।
मित्राणि मित्रैर्विजयो विजयेन यशःश्रियौ ॥२३०॥

द्वितीया[3], यथा—

भवत्यपयशोऽधर्मादधर्मोऽनयसम्भवः ।
अनयस्त्वसतः सङ्गात्तस्मात्सङ्गः सतां वरः ॥२३१॥

## ४८. एकावली

(अ, आ) प्रथमा, द्वितीया च

अर्थश्रेणी निबध्येत[4] गृहीतमुक्तरीतितः ।
एकावलीति विज्ञेयालङ्कृतिस्तत्र पण्डितैः ॥७८॥

उत्तरोत्तरस्य पूर्वपूर्वं प्रति विशेषणता, पूर्वपूर्वस्योत्तरोत्तरं प्रति विशेषणता वा, गृहीतमुक्तरीति[5] ।

तत्राद्या, यथा—

भालं भुवा भ्रूर्नयनाग्रभासा
नेत्राग्रभाः कर्णयुगाञ्जनेन ।

---

230. By political wisdom is brought forth entire sovereignty; from sovereignty results power; because of power arise friends; due to friends comes victory; and consequent to victory come glory and wealth.

231. Infamy results from unrighteousness unrighteousness results from evil conduct; evil conduct results from the company of the wicked Hence the company of the good is the choicest thing

***Karika 78.*** *If a series of objects are strung together, each being represented as the attribute of the preceding or of the succeeding object, there is to be recognised the figure Ekāvalī by the learned.*

232. King Nārāyanaraya's forehead appears charming [illegible] account of his brow, his brow on account of the sharp flash of his eye, the

---

१. नास्ति आ पुस्तके. २. 'कारणमालालङ्कारः'—आ, ई ३. [illegible] उत्तरं 'अधमाद्यः' इति वृत्तिः आ पुस्तके. ४. 'द्वितीयो'—अ, आ, इ. ५. 'अर्थश्रेणि-र्निबध्येत'—आ, इ.

कर्णौ ■ दोर्मूलयुगाञ्चनेन ।
विभान्ति नारायणराघराज्ञः ॥२३२॥

■■■ हि मालादीन्प्रत्युत्तरोत्तरस्य भ्रम्वादेर्विशेषणता, तृतीयान्तार्थानां करणानां विशेषणत्वेनैवान्वयात् ।

द्वितीया, यथा—

यस्याकाशोऽष्टमी मूर्तिस्तदर्धाङ्गहरा ■ या ।
तज्जनुर्यो विघ्नहर्ता तत्कान्ते त्वावतां नृप ! ॥२३३॥

अत्र पूर्वपूर्वस्य शिवप्रभृतेरुत्तरोत्तरं पार्वत्यादिकं प्रति विशेषणत्वम् ।

## ४९. मालादीपकम्

एकावलीदीपकयोर्योगो यदि निबध्यते ।
मालादीपकमित्युक्ता तदालङ्कृतिरुद्भटैः ॥७९॥

यथा—

हस्तो निपतितः खड्गे खड्गस्त्वरिशिरःसु ते ।
अरिशिरांसि भूपृष्ठे भूपृष्ठं कीर्तिमण्डले ॥२३४॥

---

sharp flash of his eye on account of the curve of his two ears and his ears ■■ account of the bending of his arm-pits

233. O king may the two mistresses (viz., Ṛddhi and Siddhi) of him (viz., Gaṇeśa), who, dispellor of obstacles ■■ he is, is born of her (viz., Pārvatī) who has seized half the body of him (viz., Śiva) whose eighth form is constituted by the Sky or Ether, protect thee !

*Kārikā 79. In case the figures Ekāvalī and Dīpaka are combined together, there occurs the figure termed Mālādīpaka by exalted authorities.*

234. Thy hand fell on thy sword, thy sword fell ■■ thy enemies' heads, thy enemies' heads fell on the surface of the earth and the surface of the earth fell within the ■■■ of thy glorious fame.

---

१. 'नारायणराघराज्ञः'—अ, आ, इ. २. '०इमा'—अ. ३ '०इसारोत्तर-पार्वत्यादिकं'—अ, इ.

अत्र[1] 'निपतितम्' इत्येकमेव पदं लिङ्गवचनविपरिणामेन सर्वत्रान्वेति। एवं च, वाक्यभेदाद्दीपकम्; एकावलीसत्त्वाच्चोभयोर्योगेन[2] मालादीपकम्। कीर्तिमण्डले आधारत्वोक्त्या भूतलतोऽप्यधिकदेशस्वर्गादिगामित्वं [3]कीर्तेर्व्यज्यते [4]कीर्तिमण्डलसम्बद्धं भूपृष्ठमित्येव बोधः

## ५०. सारः

श्लोकबद्धपदार्थानामुत्तरोत्तरतो यदि।
उत्कर्षः सुप्रतीयेत स सार इत्यलङ्कृतिः ॥८०॥

यथा—

अन्तर्यस्य त्रिलोकी स हरिरपि शरीभूय यस्याग्रहस्ते-
ऽतिष्ठत्तं यैकदेशेऽवहदलघुरथीभूय भूस्तामपीन्दुः।
आधाद्रथ्याङ्गभूतो नृप पृथुपरिधेरग्रभागे स चन्द्र-
स्त्वत्कीर्तेरुद्भटाया मुखमिव गगने केशभारस्तदस्याः॥२३५॥

तद्गगनमस्यास्त्वत्कीर्तेः केशभारः. गगनस्य श्यामत्वेन प्रतीयमानत्वात्।

---

***Kārikā 80.*** *If the things described in a verse are perceived to gradually rise in excellence, there is the figure known as Sāra.*

235. The three worlds are comprised in God Viṣṇu. That God Viṣṇu, too, having become an arrow, stood held in God S'iva's right hand. The Earth, having become a huge chariot bore God S'iva on a mere portion of herself. The moon, having become a wheel of the chariot, bore the Earth, too, on the main point of her huge circumference. That moon O king, is, as it were, the face of thy magnanimous कीर्ति (=glorious fame personified as a woman) in the sky and the sky is (as it were) her (=कीर्ति's) mass of hair.

---

१. इद पदं नास्ति क पुस्तके. २. 'ेयोंगान्मालादीपकम्'—आ. ३. 'कीर्तेः' इति पदं नास्ति आ पुस्तके. ४. 'बोधस्तु कीर्तिमण्डलसम्बद्धं भूपृष्ठमित्येव'—आ. ५. 'निजपरिवेशाग्रभागे'—अ. ६. 'केशपाशस्तदस्याः'—आ. ७. 'नीलत्वादिति भावः'—आ, इ.

यथा वा—

मुक्ताः स्वच्छास्ततस्तारास्ततोऽपि चन्द्रमाः शुचिः ।
ततोऽपि दुग्धपाथोधिस्ततोऽपि च सतां मनः ॥२३६॥

प्रस्तावसरस्य कस्यचिद्राजानं प्रत्युक्तिरियम् ।

## ५१. यथासङ्ख्यम्

क्रमिकाणां पदार्थानां क्रमेणैव समन्वयः ।
चिकीर्षितः कवेस्तत्र यथासङ्ख्यमुदाहृतम् ॥८१॥

यथा—

अपराद्धानि किमहो वा जीवात्यवराणि किम् ।
त्यज्यन्तेऽथ विभुज्यन्तेऽप्युदारेण धनानि यत् ॥२३७॥

केचिदेनमनुक्रमालङ्कारमाहुः ।

## ५२. पर्यायः

(अ) प्रथमः

पर्यायेण यदेकस्य वस्तुनोऽनेकवस्तुनि ।

---

236. Pearls are bright (or pure); stars are brighter (or purer) than pearls; the moon is brighter (or purer) even than stars; the Milky Ocean is brighter (or purer) even than the moon, and the sages' heart is brighter (or purer) even than the Milky Ocean

***Kārika 81.*** *If a reference, as meant by the poet, is made to objects in the same order in which they have already been mentioned, the figure is termed Yathāsaṅkhya.*

237. Oh wonder! Are riches crimes — the most offensive means for subsistence (or for the revival of life) that they are discharged and also plentifully enjoyed by a munificent person?

***Karika 82.*** *When the same thing is described as passing to*

---

१. 'राजानं प्रति कस्यचिदुक्तिरियम्'—अ; 'प्रास्तावरस्य राजानं प्रत्युक्तिरियम्'—इ. २. इदं पदं त्रिष्वपि अ आ इ पुस्तकेषु न दृश्यते. ३. अत्र गूलपुस्तकस्था टिप्पणी—"'जीवात्वमृतानि किम्' इति वा पाठः जीवातवोऽमृतानीवेति तथोक्तानि ।' इति आ पुस्तके.

गमनं वर्ण्यते [illegible] हि पर्यायालङ्कृतिर्मता ॥८२॥

(i) शुद्धपर्यायः

यथा—

चन्द्रं चुम्बति ते राजन् ! मुखश्रीरथ पङ्कजम् ।
शत्रावुद्यतखड्गस्य सूरं चुम्बति [illegible] पुनः ॥२३८॥

यथा वा—

अर्णवं [illegible] परित्यज्य पीयूषेण कृता स्थितिः ।
सद्वैद्यस्य करे वाचि सतां कान्ताधरेऽपि च ॥२३९॥

राजानं प्रति कस्याप्युक्तिरियम् ।

इमे च शुद्धपर्यायपद्ये ।

(ii) सङ्कोचपर्यायः

सङ्कोचपर्यायः, यथा—

भूतलादिषु पर्यट्य विश्रम्य गिरिसानुषु ।
उष्मोऽगादुदिते चन्द्रे रिपुनारीमनःसु ते ॥२४०॥

अत्रोष्मस्योत्तरोत्तरमाधारसङ्कोचात्सङ्कोचपर्यायः ।

(iii) विकासपर्यायः

विकासपर्यायः, यथा—

अभ्यस्तं कौशलं बाल्ये बाणमोक्षे त्वयानघ ।

---

*many places in succession, t]* [illegible] *figure is termed Paryaya.*

238. O king the grace of thy face kisses (first) the moon and then [illegible] lotus ; further, when thou raisest thy sword on thy enemy, it kisses the Sun.

239. The nectar, after abdicating the ocean, has made its residence in the hand of [illegible] expert physician, on the tongue of the sages and also [illegible] the lower lip of lovely damsels.

240. Heat, having roamed over the surface of the earth and other spheres and having reposed on summits of mountains, passed, at moon-rise, to the hearts of thy enemies' ladies.

241. O stainless hero ! in thy boyhood skill [illegible] acquired by [illegible]

---

१. 'कस्यचिदुक्तिः'—आ; 'कस्याप्युक्तिः'—इ. २. 'उष्णो०'—आ, इ.

अधुना विस्तृतं तद्धि दृश्यते सर्वकर्मसु ॥२४१॥
अत्र कौशलस्य पूर्वापरित्यागेनानेककर्मसु गमनाद्विकासपर्यायः ।

(आ) द्वितीयः

अनेकवस्तुनो यत्र भवनं त्वेकवस्तुनि ।
वर्ण्यते तत्र गदिता पर्यायालङ्कृतिः परा ॥८३॥

यथा—

दारिद्र्यौघः पुरा यत्राधुना तत्र धनोच्चयः
समाश्रितेषु लोकेषु माधवं कल्पभूरुहम् ॥२४२॥

## ५३. परिवृत्तिः

स्तोकवस्तुव्ययेनापि ग्रहोऽभ्यधिकवस्तुनः ।
वर्ण्यते तत्र गादिता परिवृत्तिरलङ्कृतिः ॥८४॥

यथा—

प्राणैः पणैर्यै कथमप्यलभ्या
यत्संनिधिः सन्निधिवत्समग्राः ।

---

in the art of discharging arrows. Now the ■■■ skill is found to have spread in all thy actions

***Karikā 83.*** *When many objects are described to be in the same place (in succession), another variety of the figure Paryāya is said to occur.*

242 Where formerly flew the current of poverty there now stands ■ heap of riches, now that people have taken shelter of Mādhava who is the celestial tree.

***Kārikā 84.*** *If ■ greater thing is described to be procured at the expense of ■ smaller thing, the figure Parivṛtti is said to occur.*

243. Revered Rāghava buys off, (simply) by means of money conferred with courtesy, even those invaluable Pandits all of whom ■■■

१. 'विसृत'—आ, इ. २. 'यथा' इति पद नास्ति विश्वपि अ आ इ पुस्तकेषु. ३. 'लाभो०'—आ, ■ ४. अत्र 'प्राणैः पणैर्यान्कथमप्यलभ्यान्गुणज्ञतैका प्रभवेत्प्रियन्तुम् । श्रीमाधवस्तानपि पण्डितान्स क्रीणाति नन्द-द्रविणैर्गुणज्ञः ' इति पाठः आ पुस्तके. तत्रैव च 'श्रीमाधवः' इत्यस्य स्थाने 'श्रीराघवः' इति ■ पुस्तके ।

श्रीराघवस्तानपि पण्डितान् स
क्रीणात्यमूल्यान्विनयार्पितार्थैः । २४३॥

[1]क्रीणाति । स्वानुरक्तान्करोतीत्यर्थः

[2]यथा वा—

[3]अहो वरेण्येन दधीचिना सता
जितं यतो जीर्णकलेवरव्ययात् ।
अस्थीनि दत्त्वा सुरराजभिक्षवे
क्रीतं यशः शाश्वतमिन्दुभासुरम् ॥२४४॥

[4]सत्यवसरे राजानं प्रति कस्यचिदुक्तिरियम् ।

## ५४. परिसङ्ख्या

तत्र चान्यत्र चासन्नं वस्तु यत्र नियम्यते ।
परिसङ्ख्येति गदितालङ्कृतिस्तत्रं तान्त्रिकैः ॥८५॥

[5]अनेकस्थितं वस्त्वेकत्र निषिध्यान्यत्र नियम्यते, तत्र परिसङ्ख्यालङ्कृतिः ।

---

on ■ account be won over ■■■ by stakes of life and whose presence is like a rich treasure

244. Ah strange! Dadhīci, the worthiest sage has won, since he has earned (lit bought) eternal glorious reputation splendid like the moon, by (merely) giving at the outlay of his decayed body, his bones to the lord of gods (viz. Indra) who had become ■ beggar.

***Kārika 85.*** *When a thing possible at two (or more) places is restricted to one (or some) of them, there occurs the figure termed Parisaṅkhyā by rhetoricians.*

१. 'स श्रीमधवनृपः प्राणैः पणैः कथमपि केनापि प्रकारेणालभ्यान्दुष्प्रापान्यानेकान् केवलं गुणज्ञतां नियन्तुं स्वायत्तीकर्तुं प्रभवेत्समर्थो भवेत्तानपि पण्डितान्द्रविणैर्धनैर्नन्दनात्मानं कृतार्थयन्सन्क्रीणाति स्वानुरक्तान्करोतीत्यर्थः ' इति वृत्तिः आ पुस्तके. तत्रैव च 'स श्रीमाधवनृपः' इत्यस्य स्थाने 'गुणज्ञः स श्रीराघवः' इति ■ पुस्तके. २. इदमुदाहरणं तद्वृत्तिश्च आ इ पुस्तकयोर्नं दृश्यते. ३. '०लङ्कृतिः शास्त्रकोविदैः'—आ; '०लङ्कृतिस्तन्त्रवित्तमैः'—इ. ४. 'इमं वृत्तिर्नास्ति आ पुस्तके. ५. 'परिसङ्ख्या'—इ.

यथा—

काले जहाति कौटिल्यं चन्द्रं देशे भुजङ्गमम्
काले वा कापि देशे वा न श्वपुच्छं खलं तथा ।२४५॥

[1]राज्ञः पुरः प्राप्तावसरस्य कस्यचिदुक्तिरियम् । काले कालविशेषे । देशे देशविशेषे । पूर्णिमायां बिले च

[2]अत्र 'जहाति–' इत्यनेन कौटिल्य चन्द्रभुजङ्गमयोर्निर्विध्य श्वपुच्छ-खलयोर्नियन्त्रितम् । अत्र निषेधः शाब्दः ।

[3]आर्थो निषेधः, यथा—

कौटिल्यं कविसूक्तिवामनयनापाङ्गेक्षितेषु स्थितं
शब्दो मार इति श्रुतो रतिपतेर्नामावली केवलम्
दारिद्र्यं तु दरिद्रिणामधिपतिर्यत्रास्ति भर्गः स्वयं
नम्रो दुःखहरा मुदं वितनुतां वाराणसी सा पुरी ॥२४६॥

## ५५. विकल्पः

[4]विरोधे तुल्यबलयोर्विकल्पः क्रियते यदि ।

---

245. Crookedness quits the moon in due time and (it quits) a serpent at a due place. But in no time and at no place does it quit the dog's tail and the wicked.

246. May the city of Benares that dispels misery bestow delight (on thee)!—the city of Benares where कौटिल्य (=1. crookedness; 2. dishonesty; 3. equivocation or a roundabout mode of speech, etc.) exists (only) in fine utterances of poets and in side-glances of charming-eyed ladies, where the word 'मार' (=1. one who kills; 2. the God of Love) is heard only in the list of names of Rati's husband (viz. Cupid) and where distressed circumstances prevail only where God Śiva the naked lord of indigent people resides in person (i. e. in the cemetery).

***Kārikā 86.*** *When two things, of equal force and opposed to each*

---

१. 'राजानं प्रति प्राप्तावसरस्य कस्यचिदुक्तिरियम्'—आ; 'प्राप्तावसरस्य राजानं प्रत्युक्तिरियम्'—इ. २. 'अत्र जहाति...निषेधः शाब्दः' इति वृत्तिभागो नास्ति आ पुस्तके. इ पुस्तकेऽप्ययं शोधरूपेण विहितो दृश्यते. ३. 'आर्थो निषेधो.. वाराणसी सा पुरी' इति भागो नास्ति आ पुस्तके. इ पुस्तके त्वय शोधरूपेण विहितो दृश्यते. ४. 'विरोधे तुल्यबलयोर्गमकं नैव लभ्यते ।' इति पूर्वार्धपाठः आ पुस्तके.

विकल्पालङ्कृतिस्तत्र सन्देहाद्धि विलक्षणा ॥८६॥

यथा —

[1]विजयोऽद्याथ वा स्वर्गो नियतो मे रणाङ्गणे ।
इति निश्चित्य विजयी शूरः [illegible] रणे ॥२४७॥

[2]अत्रोत्कर्षसम्पादकतया तुल्ययोर्जयस्वर्गयोर्यौगपद्यासम्भवाद्विकल्पः ।

यथा वा—

स्वर्द्रू[3] राघवरायो वा काङ्क्षितं लब्धुमिच्छता ।
कान्ताधरो वा पीयूषं सेव्यतां तृप्तिमिच्छता ॥२४८॥

[4]अत्राभीष्टदातृतया तुल्ययोः कल्पवृक्षराघवयोरास्वाद्यत्वेन तुल्ययोः पीयूषकान्ताधरयोश्च सेवनस्य यौगपद्यासम्भवाद्विकल्पः ।

[5]सन्देहे विरोधो नैककालिकः, अत्र [illegible] सोऽस्त्येवेति शेषः ।

## ५६. समुच्चयः

(अ) प्रथमः

सम्भाव्यमानयुगपद्भावबह्वर्थगुम्फनम् ।
क्रियते तत्र गदितोऽलङ्कारः स समुच्चयः ॥८७॥

---

*other, are put forth as alternatives, there occurs the figure Vikalpa which is distinct from the figure Samdeha.*

247. Today either victory or the heaven is destined for me on the battle-field"— with this resolve a brave victor puts on his armour for fighting.

248. One wishing to attain one's desire must wait either upon the celestial tree or upon Raghavarāya. One desirous of contentment must resort either to the lower lip of a lovely woman or to the nectar.

***Karika* 87.** *When several objects, the simultaneity whereof is regarded as possible, are strung together, the figure is termed Samuccaya.*

---

१. इदमुदाहरणं तद्वृत्तिश्च नास्ति [illegible] पुस्तके. [illegible] पुस्तके त्वयं भागः शोधरूपेण विहितो दृश्यते. २. 'स्वर्द्रू राघवरायो वा'— अ, इ; 'स्वर्द्रुमाधवरायो वा'—आ. ३. 'अत्राभीष्टदातृतया...सोऽस्त्येवेति शेषः' इति वृत्तिर्नास्ति [illegible] पुस्तके. इ पुस्तके [illegible] 'अत्राभीष्टदातृतया...यौगपद्यासम्भवाद्विकल्पः' इति भागः शोधरूपेण दत्तो दृश्यते. ४. 'सन्देहे विरोधो...शेषः' इति भागस्तु इ पुस्तकेऽपि न वर्तते.

सम्भाव्यमानो युगपद्भावो यौगपद्यं येषां ते तथोक्ता ये बहवोऽनेकेऽर्थास्तेषां यद् गुम्फनं गुम्फो यत्र क्रियते, [redacted] स समुच्चयोऽलङ्कारः ।

यथा—

त्वयि राजन् ! स्थिते दातुं भिक्षुकाः सम्भ्रमाकुलाः ।
विकल्पन्ति प्रजल्पन्ति धावन्ति निपतन्ति च ॥२४९॥

झटित्युत्पन्नानां 'विकल्पन्ति—' इत्यादि पदार्थानां पद्मशतपत्रभेदन्यायेन यौगपद्यम् ।

यथा वा—

त्वया हते रिपुगणे तन्नार्यो निम्नगाः क्वचित् ।
प्रणदन्ति विशीर्यन्ते[3] स्रवन्ति निपतन्ति च । २५० ।

क्वचिन्निम्नगा अगोचरे क्वचिन्निम्नप्रदेशे स्थिताः, निम्नगा नद्योऽपि च । प्रणदन्ति प्रच्छन्नस्वादनक्षरं रुदन्ति, ध्वनन्ति च । विशीर्यन्ते[3] शिथिला भवन्ति, बन्धान्विर्भज्य प्रचलन्ति च । स्रवन्त्यश्रूणि मुञ्चन्ति, निर्झरन्ति च । पतन्ति, दुःखान्निम्नोन्नतदेशानुरोधाच्च ।

---

249. O king! while thou standest to give away charities, the religious mendicants, excited with hurry, fail in doubt, prattle, run and fall down.

250. (*i*) The host of enemies having been killed by thee, their women, taking shelter somewhere in low lands, cry bitterly, become emaciated, shed tears and throw themselves down (due to agony).

Or, (*ii*) The host of enemies having been killed by thee, the rivers flowing low in their regions make a [redacted]ling noise, flow in torrents, trickle out and fall down.

---

१. 'त्वयि दातुं स्थिते राजन् !'—आ. २. इयं वृत्तिर्नास्ति आ ■ पुस्तकयोः. ३. 'विशीर्यन्ति'—अ, आ, इ. ४. '०निम्नदेशे'—आ, इ. ५. 'च इति पदं नास्ति आ ■ पुस्तकयोः. ६. 'बन्धान् शिथिलीकृत्य'—आ, इ. ७. 'प्रचलन्ति'—अ. ८. अत उत्तरं 'अमुमेव समुच्चय कारकदीपकं वदन्ति । एकस्यैव कर्तृकारकस्य भिक्षुकस्य विकल्पादिक्रियान्वयेनानेकवाक्यार्थान्वयादेकस्यैव नारीपदार्थस्य कर्तृकारकस्य च "प्रणदन्ति—" इत्यादिनेकवाक्यार्थान्वयाच्च '—इत्यधिकं आ पुस्तके इदं च प्राग्वर्त्तमानमपीदानीं निष्कासितं दृश्यते ■ पुस्तके.

(अ) द्वितीयः

**खलेकपोतन्यायेन ह्यहमहमिकया समम् ।**
**अन्वयन्ति[1] पदार्थाश्चेदेकत्रात्राप्यसौ मतः ॥८८॥**

चेद्यदि, निबध्यमानाः पदार्थाः, अहमहमिकयाहंप्रथमिकया[2], खले कपोतन्यायेनैकत्र क्रियायां समं युगपद्[3]न्वयन्ति, तत्रा[4]प्यसौ समुच्चयोऽलङ्कारः ।

यथा—

कुलं रूपं रामाश्चपलनयना राज्यमनघं
श्रियोऽनन्यासक्ता उपकृतिरहो बन्धुसुहृदाम्
प्रदानं पात्रेभ्यो निजगुणकथामौनमनिशं
सतां सङ्गो ▪ त्वां कथयति पुराराधितशिवम् ॥२५१॥

अत्र वर्णनीयराजकर्तृकशिवाराधनकथनरूपैकक्रियायां[5] साधनीभूतस्याभिजात्यस्य यथा कर्तृत्वेनान्वयस्तथा तथाभूतानां रूपादीनामपि, इति समुच्चयः ।

५७. कारकदीपकम्

**पृथक्[6] क्रमेण जातानामर्थानां गुम्फनं तु यत् ।**

***Karika 88.*** *This figure (viz., Samuccaya) is held to occur also when several things fall in simultaneously at one place with emulation, in the manner of pigeons entering ▪ threshing floor.*

251. Thy (birth in a) high family thy handsome form thy mistresses endowed with tremulous eyes, thy stainless monarchy, thy royal majesty resting solely ▬ thyself (and on no one else), thy favours to kinsmen and friends thy donations to deserving persons, thy avoidance of self-praise, thy incessant association with the virtuous,—all these facts declare thee to have propitiated God S'iva in former times.

***Karika 89.*** *If different things coming into existence gradually*

१. 'अन्वीयन्ति'—अ, आ, इ. २. 'ऽहंप्राथमिकया'—अ, इ. ३. 'समं युगपदन्वियन्ति'—अ; 'सममन्वयन्ति'—आ; 'समं तुल्यमन्वियन्ति'—इ. ४ 'अत्राप्यसौ' —आ, इ. ५. अत उत्तर 'वस्तुतोऽनुमितिरूपायां' इत्यधिकं आ पुस्तके. ६. 'पृथक् क्रमेण...दीपकव्यपदेशः । इति कारकदीपकालङ्कारविवेचनात्मको भागः केवलं अ पुस्तके विद्यते, ▪▪ ▪ पुस्तकयोस्तु न दृश्यते.

समुच्चयप्रतिद्वन्द्वि मतं कारकदीपकम् ॥८९॥

यथा—

स्नाति जपति संस्तौति भुनक्ति खपिति प्रभुः ।
लङ्केशदर्शनं ब्रह्मन्न लभ्यं गच्छ मन्दिरे ॥२५२।

समुच्चये सम्भाव्यमानयुगपद्भावानां बहूनां गुम्फनम् । इह [redacted] क्रमेणोत्पन्नानां बहूनां गुम्फनमिति कारकदीपकम् एकस्यैव 'प्रभुः' इति कारकस्य 'स्नाति–' इत्यादौ सर्वत्रान्वयाद्दीपकच्छायासत्त्वेन 'दीपक'व्यपदेशः ।

५८. समाधि

प्रारिप्सितस्य कार्यस्य सौकर्यं यत्र वर्ण्यते ।
साधनान्तरसान्निध्यात्समाधिस्तत्र सम्मतः ॥९०॥

यत्र केनचित्प्रारिप्सितस्य कार्यस्य साधनान्तरसंनिधानात्सौकर्यं वर्ण्यते, तत्र समाधिरलङ्कारः । 'सम्यगाद्धाति कार्ये सौकर्यं सम्पादयति' इति व्युत्पत्तेः । द्वितीयसमुच्चयप्रतिद्वन्द्व्ययं समाधिः । तत्र ह्यनेकपदार्थानां खलेकपोतन्यायेन युगपदेककार्यसाधनार्थमवतरणम् । अत्र त्वेकेन कार्ये समारिप्सितेऽन्यस्य काकतालीयन्यायेनापतितस्य सौकर्यसाधकत्वमात्रम् ।

---

*are strung together, the figure is regarded as Kārakadīpaka which is the reverse of Samuccaya.*

252. Our lord (i e. Rāvaṇa) (first) bathes (then) mutters prayers, (then) worships by hymns, (then) takes food and (then) goes to sleep. O Brāhmaṇa interview with Rāvaṇa (lit. the Lord of Laṅkā) cannot be secured in the palace. Hence get away.

***Kārikā 90.*** *When what is to be accomplished becomes easy on account of the proximity of other expedients there occurs the figure termed Samādhi.*

---

१. अत आरभ्य ग्रन्थभागस्थिष्वपि [redacted] आ [redacted] पुस्तकेषु विद्यते. २. 'केनचिदस्तुना प्रारिप्सितस्य'—आ. ३. अत उत्तरं 'समर्थानां' इत्यधिकं आ पुस्तके.

यथा—

चाटूनि मयि कुर्वाणे न जगाद विचारदृक् ।
घनेन गर्जितं तावत्सिद्धं कार्यं सखे ! मम[3] ॥२५३॥
यामि तां नैव यामीति ह्यन्तस्तर्कयति प्रियः ।
तावदेवोदितश्चन्द्रो दूती द्वारि समागता ॥२५४॥
मया सम्प्रार्थ्यमानस्य किञ्चिद्दोलायितं मनः ।
घनेन गर्जितं दैवाज्झटित्येवागतः सखि ! ॥२५५॥
सज्जिता स्वैरिणी यावत्तावदस्तंगतो रविः ।
एवं क्रीडति लोकोऽयं माधवेनानुपालितः ॥२५६॥

अत्राद्ये[3] प्रियचाटुवचनानि मानापनयनेऽसाधारणं[4] कारणम् । दैवादापतितेन घनगर्जितेन तु तत्सौकर्यं सम्पादितम् । द्वितीये 'तां यामि नैव यामि—' इति तर्केण प्रतीयमानोत्कण्ठैव प्रियान्तिकगमनेऽसाधारणं कारणम् । चन्द्रोदयेन दूत्यागमनेन च तत्सौकर्यमात्रं सम्पादितम् । एवं तृतीये दूतीप्रार्थनैव नायकस्य केलिगृहागमं प्रत्यसाधारणं कारणम् । घनगर्जितं[5] पुनः सौकर्यमात्रकरम् । चतुर्थेऽपि 'सज्जिता—' इत्यनेन प्रतीयमानोत्कण्ठैवाभिसरणं प्रत्यसाधारणं कारणम् ;

---

253. While I was engaged in flattering her, she, with her eyes engrossed in deep thinking spoke nothing In the meanwhile a cloud thundered and, O friend, my purpose was accomplished.

254 The lover was hesitating in his mind whether he should go to her or not Just then the moon rose and her confidante arrived at his door.

255. While I (—a mistress) was beseeching him, his mind vacillated a bit. Luckily a cloud thundered (just then) and, O female friend he [illegible] (to me) at [illegible]

256. Just when the adulteress finished her dress (or decoration) the Sun set

—Thus indulge in sport these people guarded by Mādhava.

---

१. अत उत्तरं 'मित्र प्रति कस्यचिदुक्तिरियम् ' इति वाक्यं अ इ पुस्तकयोः. २. 'राघवेण०'—इ. ३. 'अत्राद्यपद्ये'—आ, इ ४. '०साधारणकारणम्'—अ. ५. 'घनगर्जनं'—आ.

'अत्यारूढो हि नारीणामकालज्ञो मनोभवः ।'—
इत्युक्तत्वात् । सूर्यास्तेन त्वन्धकारसम्पादनेन कृष्णाभिसारिकायास्तस्या अभिसरणे सौकर्यमात्रं सम्पादितमिति भवति समाधिः ।

### ५९. प्रत्यनीकम्

क्रियेत बलिनः शत्रोः पक्षे यदि पराक्रमः ।
प्रत्यनीकं तदा प्रोक्तमलङ्कारविदां वरैः ॥९१॥

यथा—

धैर्येण विजितो वार्धिर्दोष्णा भ्राता सुरद्रुमः ।
क्रुद्धेव श्री राजपत्नीमिषाद् गृह्णाति ते करम् ॥२५७॥

करं हस्तं दण्डं च ।

यथा वा—

धैर्येण विजितो राजंस्त्वया वार्धिरिति क्रुधा ।
मुखाय द्युद्यतीन्दुस्ते स्वर्द्रुर्दोष्णे समुद्रजः ॥२५८॥

### ६०. काव्यार्थापत्तिः

विवक्षितार्थसंसिद्धिः कैमुत्याद्यत्र जायते ।
विबुधैस्तत्र गदिता काव्यार्थापत्त्यलङ्कृतिः ॥९२॥

---

*Kārika 91. If one puts forth one's valour against a partisan of one's mighty enemy, there occurs the figure termed Pratyanīka by highest rhetoricians.*

257. Getting furious, as it were, because thou hast surpassed the ocean (=her father) with thy fortitude and the celestial tree, her brother, with thy arm, Lakṣmī, under the guise of the queen, seizes hold of thy कर (=1. hand, i. e. marries thee 2 taxes, i. e. imposes herself on the tributes collected by thy officers).

258. O king! the moon born of the ocean, bears malice towards thy face and the celestial tree, (also) born of the ocean, bears malice towards thy arm, (both) on account of anger due to the fact that thou hast defeated the ocean with thy firmness.

*Karikā 92. When a fact intended to be stated is established by means of argument of fortiori, there occurs the figure termed Kāvyārthāpatti by the learned.*

१. 'क्रियते इति'—आ.

तान्त्रिकोक्तार्थापत्तिवारणाय 'काव्य-' इति ।

यथा—

हस्तिनापुरगो म्लेच्छः सार्वभौमो जितस्त्वया
के तदृक्पातमात्रेण जीवन्तोऽन्ये महीभृतः ॥२५९॥

यथा वा—

लोकरावणमहासुरसङ्घा राघवेणं भवता विजिता यत् ।
[3]अल्पसारखरदूषणजुष्टास्तत्किियत्तव पुरः क्षितिजारा' ॥२६०॥

[2]यद्यस्मात्कारणात् लोकरोदनकारिणो महान्तोऽसुरा म्लेच्छाः, तेषां समूहाः, रावणप्रभृतिमहाराक्षसाश्च राघवेण प्रकृतराज्ञा रामेण च । भवता विजिताः । तत्तर्हि । [3]खराणि तीव्राणि यानि [4]दूषणान्यपराधाः, तैर्जुष्टा युक्ताः, खरदूषणाभ्यां सहिताश्च । क्षितिजाराश्चौर्येण[5] क्षितिभोक्तारः क्षुद्रा राजानो राक्षसाश्च । [6]तव राघवस्य ते, पुरः । कियत्किियन्मात्रम् ।

[7]श्लेषसङ्कीर्णेयं काव्यार्थापत्तिः ।

---

259. The Mlecchа ( non-Hindu, i. e Moghul) Emperor residing at Hastinapura has been subdued by thee. Of what account [illegible] other kings that live merely by (the mercy of) his glance ?

260. (i) Since the groups of tyrannous and mighty non-Hindus have been subdued by you, viz., Rāghava (—Raghunātharao Peṣavā), of what import before you are petty unauthorised chieftains possessing little vigour but committing serious offences ?

Or, (ii) Since Ravaṇa (lit. [illegible] who causes people to bewail) and the groups of (other) great demons have been vanquished by you, viz., Raghava (—Rāma), of what account to you are insignificant demons, ruling illegitimately over the earth and headed by Khara and Duṣaṇa endowed with trifling prowess ?

---

१. 'ते न चाव खरदूषणजुष्ट' नन्तरैयकतय 'क्षितिजार : ।' इति पाठ उत्तरार्धस्य आ पुस्तके. २. 'यद्यस्मात्कारणात्...तत्तर्हि' इति वृत्तिभागो नास्ति [illegible] पुस्तके. ३. 'खरा-णि—'इत्यत आरभ्य वृत्तिभागः आ पुस्तके वर्तते. ४. 'दूषणानि' इति पदं नास्ति [illegible] पुस्तके. ५. '०श्चौर्यें'—आ. ६. 'तव...कियन्मात्रम्' [illegible] स्थाने '"विजिताः" इत्यत्राप्यन्वेति' इति [illegible] पुस्तके. ७. इदं वाक्यं नास्ति आ पुस्तके.

यथा वा—

अब्जोऽयमब्जजाताय द्रुह्यतीति कियद्वयम् ।
बन्धुजीवं नयन्दैन्यमन्यजीवस्य ▬ कथा ॥२६१॥
नारायणनृपारीणां पत्न्यो विरहकातराः ।
परस्परं वदन्त्येवं चन्द्रसंतप्तमानसाः ॥२६२॥

अब्जश्चन्द्रः । अब्जजाताय कमलजाताय । अब्जो भूत्वाब्ज-द्रोहं करोतीति निन्दा । बन्धुजीवं पुष्पविशेषं बन्धोरात्मानं च ।

## ६१. काव्यलिङ्गम्

वाक्यार्थेन पदार्थेन व्यस्तेनोभयतोऽपि वा ।
समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ॥९३॥

समर्थनीयस्य समर्थनसापेक्षस्यार्थस्य वाक्यार्थेन, पदार्थेन, उभयतो-ऽपि द्वाभ्यामपि वा, समर्थनं काव्यलिङ्गमलङ्कारः । यत्र वाक्यार्थेन समर्थनं तत्र वाक्यार्थहेतुकम् । यत्र पदार्थेन समर्थनं तत्र पदार्थहेतुकम् । यत्र पदार्थवाक्यार्थाभ्यां समर्थनं तत्र तदुभयहेतुकम् । नैयायिकाभि-

---

261-262. "This अब्ज (lit. the water-born, i.e the moon) bears malice to the group of अब्जस (lit. the water-born, i e lotuses). Hence of what account are we (to this अब्ज)? To one (viz the moon) that brings a miserable condition even to बन्धुजीव (=1 his brother's soul; ▬. proper ▬ of a flower that blooms in the mid-day and remains closed during the night), of what account are other people's souls ?'

—Thus utter to each other the wives of the enemies of king Narayana that ▬ distressed due to separation and are extremely tormented in their hearts by the moon.

***Kārikā 93.*** *When something requiring to be supported is strengthened by the sense of ▬ sentence and by ▮ is sense of ▬ word, separately or jointly, there occurs the figure Kāvyaliṅga.*

---

१. 'जयन्दैन्य०'—अ. २. 'श्रीमाधवनृपारीणां'—आ. ३. 'कमलजातीनाम' —अ, इ. ४. 'बन्धोरात्मा च'—अ; 'बन्ध्वात्मानं च'—इ. ५. नास्ति अ पुस्तके. ६. अतः पूर्वं 'वा' इत्यधिकं ▬ पुस्तके. ७. अत उत्तरं 'वा' इति नास्ति आ पुस्तके. ८. 'अलङ्कारः' इति पदं नास्ति ▬ पुस्तके ९ 'तत्'—आ. १०. 'तत्'—आ. ११. 'वाक्यार्थपदार्थाभ्यां'—आ.

मतानुमितिकरणीभूतलिङ्गवारणाय 'काव्य—' इति ।

(अ) वाक्यार्थहेतुकम्

यथा—

नष्टं जानीहि दारिद्र्यमद्य श्वो वा न संशयः ।
यतस्त्वयाश्रितः श्रीमान्माधवोऽर्थप्रदः प्रभुः ॥२६३॥

मित्रं प्रत्येकद्विदिवसमध्ये दारिद्र्यविनशनोक्तिः समर्थन-सापेक्षा । उत्तरार्धे वाक्यार्थेन समर्थनं वाक्यार्थहेतुकं काव्यलिङ्गम् । परं 'श्रीमान्' 'अर्थप्रदः' इति विशेषणपदार्थौ 'यतस्त्वया—' इति-वाक्यार्थहेतुतांप्रतिपादकौ । अतो वाक्यार्थहेतुकैत्वांशे पदार्थहेतुकमपीति द्रष्टव्यम् ।

यथा वा—

अर्थराशिस्त्वया दत्तो मोहराशिरिति स्फुटम् ।
दारिद्र्यमित्रं नालोके करभैक्षं कलिप्रियम् ॥२६४॥

अत्र राज्ञा प्रदत्तधनराशौ मोहराशित्वोक्तिः समर्थनसापेक्षा । तस्याः 'दारिद्र्यमित्रं नालोके—' इतिवाक्यार्थेन समर्थनं वाक्यार्थहेतुकं काव्यलिङ्गम् ।

(आ) पदार्थहेतुकम्

पदार्थहेतुकं, यथा—

गुणाब्धेस्त्वत्समुत्पन्नं निष्कलङ्कं यशः प्रभो ! ।

---

263. Regard thy poverty as dispelled in a day or two, there is no doubt about it, since thou hast sought refuge with king Mādhava who is wealthy and munificent (lit. wealth giver).

264. It is evident that the heap of riches given by thee is a mass of mental delusion, since I am not (now) perceiving my friend, viz., Poverty, that carries alms in his hands and is a favourite of the Kali Age (or, is fond of strife).

265. O king ! the stainless glory born of thee, who art an ocean of good qualities, far surpasses the spotted (lit. antelope-marked) moon

---

१. 'अत्र मित्रं प्रति एक—' इत्यत उत्तरमेकं पत्रं नष्टं दृश्यते ह पुस्तके. २. '"यतस्त्वया —"इत्युत्तरार्धवाक्यार्थेन....'—आ. ३. 'ोहेतुत्वप्रतिपादकौ'—आ. ४. 'ोहेतुक-काव्यलिङ्गत्वांशे'—आ. ५. 'ोहेतुकमिति'—आ. ६. 'ोराशित्वोत्कीर्तनं'—आ. ७. 'समर्थनसापेक्षम्'—आ. ८. 'तस्य'—आ.

जलध्युत्पन्नमेणाङ्कं चन्द्रं विजयतेतराम् ॥२६५॥

अत्र यशःकर्तृकचन्द्रविजयोपन्यासः समर्थनसापेक्ष इति तस्य यशोगतगुणाध्युत्पन्नत्वनिष्कलङ्कत्वचन्द्रगतजड[1]ध्युत्पन्नत्वकलङ्कित्वरूपैः पदार्थैः समर्थनं पदार्थहेतुकं काव्यलिङ्गम् ।

(इ) वाक्यार्थपदार्थोभयहेतुकम्

वाक्यार्थपदार्थोभयहेतुकं, यथा—

प्रतापस्ते राजञ्ज्वलयति रिपूंश्छत्रशिरसो
दिवा रात्रौ हर्म्ये विपिनगिरिवक्त्रेऽपि वसतः ।
दिवा तापं मुञ्चन्न च निशि गुहादावपि तप-
न्नयं सूर्यो नूनं घटयतु कथं तेन तुलनाम् ॥२६६॥

अत्र प्रकृतराज्ञः प्रतापेन सह सूर्यतुलनाया अघटनोपन्यासः समर्थनसापेक्ष इति तस्य 'प्रतापस्ते राजञ्ज्वलयति—' इतिपूर्वार्धवाक्यार्थेन, 'दिवा तापं मुञ्चन्—' इत्युत्तरार्धगतपदार्थैश्च समर्थनं वाक्यार्थपदार्थोभयहेतुकं काव्यलिङ्गम् ।

पूर्वं प्रतीपालङ्कारप्रस्तावोदाहृते 'इदं प्रियानेत्रसमानकान्ति—' इति पद्येऽपि वाक्यार्थपदार्थोभयहेतुकं काव्यलिङ्गमवतरति । तत्र हि 'भो[2] माधवनृप ! ते शत्रवः शोचन्ति—' इत्येवंरूपा शत्रूणां शोकोक्तिः समर्थनसापेक्षेति तस्या 'वनेष्वटन्तः—' इतिपदार्थेन, 'इदं प्रिया—' इत्यादिवाक्यार्थद्वयेन च समर्थनं वाक्यार्थपदार्थोभयहेतुकं काव्यलिङ्गं सम्भवति । परं ■ 'प्रियानेत्रसमानकान्ति—' इतिविशेषणपदार्थस्तस्य

---

born of the watery ocean (or, of the store of cold substance or dull beings).

266. Day and night O king, thy majesty (or valour) burns thy enemies (or, the enemies of the Chatrapati king) bearing umbrellas on their heads and dwelling in a palace or even in the interior of a forest ■ of a mountain. How indeed can the Sun, that gives up his lustre (even) during the day and does not blaze during the night and in caves and other similar places, form comparison with it ?

---

१. '०जलध्यु०'—इत्यपि पाठान्तर आ पुस्तके. २. 'भो माधवनृप...इत्येवंरूपा' इति नास्ति आ पुस्तके.

वाक्यार्थद्वयस्य हेतुत्वोपपादकः, इति वाक्यार्थहेतुकत्वांशेऽपि पदार्थहेतुकं काव्यलिङ्गमिदमिति शेषः ।

अत्रेदमवधेयम् । यद्यपि साभिप्रायपदार्थवाक्यार्थयोर्विन्यसनं परिकरेऽप्यस्ति, तथापि परिकरे पदार्थवाक्यार्थबलात्प्रतीयमानोऽर्थो वाच्यार्थमुपस्करोति । काव्यलिङ्गे ■ पदार्थवाक्यार्थावेव हेतू, नै ■ तद्बलान्मध्ये प्रतीयमानोऽर्थविशेषोऽपि, इत्येव तयोर्विशेषः ।

ननु तथापि—'अर्थराशित्वया दत्तः ' इतिकाव्यलिङ्गोदाहरणे वाक्यार्थस्यैव हेतुत्वादस्तु काव्यलिङ्गम् । परंतु 'गुणाब्धेस्त्वत्समुत्पन्नम्—' इतिपदार्थहेतुके, 'प्रतापस्ते राजन् —' इतिपदार्थवाक्यार्थोभयहेतुके च काव्यलिङ्गोदाहरणे प्रतीयमानार्थस्यापि हेतुकोट्यनुप्रवेशो दृश्यते । तथा हि, 'जडधि—' इत्यविवेकाद्यभिप्रायं, 'गुणाब्धेः' इति प्रतिनिर्देशात्, डलयोरैक्यात् 'एणाङ्कम्' इति कलङ्कित्वाभिप्रायं, 'निष्कलङ्कम्' इति प्रतिनिर्देशात् । एवं 'छत्रं', 'रात्रिः', 'विपिनं', 'गुहाः'—इमानि तापरोधकत्वाभिप्रायगर्भाणि, तथैव प्रतिनिर्देशात् । एवं चात्रोदाहरणद्वये परिकरः प्रसक्त एव । इति चेत्, अस्तु परिकरः । तथापि परिकरोत्थापितं काव्यलिङ्गमप्यस्ति । प्रथमे प्रतीयमानाविवेकादिविशिष्टजलध्युत्पन्नत्वविवेकादिगुणविशिष्टाब्ध्यभिन्न'त्वत्'पदार्थसमुत्पन्नत्वनिष्कलङ्कत्वकलङ्कित्वरूपाणां पदार्थानामेव हेतुत्वात्, द्वितीयपद्ये च संतापरोधकराज्यादिसत्त्वेऽपि शत्रुप्रज्वालनकर्तृत्वरूपस्य वाक्यार्थस्य रोधकच्छत्रादिसत्त्वेऽदाहकत्वरूपस्य पदार्थस्य चोभयोरेव हेतुत्वात् । न हि[12] तयोर्वाच्ययोर्हेतुत्वे

---

१. '०हेतुकका०यलिङ्गत्वाशेऽपि'—आ. २. 'काव्यलिङ्गमिति शेषः'—अ. ३. 'न तु...विशेषोऽपि' इति नास्ति आ पुस्तके. ४. 'वाक्यार्थस्याहेतुत्वादस्तु'—अ. ५ 'वाक्यार्थपदार्थोभयहेतुके'—आ. ६. ' "गुणा०ब्धेः" इति विद्याविवेकाद्यभिप्रायगर्भं "जलधि—" इतिप्रतिनिर्देशात्, डलयोरैक्यात्'—आ ७. अत उत्तरं 'उभयोरैक्यात्' इत्यधिकं ■ पुस्तके. ८. 'एण'ङ्कमिति.. 'निष्कलङ्कमिति प्रतिनिर्देश'त्' इति न दृश्यते ■ पुस्तके. ९. 'तथैव प्रतिनिर्देशात्' इति नास्ति ■■ पुस्तके. १०. 'प्रतीयमानविद्याविवेकादिगुण-विशिष्टाब्ध्यभिन्नत्वत्पदार्थसमुत्पन्नत्वनिष्कलङ्कत्वजडध्युत्पन्नत्वकलङ्कित्वरूपाणां.....' — आ. ११. अत्र ■ पुस्तवस्था टिप्पणी—'एवकारेण जलपदाधुपस्थितताविवेकादेर्व्यवच्छेदः । केवलस्य तस्य जयपराजयादिकं प्रत्यहेतुत्वादिति भावः ' इति. १२. 'हि' इति पदं नास्ति ■■ पुस्तके.

प्रतीयमानं मध्ये किञ्चिद् द्वारमस्ति, यथा 'अन्यदेवान्परित्यज्य—' इति पूर्वोक्तपरिकरोदाहरणे 'श्रीपतिः' इत्यनेन प्रतीयमानं श्रीदाने सामर्थ्यं, यथा च वाक्यार्थपरिकरोदाहरणे 'व्यासः समज्ञो न मया निषेवितः—' इत्यादौ नाहं सर्वज्ञो न वा काव्यापूर्वसृष्टिकर्ता न वा नीलसरस्वतीदत्त-वर इत्यादि ।

तथा च, पदार्थवाक्यार्थान्यतरबलप्रतीयमानार्थविशेषहेतुकत्वेन निबध्यमानो वाच्यार्थः परिकरः । अथ च, पदार्थवाक्यार्थान्यतरबल-प्रतीयमानार्थविशेषाहेतुकत्वे सति तदुभयान्यतरहेतुकत्वेन निबध्यमानो वाच्यार्थः काव्यलिङ्गम् । परिकरेऽपि पदार्थवाक्यार्थान्यतरस्य मध्ये प्रतीयमानार्थविशेषद्वारा हेतुत्वात्तत्रातिव्य प्तिवारणाय सत्यन्तं वैशिष्ट्यं सप्तम्यर्थेन तृतीयान्तार्थान्वयि ।

न चार्थान्तरन्यासेऽतिव्याप्तिः .। वाक्यार्थस्य समर्थनसापेक्षत्वेन विशेषणीयत्वात, अर्थान्तरन्यासे हि पूर्वोक्तवाक्यार्थस्य समर्थनानपेक्ष-त्वेऽपि प्रतीतिवैभवार्थमेवार्थान्तरोपन्यासात, इत्यभिप्रायात । यदि च विशेषस्य सामान्येन समर्थनानपेक्षत्वेऽपि सामान्यं विशेषेण समर्थन-मपेक्षत एव 'निर्विशेषं न सामान्यम्—' इति न्यायादिति चेत,— तर्हि 'पदार्थसामान्यविशेषभावसम्बन्धादालिवाक्यार्थान्यतरहेतुकत्वेन निबध्यमानो वाच्यार्थः काव्यलिङ्गम्' इति लक्षणं वक्तव्यम् अर्थान्तर-न्यास उभयोर्वाक्यार्थयोः सामान्यविशेषभावसम्बन्धोऽस्त्येव, न काव्यलिङ्गे । इति नातिव्याप्तिः

## ६२. अर्थान्तरन्यासः

सामान्ये प्रस्तुतेऽन्यस्य विशेषे प्रस्तुतेऽपि च ।
उक्तिरर्थान्तरन्यासोऽलङ्कारः कथितो बुधैः ॥९४॥

***Karika 94.*** *The figure Arthāntaranyāsa is announced by the learned when a particular proposition is made while a general is under discussion or when a general proposition is made while a particular is under discussion.*

---

१. 'न वापूर्वकाव्यसृष्टिकर्ता'—अ. २. 'तथा च पदार्थ...इति नातिव्याप्तिः' इति भागो नास्ति आ पुस्तके. ३. अत आरभ्य ग्रन्थभागः [illegible] पुस्तकेऽपि साधारण्येन वर्तते.

सामान्ये प्रस्तुते सत्यन्यस्याप्रस्तुतस्य विशेषस्य, [1]विशेषे प्रस्तुतेऽपि [2]चान्यस्याप्रस्तुतस्य सामान्यस्योक्तिरर्थान्तरन्यासः ।

सामान्ये प्रस्तुतेऽप्रस्तुतस्य विशेषस्योक्तिः, यथा—

[3]वीरभोग्या वसुमती भवतीति सुनिश्चितम् ॥
आसमुद्रं जिता पृथ्वी माधवेनोद्यतासिना ॥२६७॥

यथा वा—

तेजस्विगुणिनः[4] सङ्गे क्षुद्रोऽप्येति महत्पदम् ।
मुक्ताहारानुषङ्गेण स्थितस्तन्तुः कुचोपरि ॥२६८॥

राजानं[5] प्रति सत्यवसरे कस्यचिदुक्तिरियम् ।

विशेषे प्रस्तुतेऽप्रस्तुतस्य[6] सामान्यस्योक्तिः, यथा—

यागैर्दानैर्न्ययैरन्यैर्माधवेन महीभुजा ।
त्रिलोकी प्रीणिता सर्वा दुष्करं किं महात्मनाम् ॥२६९॥

यथा वा—

मेघराजेन जगती प्लावितोष्णाकुलाकुला ।
कुर्वन्त्यसुकरं कर्म महात्मानः प्रहेलया ॥२७०॥

---

267. It is quite certain that the earth is to be enjoyed by brave heroes Madhava, with his sword raised has conquered the earth stretching to the ocean

268. Even a trifling object or pers on attains a high position when in contact with an object or person that ■ तेजस्विन् ( 1 bright; 2 powerful) and गुणिन् (= 1. woven in thread 2. meritorious). A wire in the course of its association with ■ pearl necklace rests ■■ (a woman's) breasts.

269. All the three worlds have been pleased by king Madhava by means of his sacrifices, charities and other disbursements. What indeed is difficult for great souls ?

270. The lord of clouds (viz , Indra) has bathed (or caused to overflow) the world that was extremely tormented with heat. Great souls perform difficult (or life-giving) tasks with utmost ■■■

१. अतः पूर्वं 'च परम्' इत्यधिकं ■■ पुस्तके. २. 'च' इति पदमत्र नास्ति आ पुस्तके. ३. इदं पद्यं न दृश्यते अ पुस्तके. तत्स्थाने 'भवती पृथ्वी' इत्यसम्बद्धं पदद्वयं तत्र विद्यते. ४. 'तेजस्विगुणिनोः'—आ. ५. 'सत्यवसरे राजानं प्रति कस्य०' —आ. ६. 'अप्रस्तुतस्य सामान्यस्योक्तिर्यथा—' इत्यारभ्य ग्रन्थभागः ■ पुस्तकेऽप्युपलभ्यते.

नन्वत्र सर्वथैव प्रस्तुतानन्वयिनोऽप्रस्तुताभिधानस्यायुक्तत्वात्प्रस्तुतोपयोगितयैवाप्रस्तुताभिधानमित्यवश्यमङ्गीकार्यम्। एवं चागत्या प्रस्तुतसमर्थकतयैवोपयोगित्वे वाच्ये वाक्यार्थहेतुकं काव्यलिङ्गमेवास्तु, किमर्थान्तरन्यासेनाधिकेन ? न च प्रस्तुतसमर्थकतयान्वयो मास्तु, किं त्वप्रस्तुतप्रशंसायामिव प्रस्तुतव्यञ्जकतयेति भ्रमितव्यं; प्रस्तुताप्रस्तुतयोरुभयोरपि शब्दोपात्तत्वात्। न चानुमानालङ्कार इव प्रस्तुतप्रतीतिजनकतयोपयोगोऽस्त्विति वाच्यं; तद्वदिह व्याप्तिपक्षधर्मताद्यभावात्, प्रस्तुतस्य शब्दत एव प्रतीतेश्च। तस्मादगत्या प्रस्तुतसमर्थकतयान्वयेऽङ्गीकर्तव्येऽर्थान्तरन्यासो वाक्यार्थहेतुककाव्यलिङ्गेऽन्तर्भवितुमर्हति।

अत्र केचित्—समर्थनसापेक्षस्यार्थस्य समर्थने काव्यलिङ्गम् निरपेक्षस्यापि प्रतीतिवैभवात्समर्थनेऽर्थान्तरन्यासः। न हि काव्यलिङ्गोदाहरणेष्विव,

'अथोपगूढे शरदा शशाङ्के
प्रावृड् ययौ शान्ततडित्कटाक्षा।
कासां न सौभाग्यगुणोऽङ्गनानां
नष्टः परिभ्रष्टपयोधराणाम्॥'

'दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैःशिरसां सतीव॥'

—इत्याद्यर्थान्तरन्यासोदाहरणेषु प्रस्तुतस्य समर्थनसापेक्षत्वमस्तीति।

अप्पय्यदीक्षितास्तु — समर्थ्यसमर्थकयोः सामान्यविशेषभाव-

---

१. 'ोवोपयोगे वाच्ये'—आ २. 'प्रस्तुत प्रस्तुतोभयोरपि'—अ; 'प्रस्तुताप्रस्तुतयोः सामान्यविशेषयोरपि'—आ. ३. 'चोपमानालङ्कार [illegible]'—आ,इ. ४. 'ोप्रतीतिजयोपयोगोऽस्त्विति वाच्यं'—अ; 'ोप्रतीतिजनकतया-वयोऽस्त्विति वाच्यं—आ. ५. अत उत्तरं 'न च दृष्टान्तालङ्कार इवोपमानतयान्वयोऽस्त्विति वाच्यं; दृष्टान्तालङ्कारेषु सामान्ये विशेषस्योपमानत्वप्रदर्शनेऽपि विशेषे क्वचिदपि सामान्यस्य न दर्शनात्, उपमानतया तथा तदन्वयाप्रतीतेश्च।' इत्यधिकं आ पुस्तके. इ पुस्तके त्वयं भागः प्रायसन्नप्यधुना निष्कासितो दृश्यते. ६. 'ोङ्गीकृतेऽर्थान्तरन्यासो'—आ. [illegible] 'अप्पयिजीदीक्षितास्तु'—अ, इ; 'अप्पयिदीक्षितास्तु'—आ. ८. 'सामान्यविशेषसम्बन्धे'—आ.

सम्बन्धेऽर्थान्तरन्यासः,तदितरसम्बन्धे [redacted] काव्यलिङ्गम्, इत्येव व्यवस्था। [redacted] तु 'समर्थनापेक्षसमर्थने काव्यलिङ्गं तन्निरपेक्षसमर्थनेऽर्थान्तरन्यास :' इति विभागः। अर्थान्तरन्यासे हि विशेषस्य सामान्येन समर्थनानपेक्षत्वेऽपि सामान्यं विशेषेण समर्थनमपेक्षत एव 'निर्विशेषं न सामान्यम्–' इति न्यायात्

'बहूनामप्यसाराणां संयोगः कार्यसाधकः।
तृणैराबध्यते रज्जुस्तेन नागोऽपि बध्यते॥'

—इत्यादौ पूर्वार्धोक्तसामान्यस्योत्तरार्धोक्तसम्प्रतिपन्नविशेषावतरणं विना बुद्धौ प्रतिष्ठितत्वासम्भवात्। न चात्र 'कासां न सौभाग्यगुणोऽङ्गनानाम्–' इत्यादौ विशेषसमर्थने सामान्यस्येव लोकप्रतिपन्नविशेषावतरणं विनैव बुद्धौ प्रतिष्ठितत्वं सम्भवतीति श्लोके तन्न्यसनं नापेक्षितमिति वाच्यम्, सामान्यस्य सर्वत्र लोकप्रतिपन्नत्वनियमाभावात्। न हि 'यो यो धूमवान्, सोऽग्निमान्' इति व्याप्तिरूपसामान्यस्य लोके प्रतिपन्नतया 'यथा महानसः' इति तद्विशेषरूपदृष्टान्तानुपादानसम्भवमात्रेणाप्रसिद्धव्याप्तिरूपसामान्यस्योपन्यासेऽपि[2] तद्विशेषरूपदृष्टान्तोपन्यासनैरपेक्ष्यं सम्भवति। न चैवं सामान्येन विशेषसमर्थनस्थले[3] क्वचित्तस्य सामान्यस्य लोकप्रतिपन्नत्वाभावे तस्य बुद्ध्यारोहाय पुनर्विशेषान्तरन्यसनप्रसङ्गः, इष्टापत्तेः तत्रैव विषये वक्ष्यमाणो विकस्वरालङ्कारः। किं च, काव्यलिङ्गेऽपि न सर्वत्र समर्थनसापेक्षत्वनियमः,

'चिकुरप्रकरा जयन्ति ते
विदुषी मूर्धनि सा बिभर्ति यान्
पशुनाप्यपुरस्कृतेन त-
त्तुलनामिच्छतु चामरेण कः॥'

—इत्यादौ तदभावात् उपमानवस्तुषु वर्णनीयसाम्यस्याभावेन निन्दायाः कविक्षुण्णतयात्र समर्थनापेक्षाविरहात्। न हि

---

१. '०सामान्यस्योपन्यासे'—अ; '०सामान्यस्य न्यासेऽपि'—आ. २. 'अपि' इति पदं नास्ति अ पुस्तके. ३. अत उत्तरं 'अपि' इत्यधिकं [redacted] इ पुस्तकयोः. ४. 'कविक्षुण्णत्वेनात्र'—आ, इ.

'तदास्यदास्येऽपि गतोऽधिकारितां ■ शारदः पार्वणशर्वरीश्वरः ॥'

—इत्यादिषु समर्थनं दृश्यते। तस्मादुक्तव्यवस्थैव रमणीया। —इति वदन्ति।

अत्रेदमवधेयम्—। अस्तु 'निर्विशेषं न सामान्यम्—' इति न्यायः। तथापि तद्बलात् 'सामान्यं विशेषेण समर्थनमपेक्षत एव' इत्यत्यन्तायोगव्यवच्छेदफलको नियमो न संगच्छते। 'सामान्यं विशेषसमर्थनसापेक्षमेव—' इत्ययोगव्यवच्छेदफलकनियमस्यैव लाभात् 'सामान्यं विशेष घटितमेव—' इत्यर्थस्योक्तन्यायतोऽवगमात्तद्घटितबुद्धेस्तज्ज्ञानसापेक्षत्वात्। एवं सति विशेषस्य सामान्येन समर्थनं यत्र तत्रार्थान्तरन्यासो न स्यात्। यतस्तत्र सामान्यस्यापि विशेषेण समर्थनापेक्षायां विशेषेण समर्थने कृते विकस्वरालङ्कार एव स्यात्, सर्वत्रैव सामान्यस्य समर्थनापेक्षत्वात्। यत्र सामान्यस्य लोकप्रतिपन्नत्वं तत्र विशेषेण समर्थनानपेक्षणात्। इदमत्यन्तायोगव्यवच्छेदफलनियमप्रतिपादनं फलितार्थकथनमिति चेत्,—अस्तु तथा, तथापि सामान्यस्य बुद्ध्यारोहे विशेषस्य कविप्रतिपादितशब्दादुपस्थितिरेव प्रयोजिकेति न नियमः लोकप्रतिपन्नविशेषस्य लोकतः प्रत्यक्षादिनोपस्थितावपि सामान्यस्य बुद्धौ प्रतिष्ठितत्वसम्भवात्। एवं च, लोकप्रतिपन्नस्य तृणग्रथितमहादाम्नो बलवत्तरबन्धनसाधकस्य विशेषस्य लोकत ■■ प्रत्यक्षादिनोपस्थितौ 'बहूनामप्यसाराणाम्—' इति सामान्यस्य बुद्ध्यारोहे सम्भवति 'तृणैः—' इति विशेषोपन्यासः प्रतीतिदार्ढ्यरूपवैभवमात्रफलकः। अत एव टिप्पणकारा अपि 'उक्तमर्थमर्थान्तरन्यासेन द्रढयति—' इति सर्वत्र लिखन्ति। दार्ढ्यं च प्रतिपन्नस्यैव सम्भवति। लोकतः

---

१. 'इदमत्रावधेयम्'—आ. २. 'इति नियमो ...'—आ ३. 'सामान्यं विशेषघटित ...सापेक्षत्वात्' इति भागो नास्ति ■■ पुस्तके. ४ 'तद्घटित...सापेक्षत्वात्' इति भागो नास्ति ■ पुस्तके. ५. 'तथा च सति'—आ. ६. 'विकस्वर एव स्यात्'—आ ७. 'इदमत्यन्ता...प्रतिपादनं' इति नास्ति आ पुस्तके. ८. 'फलितार्थकथनमिदमिति चेत्'—आ. ९. 'सामान्यबुद्ध्यारोहे'—अ; 'सामान्यस्य बुद्ध्यारोहणे'—आ, इ. १०. 'कविप्रतिपादितशाब्दोपस्थितिरेव'—आ, इ. ११. "प्रत्यक्षादिना परिस्फूर्तावपि'—आ. १२. 'प्रत्यक्षपरिस्फूर्तौ'—आ. १३. अत उत्तरं 'निरर्थकः' इत्यधिकं आ पुस्तके. १४. 'प्रतीतिवैभवमात्रफलकः'—आ, ■. १५. 'अत एव टिप्पणकारा...सम्भवति'—इति वाक्यद्वयं नास्ति आ पुस्तके.

प्रत्यक्षादिना 'विशेषावगमोऽत्रै नास्त्येवेति तु शपथनिर्णेयम्। अैस्तु ■ 'बहूनामप्यसाराणाम्--' इत्यत्र, अन्यत्र वा, अप्रसिद्धसामान्ये लोकतो विशेषानवगमः; अस्तु च तद्विशेषरूपसमर्थ्यकसापेक्षत्वम्। परं तु तत्र विशेषे समर्थकत्वं न सामान्यार्थनिर्णायकत्वम्, अपि ■ सामान्यार्थ-प्रतीतिदार्ढ्यरूपवैभवसम्पादकत्वम् काव्यलिङ्गे तु 'अर्थराशिस्त्वया दत्तो मोहराशिरिति स्फुटम्--' इत्यादावर्थराशौ मोहराशित्वोपपत्तये तन्निर्णायकत्व-लक्षणं समर्थकत्वं पदार्थे वाक्यार्थे वा विवक्षितम्। अत एव यत्र सामा-न्येन विशेषसमर्थने कृते कवेर्विशेषान्तरेण समर्थनं विवक्षितं, सामान्य-प्रसिद्धावपरितोषो वा, तत्र पुनर्विशेषान्तरेण समर्थने विकत्थरोऽप्युपपद्यते। अत्रापि विशेषान्तरे समर्थकत्वं प्रतीतिदार्ढ्यरूपवैभवसम्पादकत्वमेवेति केषाञ्चित्तु वादिनामाशयः एवं 'चिकुरप्रकरा जयन्ति--' इति काव्यलिङ्गो-दाहरणेऽप्युपमानवस्तुषु वर्णनीयसाम्याभावेन निन्दायाः कविक्षुण्णतया यदि समर्थनानपेक्षेत्यभिमानः, तर्हि समर्थनसापेक्षत्वेन विवक्षणीयार्थस्य समर्थने काव्य लिङ्गम् समर्थननिरपेक्षेऽपि चिकुरविजये समर्थनसापेक्षत्वेन विवक्षाविषयत्वमुन्नेयं, कविक्षुण्णोपमानिन्दासहकृतस्य समर्थकोपन्यासस्य विवक्षाप्रहकस्य सत्त्वात् निरपेक्षस्यापि प्रतीतिवैभवाय समर्थने त्वर्था-

---

१. 'परिस्फूर्तिर्नास्तीति तु...'—आ. २. 'अत्र' इति पदं नास्ति ■ पुस्तके. ३. 'अैस्तु वा बहूनामप्यसाराणा... वैभवसम्पादकत्वमेवेति केषाञ्चित्तु वादिनामाशयः' इति भागस्य स्थाने 'कि ■ व्याप्तिरूपसामान्यस्य बुद्ध्यारोहे व्यभिचारशङ्कापनयनोपयोगितया व्या सिघटकसामानाधिकरण्योपस्थितिसम्पादकतया वा दृष्टान्तरूपविशेषोपन्यास आवश्यकः प्रकृते ■ काव्यार्थावगतौ योग्यताज्ञान बाधाभावश्च हेतुरिति लोकत एव सम्प्रतिपन्नविशेष-स्फूर्तौ सामान्यार्थे मनस्युत्तीर्णे परं प्रतीतिवैभवायैव विशेषोपन्यास इति केषाञ्चित्तु वादिनामाशयः।' इति ■■ पुस्तके, 'तेनाप्रिर्विशेष न सामान्यमिति न्यायात् सामान्यं विशेषघटितमेवेत्ययोगव्यवच्छेदो लभ्यते तेन च सामान्यस्य बुद्धौ प्रतिष्ठितत्वं विशेषप्रति-पत्तिसापेक्षमेवेति फलति। विशेषप्रतिपत्तिश्च बहुशो लोकत एव सम्भवति, तत्र समर्थनान-पेक्षायां प्रतीतिवैभवायैव समर्थनेऽर्थान्तर-न्यासः अत एव यत्र सामान्येन विशेषसमर्थने कृते सामान्यप्रसिद्धावपरितोषस्तत्र पुनर्विशेषान्तरेण समर्थने विकत्थरोऽपि—इति केषाञ्चित्तु वादि-नामाशयः।' इति ■ पुस्तके. ४. 'विवक्षणीयस्यार्थस्य'—आ, इ. ५. अस्य दीर्घ-समस्तपदस्य स्थाने 'अग्रे' इति पदं आ पुस्तके. ६. 'प्रतीतिविभवात्'—आ.

न्तरन्यासः---इति केषाञ्चित्तु वादिनां मतमपि [1]निर्दुष्टमेवेति[2] ।

[3]कैंचित्प्रस्तुतेनाप्रस्तुतस्यापि समर्थनम् ।

[3]यथा[3]—

[3]वीरैंभोग्या वसुमती भवतीति सुनिश्चितम् ।
आसमुद्रं जिता पृथ्वी वीर राघव ! यत्त्वया । २७१॥

[3]यथा वा—

[3]स्वैंमित्रस्य रुचिः स्वस्य हितेत्यवितथं वचः ।
राजन् ! प्रतापमित्रस्य रुचिस्तेऽमित्रतापिनी । २७२॥

[3]मित्रैंस्य सुहृदः शेषात् सूर्यस्यापि रुचिरिच्छा तेजश्च । स्वस्य हिता हितकारिणी ।

---

271. It is most definite that the earth is enjoyable by valiant heroes, since she (viz., the earth) stretching as far as the ocean, has been conquered, O Rāghava, by thee.

272. It is a true saying that the रुचि (=1 desire; 2. brilliance i.e. valour) of one's मित्र (=friend) is advantageous to one. O king ! the रुचि (=1.desire 2. brilliance) of thy प्रतापमित्र ( 1. thy friend, viz., Pratāpa; 2. the Sun in the form of thy majesty or valour) distresses thy अमित्रs (=thy enemies).

---

१. 'रमणीयमेवेति'—आ, इ. २. अत्र उत्तरं—'एवमुदाहरणान्तराणि द्रष्टव्यानि । यथा—

दुष्टे दयापि राजेन्द्र प्रायो निन्दायते सतः ।
कविना निन्दितो रामो दयालुर्वायसेक्षणे ।
रामो निन्द्यः काक ! नेत्रमेवगवेषयत्तव

—अत्र मध्यमार्धे निन्दकयजमानोक्त्यनुवादकविकृतायाः काकस्यैव नेत्रसंरक्षणेन दयालो रामस्य निन्दाया उपन्यासः समर्थनसापेक्ष इति तस्य "रामो निन्द्यः" इति चरमार्धवाक्यार्थेन व्याजनिन्दारूपेण समर्थनं वाक्यार्थहेतुकं काव्यलिङ्गम् परं तु प्रथमार्धदर्शितसामान्यार्थस्य "कविना निन्दितो रामः" इति मध्यमार्धेन विशेषेण समर्थनादर्थान्तरन्यासाङ्गतया निबद्ध-मिति द्रष्टव्यम् । "रामो निन्द्यः—"इति होमहविराशिनं काक प्रति क्षुद्रस्य यजमानस्याक्षेपः । "काक" इति सम्बोधनम् वाच्यनिन्दया च काकनिन्दाया अभिव्यक्तिः । अत्र व्याज-निन्दया साङ्गं काव्यलिङ्गमर्थान्तरन्यासस्याङ्गमिति ' इत्यधिकं आ पुस्तके. ■ पुस्तके स्वयं भागः प्राग्वर्त्तमानोऽप्यधुना निष्कासितो दृश्यते. इ इद वाक्यं, पश्चिमगुदाहरणद्वयं, तदेकतरवृत्तिश्च केवलं ■ पुस्तके दृश्यते, आ इ पुस्तकयोस्तु नैवोपलभ्यते. ४. 'सूर्योऽपि' इति पाठ आधारभूते ■ पुस्तके.

## ६३. विकस्वरः

**[1]समर्थनं विशेषस्य सामान्येनास्य तेन चे[2]त्[3] ।**
**उपमाविधया वार्थान्तरवत्स विकस्वरः ॥९५॥**

विशेषस्य सामान्येन समर्थनं विधाय सामान्यप्रसिद्धावपरितुष्यता, उपमारीत्या, अर्थान्तरन्यासविधया वा, पुनर्विशेषान्तरमुपन्यस्य, चे[4]द् यदि, समर्थनं, स विकस्वरालङ्कारः ।

यथा—

कलिप्रिये मुनिवरे माधवो विनयान्वितः ।
वक्रोऽपि वन्द्यस्तेजस्वी नृ[5]णां बालसुधांशुवत् ॥२७३॥

कलहप्रिये मुनिवरे नारदे, माधवो विष्णुः, विनयशाली· । 'अभूत्' इति शेषः । माधवो [6]माधवरायश्च [7]राजद्वारि कदाचिदागते [8]कलिप्रियेऽपि तपस्विनि विनयान्वितः । 'अभवत्' इति शेषः । कलहप्रियेऽपि विनयकरणं सामान्योपन्यासेन समर्थयति । वक्रोऽपि वक्रकोऽपि, कलह[9]प्रियत्वात् । चन्द्रपक्षे, वक्रः कुटि[10]लरेखः । तेजस्वी [11]मनुष्यो वा [12]देवो वा [13]नृणां वन्द्यो [14]नमस्करणीयो भवति । [15]सामान्यार्थे बुद्ध्यनारोहमाशङ्क्य उपमारीत्या विशेषोपन्यासेन सामान्यं समर्थयति–'बालसुधांशुवत्'। तुल्यार्थे

***Karikā 95.*** *When a particular proposition is supported by a general one which again, is supported by a particular instance in the manner of Upamā or Arthāntaranyāsa, the figure is Vikasvara.*

278. Mādhava (=1. God Viṣṇu; 2. Pesava Mādhavarao I) is humble before the premier sage (=1 viz Nārada· 2. a particular ascetic at the Pesavā's door) who is fond of strife. Even a crooked person or object, if brilliant is to be bowed to by [illegible] in the [illegible] of the new moon (i. e the moon appearing on the second day of the bright fortnight).

---

१. अत आरभ्य ग्रन्थभागस्त्रिष्वपि [illegible] आ इ पुस्तकेषु साधारण्येन वर्तते. २. 'यद्' —आ. ३. 'तेन सामान्यस्य यत्समर्थनं क्रियते स विकस्वरालङ्कारः'—आ. ४. 'नृणां' —आ, इ. ५. 'माधवरावश्च'—अ, इ 'प्रकृतो राजा च'—आ. ६. 'राजद्वारे'—आ. ७. 'कलहप्रियेऽपि'—आ. ८ 'भवतीति शेषः'—आ, इ. ९. 'कलहकारित्वात्'—आ, इ. १०. 'भ्रुकुटिरेखः'—अ ११. 'पुमान्' इति इ पुस्तके, आ पुस्तके [illegible] नास्त्येव. १२. नास्ति [illegible] पुस्तकयोः. १३. नास्ति [illegible] पुस्तके. १४. नास्ति आ इ पुस्तकयोः. १५. 'सामान्यार्थे...समर्थयति' [illegible] स्थाने 'उक्तार्थेऽपरितुष्यन् तमुपमारीत्या विशेषोपन्यासेन समर्थयति' इति [illegible] पुस्तकयोः.

चतिः । वक्रोऽपि द्वितीयेन्दुर्यथा नृणां वन्द्यस्तथेत्यर्थः ।

अर्थान्तरन्यासविधया, यथा—

[1]चूते काकं पिकं मन्ये महत्सङ्गो महात्म्यदः ।
[2]राजदारगले रीतिं सुवर्णं को न मन्यते ॥२७४॥

[3]सत्यवसरे राजानं प्रति [4]कस्यचिदुक्तिरियम् ।

## ६४. प्रौढोक्तिः

कार्यातिशयाहेतोस्तद्धेतुभावप्रकल्पनम् ।
यत्र तत्र प्रगदिता प्रौढोक्तिः शास्त्रवित्तमैः ॥९६॥

[5]कार्यातिशयं प्रत्यहेतुभूते वस्तुनि तद्धेतुत्वंप्रकल्पनं [6]यत्र क्रियते, [7]तत्र प्रौढोक्तिः ।

यथा—

[8]क्षीरसागरसंभूतचन्द्रश्वेतं यशस्तव
यमुनातीरसंजाततालीश्यामं परायशः ॥२७५॥

[9]'परेषां शत्रूणाम्, अयशोऽपयशः ।

[10]■■ चन्द्रश्वैत्यातिशयं प्रति क्षीरसागरसमुद्भूतत्वमहेतुरेव, [11]■■

---

274. I regard ■ crow on a mango-tree to be a cuckoo. The association of the great brings forth dignity Who indeed does not regard the bell metal on ■ queen's neck to be gold ?

***Kārikā 96.*** *When something that ■ not the cause of the excellence of ■ effect is treated ■ its cause the figure is termed Praudhokti by best rhetoricians.*

275. Thy glory is bright like the moon born of the Milky Ocean. Thy enemies' infamy is dark like ■ palm-tree grown on the banks of Yamunā.

---

१. 'सता'—आ. २. 'नूते' इति पाठस्त्रिष्वपि ■ आ ■ पुस्तकेषु. ३. 'राजदार्या गले'—आ. ४. 'प्राप्तावसरस्य'—आ; 'अवसरविशेषे'—इ. ५. 'कस्यचित्' इति नास्ति आ पुस्तके. ६. अतः पूर्वं 'यत्र' इति पद ■ पुस्तके. ७. 'तद्धेतुत्वे प्रकल्पनं'—अ. ८. 'यत्र' इति पदमत्र नास्ति आ पुस्तके. ९. '०सागरसम्भातचन्द्र०' इत्यपि पाठान्तरं ■ पुस्तके दृश्यते. १०. 'परेषां...ऽपयशः'—इति नास्ति आ इ पुस्तकयोः. ११. 'क्षीरसागरसम्भातत्व न हेतुस्तत्र'—आ; 'क्षीरसागरसम्भूतत्वमहेतुरेव तत्र'—इ.

तद्धेतुत्वंप्रकल्पनम्[1]। द्वितीयार्धे च तालीश्यामत्वातिशयं प्रति यमुना-तीरसंजातत्वं न हेतुः, तत्र तद्धेतुत्वप्रकल्पनम्। इत्युभयत्र प्रौढोक्तिः।

यथा वा—

चन्द्रकुन्दादिसुश्वेतवस्तूनां भूतपञ्चकैः।
विरञ्चिना विरचितो यशोराशिस्तवाद्भुतः ॥२७६॥

अत्र वर्णनीये राज्ञो यशोराशिधवलिमातिशये चन्द्रादिप्रत्येकतोऽप्यधिके चन्द्रादिभूतपञ्चकनिर्मितत्वमहेतुरेव। तत्र तद्धेतुत्वप्रकल्पनं प्रौढोक्तिः।

## ६५. सम्भावनम्

काव्यकर्त्रा यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये।
यत्र क्रियते तत्र सम्भावनमुदाहृतम् ॥९७॥

यथा—

सहस्रवक्त्रशाली चेद्भवेयं योगवित्तमः[2]।
प्रभवेयं तदा वक्तुं ज्ञातुं माधव[3]! ते गुणान् ॥२७७॥

यथा वा[4]—

तिष्ठेद्यदि तमःस्तोमः श्रीसूर्यस्य पुरश्चरन् (?)।
तदैव राजन्दारिद्र्यं भवदाश्रितभिक्षुके ॥२७८॥

---

276. Thy wonderful ▬ of glory has been fashioned by the Creator out of the five elements of the extremely bright objects like the moon, the Kunda flower, etc.

***Kārikā 97.*** *If a poet with a view to establishing something extraordinary puts forth a guess in the manner 'If it were so—', the figure is declared as Sambhāvana.*

277. O Madhava if I were to be endowed with ▪ thousand mouths and were to become ▪ premier practiser of Yoga, I would be able to describe and comprehend thy good qualities.

278. If the mass of darkness could remain active in the presence of the Sun, then only O king can poverty linger with a Brāhmaṇa (lit ▪ religious mendicant) dependant on you.

१. 'हेतुत्वप्रकल्पनम्'—अ. २. 'योगवित्तम'—अ, आ, इ. ३. 'राघव'—इ.
४. इदं द्वितीयमुदाहरणं तद्वृत्तिश्च केवलं ▬ पुस्तके दृश्यते, आ इ पुस्तकयोस्तु नोपलभ्यते.

अत्र सर्वत्र विपरीतार्थपर्यवसायित्वं सर्वाभिमतम् । तथा च, 'सूर्यस्य पुरस्तमःस्तोमाभावः, त्वदाश्रितानां च दारिद्र्याभावः' इत्यर्थे पर्यवसानम् ।

६६. मिथ्याध्यवसितिः

किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् ।
मिथ्याध्यवसितिस्तत्र गदितालङ्कृतिर्बुधैः ॥९८॥

यथा—

श्रीमाधवं श्रिते भिक्षौ दारिद्र्यं बधिरश्रुतम् ।
चेतश्चक्षुष्मता दृष्टं मूकेन परिकीर्तितम् ॥२७९॥

६७. ललितम्

प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम् ।
ललितालङ्कृतिः प्रोक्ता सर्वालङ्कारव्यावृत्ता ॥९९॥

यथा—

श्रीमन्माधवरायस्य पुरो नीतिविशारदाः ।
निष्पिष्टं गोधुमं पेष्टुं पुनर्वाञ्छन्ति मन्त्रिणः ॥२८०॥

---

*Karikā 98. When, for the purpose of establishing the unreal character of something, another unreal thing is conjectured, there occurs the figure termed Mithyādhyavasiti by the learned.*

279. The poverty of a Brāhmaṇa (i.e. a religious mendicant) taking refuge with revered Mādhava is heard of by the deaf, is perceived by the blind (lit. by one having eyes in the form of intellect alone) and is proclaimed by the dumb.

*Karikā 99. The figure Lalita, which is distinct from all (similar) figures, is announced when a description that is parallel to (lit. the reflected image of) that of the subject of description is imposed on the subject of description.*

280. In the presence of revered Mādhavarāya the ministers conversant with Politics (simply) seek to grind again the already-ground wheat.

---

१. '०प्रकल्पनम्'—अ. २ 'श्रीराघव'—इ. ३. 'श्रीगन्माधवरावस्य'—अ, आ; 'श्रीमद्राघवरावस्य'—इ. ४. 'नीतिप्रदर्शका इति वा पाठः'—इति टिप्पण्यत्र आ पुस्तके.

अत्र नीतिशास्त्रकोविदे स्वयमेव सामादिप्रयोगनिर्णयकर्तरि राज्ञि नीतिप्रदर्शकप्रयत्नं मिथ्याभूतमिव कुर्वाणे नीतिकोविदा राज्ञावगतमपि नयं मुधैवोपदेष्टुं वाञ्छन्तीति प्रस्तुतं निगीर्य तत्प्रतिबिम्बभूतस्य निष्पिष्ट-गोधुमपुनःपेषणरूपस्याप्रस्तुतवाक्यार्थस्य वर्णनं ललितालङ्कारः ।

धाट्यां समागतायां यः प्राकारं कर्तुमिच्छति ।
प्रदीप्ते भवने सोऽयं कूपं खनितुमिच्छति ॥२८१॥

—इति निदर्शनोदाहरणम् । तत्र पूर्वार्धपरित्यागे तु ललितमेव ।

नन्वत्राप्रस्तुतप्रशंसास्त्विति चेत्, न; अत्र प्रस्तुतधर्मिकत्वात् । नापि समासोक्तिः; प्रस्तुते वर्ण्यमाने विशेषणसाधारण्येन सारूप्येण वाऽप्रस्तुतस्फूर्त्यभावात्, इहाप्रस्तुतवृत्तान्तादेव सरूपात्प्रस्तुतवृत्तान्तस्य गम्यमानत्वात् । नापि निदर्शना; शब्दोपात्तयोः प्रस्तुताप्रस्तुतवृतान्तयो-रैक्यारोप एव तत्प्रसारात् । न च विषयं निगीर्य विषयिमात्रोपादानाद्रूपकातिशयोक्तिः; 'मन्त्रिणः—' इति प्रस्तुतधर्मिणं निर्दिश्याप्रस्तुतवर्णनस्य विच्छित्तिविशेषशालित्वात्, रूपकातिशयोक्तौ विषयिवाचकतत्पदेषु लक्षणयैव तत्तदर्थबोधात् । तथा चात्र प्रस्तुतगतत्वेन वर्ण्यमानाप्रस्तुत-वृत्तान्तरूपाप्रस्तुतवाक्यार्थात् प्रस्तुतगतवृत्तान्तरूपो वाक्यार्थोऽवगम्यते, न त्वतिशयोक्तौ, इति तयोर्वैलक्षण्यम् । एवमप्रस्तुतप्रशंसापि रूपकातिश-

---

281 He who intends to build the rampart when the onslaught is imminent indeed means to dig a well when the house is ablaze.

---

१. अतः पूर्वं 'प्रस्तुते धर्मिणि वर्णनीयं वाक्यार्थमवर्णयित्वा तत्रैव तत्सदृशस्य कस्यचिदप्रस्तुतवाक्यार्थस्य वर्णनं ललिताऽलङ्कृतिः ।' इत्यधिकं आ पुस्तके. २. 'सोमादि-प्रयोग०'—अ. ३. 'मन्त्रिप्रदर्श्यमानं प्रदर्शकप्रयत्नं मिथ्याभूतमिव कुर्वाणं सामादि-प्रयोगरूप शास्त्रार्थं विहाय तत्प्रतिबिम्ब०'—आ. ४. 'मन्त्रिप्रदर्श्यमानं नयं विहाय तत्प्रति-बिम्ब०'—इ ५. 'ललिताऽलङ्कृतिः'—आ, इ. ६. इदं पद्यं, वाक्यद्वयात्मिका तद्वृत्तिश्च केवलं अ पुस्तके दृश्यते, आ इ पुस्तकयोस्तु नैवोपलभ्यते. ७. 'प्रकारम्' इति पाठ आधारभूते अ पुस्तके. ८. 'वाप्रस्तुतवृत्तान्तस्फूर्त्यभावात्'—आ. ९. 'ोमात्रोपादानेऽ-तिशयोक्तिः'—आ; 'मात्रोपादानादतिशयोक्ति.'—इ. १०. 'इति धर्मिणं'—आ, इ. ११. 'रूपकातिशयोक्तौ तु...लक्षणयैव बोधोपगमात्' इति भागो नास्ति अ इ पुस्तकयोः. आ पुस्तकेऽप्ययं शोधरूपेण लिखितो दृश्यते.

योक्तितः पृथगेव । तत्राप्रस्तुतवृत्तान्ताद्गम्यमानात्प्रस्तुतवृत्तान्तोऽवगम्यते, अतिशयोक्तौ ■ लक्षणयैव बोधोपगमात् । इत्यभिप्रेत्याह — 'सर्वालङ्कार-व्यावृत्ता' इति । उक्तानेकालङ्कारेभ्यो[1] विलक्षणा, इत्यर्थः ।

यथा वा—

[2]के मन्दा मे बुद्धिः ■ च लसदलङ्कारकविता
जरन्नावा तर्तुं तरलमनसोऽगाधजलधिम् ।
सहायो मे श्रीमद्गुरुचरणपाथोजयुगलं
तथा तारम्बायाः पदकमलयोर्धूलिपटलम् ॥२८२।

अत्र निदर्शनाभ्रान्तिर्न कार्या प्रस्तुतार्थानुपन्यासात्, अप्रस्तुतस्यापि गौणत्वेनोपन्यासाच्च 'मन्दबुद्धया सालङ्कारकाव्यनिर्माणं कर्तुं चपलमनसः—' इति प्रस्तुतार्थप्रतिबिम्बाप्रस्तुतवर्णनेनादौ विषमालङ्कारोपन्यासेन च केवलं प्रस्तुतार्थतात्पर्यस्य गम्यमानत्वात् ।

## ६८. प्रहर्षणम्

विना यत्नेन संसिद्धिरुत्कण्ठाविषयस्य या ।
प्रहर्षणमिति प्रोक्तालङ्क्रिया सा बुधैरिह ॥१००॥

---

282. How contrasted with each other ■■■ my dull intellect and Poetry flashing with अलङ्कार (=1. poetic figures; 2. ornaments) Of me whose mind is wavering to cross the unfathomable ocean by means of ■ worn-out boat, the companion is the pair of lotus-like feet of my revered Guru as also the mass of dust of the lotus-like feet of Mother Tārā.

***Kārikā 100.*** *If one's longed-for object is attained without any effort, there occurs the figure termed Prahaṛṣaṇa by the learned.*

---

१. 'उक्तालङ्कारेभ्यो'—आ. २. ग्रन्थकर्तुरुपोद्घातगतश्चतुर्थश्लोकोऽयम् . ३. 'अप्रस्तुतस्यापि गौणत्वेनोपन्यासाच्च' इति न दृश्यते ■ पुस्तके. ४. 'मन्दबुद्धया...चपलमनसः' इति नास्ति ■ पुस्तके. ५. 'सालङ्कारकाव्यरचनेच्छारूपप्रस्तुतार्थ०'—इ, ६. 'प्रस्तुततात्पर्यस्य'—अ; 'प्रस्तुतार्थे तात्पर्यमात्रस्य'—आ. ७. 'गम्यत्वात्'—अ, इ.

उत्कण्ठा इच्छाविशेषः । तदुक्तं—

'सर्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते ।
तत्प्राप्तीच्छां ससङ्कल्पामुत्कण्ठां कवयो विदुः ॥'

यथा—

यदा समागतं द्वारि भिक्षुकैरर्थवाञ्छया ।
राज्ञा समागतं तावद्दातुं प्राङ्गणसंनिधौ ॥२८३॥

अर्थलाभस्यापि सर्वेन्द्रियसुखास्वादप्रयोजकत्वात्तदिच्छाप्युत्कण्ठैव ।

यथा वा—

यावदुत्कण्ठिता काचिद्रथ्यायां पश्यति प्रियम् ।
तावत्प्रत्यागतं कान्तं दृष्ट्वा प्रमुदिता हि सा ॥२८४॥

[3]'प्रकृतराज्ञो नगरे—' इति शेषः ।

[4]ईप्सितादधिकार्थलाभेऽपि प्रहर्षणम् । यथा—

ढबूकवाञ्छया भिक्षुर्गतो भूपस्य मन्दिरम् ।
दरिद्रपात्रभूताय दत्तं राज्ञा महद्धनम् ॥२८५॥

तत्फलोपाये सम्पाद्यमाने तत्फलस्यैव प्राप्तिर्यत्र वर्ण्यते, तत्रापि प्रहर्षणम् । यथा—

कन्याप्राप्तीच्छया कश्चिद्गुणोपार्जनतत्परः ।

---

283. No sooner had the Brâhmaṇas (lit religious mendicants) assembled at the gate with ■ desire to receive riches than the king arrived near the court-yard for awarding (gifts or money to them).

284. A certain damsel ■■■ overjoyed to see her lover coming back just while she, growing anxious, was looking for him in the street.

285. The beggar had gone to the king's palace with ■ desire to receive ■ half-anna copper coin. To him who had been a receptacle of poverty the king awarded enormous wealth

286. A certain man, intent ■■ acquiring merits with ■ view to

---

१. 'सुसङ्कल्पा०'—अ. २ 'ब्राह्मणसन्निधौ'—आ. ३. इयं वृत्तिरत्र न दृश्यते अ पुस्तके. ४. अत आरभ्य'...sभूद्द्विजोत्तमः । "प्रकृतराज्ञो नगरे" इति शेषः ' इति व्याख्यानभागः केवलं अ पुस्तके दृश्यते, आ ■ पुस्तकयोस्तु नोपलभ्यते.

अध्ययाय गतो यत्र दत्ता तेन सुकन्यका ॥२८६॥

*यथा वा—*

होमं लक्ष्मीप्रदं कर्तुं कुण्डभूखननोद्यतः ।
अर्थराशिं ततो लेभे कृतार्थोऽभूद् द्विजोत्तमः ॥२८७॥

'प्रकृतराज्ञो नगरे' इति शेषः ।

## ६९ विषादनम्

इष्यमाणविरुद्धार्थसम्प्राप्तिश्चेन्निबध्यते ।
तदा विषादनं प्रोक्तालङ्कृतिस्तन्त्रकोविदैः ॥१०१॥

*यथा—*

द्वित्रेष्वहःसु यदि राजचमूः समीया-
न्नास्मत्पुरं प्रेति तदागतसत्सहायाः ।
स्यामभया इति विचिन्तयतः सपत्ना-
नागत्य राघवचमूः सहसा जघान ॥२८८॥

---

supposing a girl, sent for study to a person who gave him away his charming daughter.

287. A premier Brāhmaṇa, with a view to performing the wealth-yielding होम ( a rite in which oblations are offered to gods by throwing ghee etc. into the consecrated fire), was engaged in digging the earth assigned to the hole for receiving the consecrated fire Thereof (i e. from the earth dug by him) he recovered a heap of riches and had his object fulfilled.

**Karikā 101.** *If something contrary to the object desired is described to come to one's lot, the figure is termed Viṣādana by persons conversant with the science (of Poetics).*

288. Raghava's army appeared all of a sudden and killed the enemies who were deliberating in this strain—'If but the royal army does not reach our city in two or three days, we, joined by our allies who would be arriving by then shall be immune from danger."

---

१. '०लङ्क्रिया तन्त्र०'—आ, इ. २. 'यदि'—अ, इ. ३. 'रयागोऽभवाः' इति पाठस्त्रिष्वपि अ आ ■ पुस्तकेषु. ४. 'माधवचमूः'—आ, इ.

## ७०. उल्लासः

एकस्य गुणदोषाभ्यां क्रमेण व्युत्क्रमेण च ।
अन्यस्य गुणदोषौ चेत्तदोल्लासः प्रकीर्तितः ॥१०२॥

एकस्य गुणेनान्यस्य गुणः, दोषेण दोषः, गुणेन दोषः, दोषेण गुणः, चेद् यदि, वर्ण्यते, तदोल्लासोऽलङ्कारः ।

क्रमेणोदाहरणानि[1]—

गुणिनं माधवरायं श्रिताः प्रशंसन्ति भाग्यपरिपाकम् ।
गुणहीना निन्दन्ति स्रष्टारं निर्गुणान्पुंसः ॥२८९॥

दुर्भाग्यं तद्भिक्षोर्न सेवितो येन माधवः स्वर्द्रुः ।
लाभः परमो जातो मुक्ता दुष्टेन जीवन्तः २९०॥

प्रथमपद्यस्य पूर्वार्धमाद्यस्योदाहरणम् तत्र हि राज्ञो गुणेनाश्रित-जनानां गुणो वर्णितः । उत्तरार्धे द्वितीयस्य । तत्र गुणहीनानां निर्गुणत्व-रूपेण दोषेण निर्गुणसृष्टिकर्तुर्विधातुर्दोषो वर्णितः, इत्यन्यदोषेण धातुर्दोषः ।

---

***Kārikā 102.*** *If through the virtues and vices of one, those of another, in regular or inverted order, are pointed out, the figure is termed Ullāsa.*

289. Persons dependent on Mādhavarāya who is endowed with excellent qualities extol the favourable development of their fortune. Meritless persons censure him (viz., the Creator) who created meritless [illegible]

290. Ill-luck indeed of the Brahmaṇa (lit. a religious mendicant) who has not taken shelter under Mādhava who is (as it were) the celestial tree! Even this much was a great gain for us that we (who had been confined on our way to the Peśavā's court by a wicked man) were set free alive by the wicked man.

---

१. अत उत्तरं 'यथा' इत्यधिक ■ पुस्तके. २. 'माधवरायं गुणिनो गुणिनं हृष्ट्वा शंसन्ति गुणलुब्धाः ।' इति पाठः पूर्वार्धस्य आ पुस्तके. ३. माधवरावं'—अ; 'राघवरावं'—इ. ४. 'तद्भिक्षोरसेवितो' — अ; 'तद्भिक्षो न सेवितो'—इ. ५. 'राघवः' — इ. ६. 'अधिकगुणाद्राज्ञः सकाशाद् गुणलुब्धानां गुणलाभो वर्णित इति राज्ञो गुणेन गुणिजनानां गुणः ।' — आ. ■ 'निर्गुणपुंसृष्टिकर्तु०' — आ, इ.

द्वितीयस्य पूर्वार्धं तृतीयस्योदाहरणम्। तत्र हीप्सितदातृ राज्ञो गुणेन भिक्षुकस्य दौर्भाग्यरूपो दोषो वर्णितः। द्वितीयस्योत्तरार्धं तु चतुर्थस्योदाहरणम्। [illegible] हि कस्यचिद् दुष्टस्य क्रौर्यदोषेण तत्कारागृहबद्धानां जीवतां मुक्तिर्गुणत्वेन वर्णिता, इत्यन्यदोषेण बद्धमुक्तानां गुणः। इयं च मार्गे केनचिद् दुष्टेनावरुद्धानां पश्चात्कथञ्चिन्मुक्तानां भिक्षुकादीनामुक्तिः।

एवमुदाहरणान्तराण्युन्नेयानि यथा—

श्रीन्माधव ! कामदेवसुसखे ! लोकोत्तरस्ते गुणो
हर्षत्काननभूरियं सुमनसां गुल्मैः परं भ्राजिता।
नन्दत्पण्डितकोकिलद्विजकुलप्रोल्लासितैः शब्दितै-
र्भृङ्गान् किं सुमनःप्रसङ्गरसिकानाकारयत्यादरात् २९१॥

अत्र वसन्तं प्रकृतराजानं च सम्बोध्य श्लेषेणाह—। कामदेवस्य सुसखा सुमित्रं। वसन्तपक्षे साहचर्यात् राजपक्षे च सादृश्यात्। हे

291. (i) O Vasanta (=Spring personified) that art endowed with grace and art a fast friend of God of Love thy dignity (lit. excellent quality) is of an extraordinary type. Is this blooming forest-ground, that is shining brilliantly [illegible] account of (or, is profusely decorated with) clusters of flowers, by means of the extremely joyous cooings of the swarms of gay and eloquent cuckoo-birds eagerly calling forth the bees that are fond of intercourse with flowers?

Or, (ii) O revered Mādhava that extremely resemblest God of Love! thy virtues are extraordinary. Is this spacious council-floor, that is luminous to the extreme [illegible] account of the groups of noble-minded or learned persons, by means of speeches gracefully delivered by the multitude of gay and cuckoo-like (i.e. sweet-toned) learned Brahmaṇas respectfully inviting the strangers (lit. persons hovering like bees) that take delight in the discourses of the learned?

१. 'द्वितीयपद्यपूर्वार्धे'—आ. २. 'तत्र हि' इति पददयं नास्ति आ पुस्तके. ३. अत उत्तरं 'इत्यन्यगुणेन भिक्षूणां दोषो वर्णितः' इत्यधिकं आ पुस्तके. ४. 'द्वितीयोत्तरार्धं'—आ; 'द्वितीयपद्यस्योत्तरार्धं'—इ. ५. नास्ति आ पुस्तके. ६. 'केनचिद्दुष्टेन यवनादिनावरुद्धमुक्तानां'—आ. ७. 'पश्चाद्विमुक्तानां'—इ. ८. 'भिक्षुकाणामुक्तिः'—आ, इ. ९. 'उन्नेयानि' इत्यस्य स्थाने 'द्रष्टव्यानि' इति आ पुस्तके. १०. नास्ति आ पुस्तके. ११. 'राजानं'—आ; 'प्रकृतं राजानं'—इ १२. 'सखा'—आ. १३. 'मित्रं'—आ. १४. 'राजपक्षे सादृश्यात्, वसन्तपक्षे च साहचर्यात्परस्परोपकारित्वात्'—आ.

श्रीमन् माधव कामदेवसुसखे ! ते गुणो माहात्म्यं, लोकोत्तरः सर्वोत्कृष्टः। तदेवाह—। इयं हर्षन्ती विकस्वरा आनन्दयुक्ता च, काननभूः वनभूः, अन्यत्र गौण्या वृत्त्या महती सभाभूः कर्त्री। सुमनसां पुष्पाणां सुजनानां च, पण्डितानामिति यावत्। ग्लुञ्छैः स्तबकैः समूहैश्च परमत्यन्तं। भ्राजिता सुशोभिता। इति काननभुवो विशेषणम्। नन्दन्तः सानन्दाः, पण्डिताः वाक्चतुराः, ये कोकिलद्विजाः पिकपक्षिणः, तेषां कुलं समूहः, तेन प्रोल्लासितैः सोल्लासमुच्चारितैः। अन्यत्र, नन्दन्तः सानन्दाः, पण्डिताः विद्वांसः, ये कोकिलद्विजाः कोकिलवन्मधुरभाषिणो ब्राह्मणाः, तेषां समूहेन प्रोल्लासितैः वादिप्रतिवादिभावेन संमुच्चारितैः। शब्दितैः शब्दैः करणैः सुमनसां पुष्पाणां सुजनानां पण्डितानां च, प्रसङ्गः प्रसक्तिः सभाप्रसङ्गश्च, तत्र रसिकान् लोलुपान् कुतूहलिनश्च। भृङ्गान् भ्रमरान्, पण्डितचर्चाश्रवणाय भृङ्गवद् भ्रममाणान् पुरुषांश्च आदरात् सादरम्। आकारयति किं समाह्वयति किम्।

अत्र वसन्तगुणेन वनभुवः, राज्ञो गुणेन सभाभुवश्च प्रफुल्लत्वरूप आनन्दरूपश्च गुणो वर्णितः। कोकिलमधुरशब्दितादिलक्षणेन वनभुवो गुणेन भ्रमराणां, पण्डितमधुरशब्दादिलक्षणेन सभागुणेन सभादर्शनरसिकानां च गुणो वर्णितः। इत्यन्यगुणेनान्यस्य गुणवर्णनादुल्लासः। यद्यपि काननभूभृङ्गादिपदेषु शक्त्या श्लेषो नावतरति, तथापि श्लिष्टान्यपदानां सान्निध्यालक्षणया निर्वाह्यः; गूढश्लेषस्यापि सर्वैरङ्गीकृतत्वात्।

---

१. नास्ति आ पुस्तके. २. 'अन्यत्र काननवद्विशाला भूः, गौण्या महती सभाभूरित्यर्थः।'—आ. ३. अतः पूर्वं 'काननभूः' इत्यधिकं ■ पुस्तके. ४. नास्ति आ इ पुस्तकयोः. ५. 'पण्डिततदन्यसभासदामिति यावत्'—आ. ६. नास्ति अ पुस्तके. ■. नास्ति ■ पुस्तके. ८. नास्ति ■ पुस्तके. ९. 'कुलेन'—आ. १०. 'सोत्साहमुच्चारितैः'—आ. ११. 'पण्डितानामित्यर्थः'—आ. १२. नास्ति अ आ पुस्तकयोः. १३. 'प्रसक्तिः' इ. १४. 'कुतूहलदर्शनाय' आ, इ. १५. 'पुरुषान्' इति नास्ति आ इ पुस्तकयोः. १६. 'च' इति नास्ति ■ आ इ पुस्तकेषु. १७. 'श्लेषः शक्त्या नावतरति'—आ. १८. 'सर्वैरङ्गीकारात्'—अ. १९. अत उत्तरं 'यद्वा वसन्तं प्रकृतीकृत्येयमुक्तिः। तत्राप्रस्तुतराजवृत्तान्तपरिस्फूर्त्या समासोक्त्या सङ्कीर्णोऽयम्' इत्यधिकं ■ पुस्तके. अतिरिक्तोऽयं भागः प्राक्सन्नप्यधुना निष्कासितो दृश्यते इ पुस्तके.

## ७१. अवज्ञा।

**एकस्य गुणदोषाभ्यां न चेदन्यस्य तौ क्रमात् ।**
**अवज्ञालङ्कृतिः प्रोक्ता तदालङ्कारवित्तमैः ॥१०३॥**

एकस्य गुणेनान्यस्य गुणालाभः, दोषेण दोषालाभः, चेद् यदि, वर्ण्यते, तदावज्ञालङ्कारः[1]।

यथा—

मदीया चेदुक्तिः सहृदयमनोरञ्जनकरी
न काप्यस्या हानिः कठिनहृदयानादरभरैः ।
पिकैरेवास्वाद्या किसलयततिश्चूततरुजा
किमुष्ट्राणां प्रीतिं जनयतितरां कण्टकभुजाम्[2] ॥२९२॥

अत्र कविताचूतकिसलयतत्योर्गुणाभ्यां कठिनहृदयानामुष्ट्राणां च प्रीणनरूपगुणालाभो वर्णितः, इत्यवज्ञालङ्कारः ।

दोषेण दोषाभावः, यथा—

प्रविवदते यदि तुच्छो
न कापि हानिः सुशीलसाधोर्नुः ।
श्यामो गौरोऽयमिति
व्यारोपः किमीश्वरं स्पृशति ॥२९३॥

---

***Kārika 103.*** *If, through the virtues and vices of one, the absence of the virtues and vices respectively in another is pointed out, the figure is termed Avajñā by highest rhetoricians.*

292. If my composition (lit. speech) gratifies the minds of the noble-hearted (or, of men of taste), it would not in the least suffer on account of the showers of contempt by the hard-hearted (i. e. rubbiless or inappreciative persons). Does the series of tender shoots on a mango-tree that can be enjoyed by cuckoos alone cause excessive delight to camels that devour thorns?

293. Even if a mean person disputes bitterly, no harm whatsoever can be caused to a man that is good tempered and virtuous. Does the imputation of darkness or fairness have any effect on a powerful one (or, on God S'iva or Supreme God)?

---

१. 'तदावज्ञालङ्कृतिः प्रोक्ता'—आ. २. 'कण्टकिभुजाग्' इति पाठस्त्रिष्वपि आ पुस्तकेषु.

धूलिं प्रक्षिपति स्वमूर्धनि गजे[1] राज्ञः श्रियः का क्षति-
र्भस्मोद्धूलनसंयतो यदि हरः[2] कैव क्षतिश्चन्दने ।
विघ्नेशो यदि मूषकेण चरति च्छिन्नं गजेन्द्रस्य किं
राजा कापुरुषादरं प्रकुरुते विद्वज्जने [3] क्षतिः ॥२९४॥

श्लोकद्वयमपि सत्यवसरे राजानं प्रति कस्यचिदुक्तिः । प्रथमे क्षुद्रस्य दोषेण साधोर्दोषाभावो वर्णितः । परं त्वर्थान्तरन्याससङ्कीर्णावज्ञा[4] । द्वितीये गजादीनां दोषेण नृपश्रीप्रभृतीनां[5] दोषाभावो वर्णितः ।

यथा वा—

धत्तूरं यदि रोचते भगवते[6] का मालतीनां क्षति-
र्नागेन्द्रत्वचमादधासि यदि का चीनांशुकानां क्षतिः ।
क्ष्वेडं चेत्प्रभुणा निपीतममृते[7] कैव क्षतिस्तावता
त्वं देवेश[8] पिशाचभूतविरतः का नाम हानिः सताम् ॥२९५॥

भगवच्छ्रीमहारुद्रस्य मनस्विवादोषेण मालत्यादीनां दोषाभावोऽत्र वर्णितः । प्रस्तुतराज्ञः पुरो निजकाङ्क्षतद्योतनाय हरं[9] प्रस्तुतीकृत्य कस्यचिद्भृत्यस्योक्तिरियम् । प्रस्तुताङ्कुरसङ्कीर्णेयमवज्ञा । यदि च महारुद्रं प्रत्येवेयमुक्तिस्तदा शुद्धा[10] सा ।

---

294. While an elephant throws dust on his own head, what injury comes to the king's majesty? If S'iva restrains his passions by smearing his body with ashes what loss indeed accrues to sandal? If God Ganeśa (lit. the controller of obstacles) rides on a mouse, what does the lord of elephants lose? If the king highly honours a contemptible fellow, what harm comes to the society of the learned?

295. O lord of gods (i e God S'iva) if Thy Lordship hast liking for the thorn-apple, what injury occurs to jasmines? If thou puttest the skin of a lordly elephant, what do China (i. e. silken) garments suffer? If venom was swallowed up by Thy Lordship, what harm to the nectar by that much? If thou art extremely fond of fiends and ghosts, what indeed do the virtuous lose?

---

१. 'गजो'—आ. २. 'शिवः'—आ. ३. '०सङ्कीर्णावज्ञः'—इ. ४. 'पुष्पादीनां'—आ. ५. नास्ति आ पुस्तके. ६. 'त्वं चेदेशपिशाच०'—अ. ७. 'शिवं'—आ. ८. 'शिवं'—आ. ९. 'शुद्धावज्ञा'—आ, इ.

### ७२. अनुज्ञा

दोषस्याभ्यर्थना यत्र तत्रैव गुणदर्शनात् ।
क्रियते तत्र विदुषानुज्ञालङ्कार इष्यते ॥१०४॥

यथा—

सेवया माधवस्यास्य लभन्तां परमं पदम् ।
दूरे स्थितौ वयं धन्या गुणवर्णनकाङ्क्षिणः ॥२९६॥

माधवो विष्णुः, प्रस्तुतो राजा च । परमं पदं सायुज्यप्राप्तिरूपं; परा उत्कृष्टा, मा लक्ष्मीः, यस्मात्तत्तथोक्तं पदं ग्रामनगरादिरूपम् । अन्यत्स्पष्टम् ।

### ७३. लेशः

गुणदोषयोः क्रमेणैव दोषत्वगुणते यदि ।
प्रकल्प्येते तदा लेशो व्याजस्तुतिपृथक्स्थितः ॥१०५॥

यथा—

जनन्यो बान्धवाः पत्न्योऽप्यशूराणां यथेप्सितम् ।

---

***Kārikā 104.*** *When one means to offer censure to somebody by displaying his merits just then, the learned announce the figure* ***Anujñā.***

296. Let others obtain परम पद (=1 the highest stage, viz that of non-duality or salvation; ■ plots of ground yielding abundant revenue) by attending on this Mādhava (=1. God Viṣnu; 2. Peṣavā Mādhavarao I). We who are desirous of eulogising His ■ his virtues are lucky enough as we stay at ■ distance

***Kārikā 105.*** *If merits and defects are respectively depicted as defects and merits, there occurs (the figure) Leśa which is distinct from (the figure) Vyājastuti.*

297. The mothers, brothers and also wives of cowards sleep drow-

---

१. 'राघवस्यास्य'—इ. २. 'स्थिते'—इ. ३. 'माधवो—राघवो'—अ; 'राघवो'—इ. ४ रामचन्द्रः'—अ. ५. नास्ति आ इ पुस्तकयोः. ६. 'सायुज्यप्राप्तिः'—आ, इ. ७. 'यस्मादिति तथोक्तं'—आ. ८. अतः पूर्वं 'तादृशं' इत्यधिकं आ पुस्तके. ९. 'ग्रामनगरादि'—आ. १०. 'लेशोऽगतार्थो व्याजनिन्दया'—आ.

प्रनिद्रन्ति न ते शूर ! श्वेतच्छौर्यस्य ते फलम् ॥२९७॥

अत्राशूरत्वरूपे दोषे जनन्यादीनां नैश्चिन्त्यकारितया गुणत्वं कल्पितं, शौर्यरूपे गुणे च जनन्यादीनां चिन्ताकारितया दोषत्वं कल्पितमिति लेशाख्योऽलङ्कारः । न चेयं व्याजस्तुतिराशङ्कनीया; सुखदुःखविभागिनोऽन्तरङ्गस्य कस्यचिद्बन्धुजनस्योक्तौ स्तुतौ निन्दायां वा तात्पर्याभावात् । अत एव स्तुत्यादितात्पर्यग्राहकं धन्यादिपदमप्यत्र नास्ति । अपि तु शौर्यं जनन्यादीनामतिचिन्ताकरमित्यत्रैव तात्पर्यम् ।

यथा वा—

शूरा वीरविमर्दनव्यसनिनो जीवेऽप्यरं निःस्पृहाः
शस्त्राघातपराजयप्रचकिताश्चिन्ताकुलाः सर्वदा ।
धन्यास्ते रणनामधेयसभया भुक्त्वा यथेच्छं सुखं
निद्रन्ति प्रहसन्ति निर्भयधियो गायन्ति खेलन्ति च ॥२९८॥

व्याजस्तुत्यादिसङ्कीर्णोऽयं लेशः ।

न च व्याजस्तुत्यादेः सर्वत्र लेशे सम्भवाल्लेशस्तदन्तर्गत एवास्त्विति वाच्यं; व्याजस्तुतिं विनापि पूर्वोदाहरणस्य दर्शितत्वात्, लेशं विनापि व्याजस्तुतेरुदाहरणस्याप्युक्तत्वाच्च तदेवोक्तं—'व्याजस्तुतिपृथक्स्थितः'। व्याजस्तुत्या ■ गतार्थः, इत्यर्थः ।

---

sily to their hearts' content. O brave man it is not the case with thy people. This is indeed the outcome of thy bravery.

298. Brave men are given up to the evil practice of crushing warriors, are extremely indifferent ■■■ to their own existence, are apprehensive of strokes of weapons and of defeats and ■■ always overlaid with anxiety. Blessed indeed ■■ the persons (viz., the cowards) getting frightened even by the ■■■ of war who having enjoyed luxuries to their hearts' content, sleep, laugh sing and play with their minds secure.

---

१. अतः पूर्वं 'अथ ■' इत्यधिकं ■■ पुस्तके. २. 'लेशोऽलङ्कारः'—आ. ३. 'व्याजस्तुतिर्व्याजनिन्दापि वाशङ्कनीया'—आ. ४. 'कस्यचिद्बन्धुजनस्योक्तौ स्तुतौ निन्दा—' इत्यतः परं त्रीणि पत्राणि नष्टानि लक्ष्यन्ते इ पुस्तके. ५. '०प्रचकिता दुक्तागरैर्व्याकुलाः (?)'—अ. ६. 'व्याजस्तुत्या सङ्कीर्णो०'—अ. ७. '०स्तदन्तर्भूत'—आ. ८. 'प्रदर्शितत्वात्'—आ. ९. 'व्याजस्तुत्यादे०'—आ. १०. 'अगतार्थो व्याजनिन्दया'—आ. ११. 'व्याजनिन्दया व्याजस्तुत्या च न गतार्थः'—आ.

## ७४. मुद्रा

**प्रकृतार्थपरैः शब्दैः सूचनीयं हि सूच्यते ।**
**यत्र तत्र समाख्याता मुद्राख्यालङ्कृतिर्बुधैः ॥१०६॥**

यथा—

सार्वभौम ! तवारीणां मातरिश्वा सुशीतलः
घने वने विचरतां संतापाय वियोगिनाम् ॥२९९॥

[illegible] 'तवारीणां मातरि श्वा' इति राज्ञः शत्रूणां गालिप्रदानं सूचनीयं वस्तु प्रकृतार्थप्रतिपादकैरेव शब्दैः सूचितम्, इति मुद्रालङ्कारः

यथा वा—

अर्थिदारिद्र्यहारी त्वं वदान्यपणहार्यहम् ।
योद्धुं समागतो राजञ्जयाकाङ्क्षी सुरद्रुमम् ॥३००॥

प्रतिस्पर्धिनो हि स्वजयाकाङ्क्षेति लोकक्षुण्णोऽर्थः प्रकृतोऽर्थः । तत्प्रतिपादकैरेव शब्दैः 'बलवत्तरदारिद्र्यलिपिभागहं सर्वत्र जयं लब्धवान्, अद्य [illegible] त्वत्कर्तृकजयाकाङ्क्षी सन् कल्पद्रुमतुल्यं त्वां समागतोऽस्मि' इति

---

***Kārikā 106.*** *When what is to be suggested is suggested by means of words denoting (in their face) the subject in hand, there is declared by the authorities the figure termed Mudrā.*

299. O Emperor ! may the extremely cool मातरिश्वा (= 1. wind, as applied to the subject in hand; 2. [illegible] abusive word, denoting [illegible] dog's incest with the enemies' mother, [illegible] meant to be suggested by the writer) be for the distress of thy enemies that are separated from their beloveds and are roaming in a dense forest.

300. O king ! thou art accustomed to dispel the poverty of (thy) suppliants and I am accustomed to baffle the wagers of the munificent. I have [illegible] to thee who art the celestial tree for a combat, longing for victory (—1. my victory, as applied to the subject in hand; 2. thy victory, [illegible] suggested by the author).

---

१. 'संतापपत्ययोगिनाम्'—आ. २. 'तव शत्रूणां'—आ. ३. 'अत्र'—अ. ४. अत उत्तरं 'कल्पद्रुमं त्वां' इत्यधिकं आ पुस्तके ५. 'भवत्वर्तृक०'—अ. ६-७ पद्यद्वयं नास्ति आ पुस्तके.

सूचयितुं योग्योऽर्थः सूचितः। स्वकर्तृको जयः प्रकृतार्थः सम्बोध्य-राजकर्तृको जयः सूचयितुं योग्यः। स 'कल्पद्रुम'पदसान्निध्यात्,

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते।'

इति न्यायाद् भिक्षुकप्रयोजनान्यथानुपपत्त्या च 'जयाकाङ्क्षी' इति पदेन प्रकृतार्थपरेण सूचितः, इत्यभिप्रायः।

## ७५. रत्नावली

क्रमिकाप्रकृतार्थानां न्यासो यत्र विधीयते।
प्रकृतार्थप्रकथने रत्नावलीति सा मता ॥१०७॥

यत्र प्रकृतार्थवर्णने प्रसिद्धक्रमभाजामप्रकृतानामर्थानां सन्न्यासो विधीयते, तत्र सा रत्नावलीत्यलङ्कारः।

यथा—

ऐरावतगजारूढः सयमोऽजलनायकः।
धनाधीशो विजयते राजा माधवभूपतिः ॥३०१॥

ऐरावतसदृशगजारूढः। अजडाः सुबुद्धयः, तेषां श्रेष्ठः। जलयो-रैक्यात्, अकारश्लेषाच्च यमेन सदाचारादिनियमविशेषेण [illegible] वर्त्तमानः,

---

***Karika 107.*** *When in the course of the narration of an object under discussion, objects that are not under discussion are brought together in their celebrated order of succession, the figure is known as Ratnāvalī.*

301. Victorious is king Madhava lord of the Earth, ऐरावतगजारूढ (=1. who is mounted on [illegible] elephant resembling Airavata, [illegible] applied to the king; [illegible] Indra mounted [illegible] the elephant Airāvata), सयम (=1. who observes great moral vows, [illegible] applied to the king; 2. the celebrated God Yama), जलनायक (=1. अजडनायक i. e chief among the intelligent, [illegible] applied to the king; 2. the lord of waters viz, God Varuṇa) and धनाधीश (=1 who owns vast treasures, [illegible] applied to the king; 2. Kubera, the lord of wealth)

---

१. 'योग्यार्थः'—अ. २. 'स्वकर्तृको जयः...सूचित इत्यभिप्रायः' [illegible] स्थाने 'अत एवोक्तं "कल्पद्रुमम्" इति कल्पवृक्षतुल्यम् अर्थिदारिद्र्यहारिणा वदान्यपणहारिणि जिते एवार्थिनो दारिद्र्यनाशः स्यान्नान्यथेति भावः' इति आ पुस्तके. ३.'०क्रमशालिना०'—आ. ४. '०मकृतानां०—अ. ५. 'सन्यासो'—अ ६. 'नायकः'—आ. ७. 'अकारश्लेषाच्च' इति नास्ति आ पुस्तके. ८. नास्ति आ पुस्तके.

■ प्रसिद्धो यमश्च  धनाधीशः कोशशाली[1] कुबेरश्च[2]

अत्र राज्ञो वर्णने कृते प्रसिद्धसहपाठानामप्रकृतानामिन्द्रयमवरुण-कुबेराणां दिक्पतीनां न्यसनं रत्नावली ।

७६. तद्गुणः, ७७. पूर्वरूपं च

अन्यगुणग्रहोऽन्यस्य स्वगुणत्यागतस्तु यः ।
तद्गुणालङ्कृतिः प्रोक्तोल्लासालङ्कारतः[3] पृथक् ॥१०८॥
पुनः स्वगुणसम्प्राप्तिः पूर्वरूपमुदाहृतम् ।
पूर्वरूपमसुं केचिदामनन्तीह तद्गुणम् ॥१०९॥

उभयं, यथा—

ज्याकर्षणे रणे राजन्कर्णान्तिकमुपेयुषाम् ।
करजानां त्विषा तेऽद्य पद्मरागति मौक्तिकम् ॥
जाने तदेव यशसा पुनः श्वेतं च कासते ॥३०२॥

अत्र पूर्वार्धद्वये[4] तद्गुणोऽलङ्कारः । तृतीयार्धसाहित्ये सति तु पूर्वरूपालङ्कारः ।

नन्वन्यगुणेनान्यत्र गुणोदयस्योल्लासेऽपि दर्शनात्तद्गुणस्योल्लासात्को विशेषः ?—इति चेत्, शृणु—। उल्लासे हि 'गुण'शब्दो दोषप्रतिपक्षवाची । अन्यगुणेनान्यत्र गुणोदयोऽपि न तस्यैव गुणस्य सङ्क्रमः, किं

---

***Kārikās 108-109.*** *When an object is represented as assuming the quality of another object after giving up its own quality, the figure is termed Tadguṇa which is distinct from the figure Ullāsa. When the object is further represented ■ recovering its own quality, the figure is termed Pūrvarūpa. Some rhetoricians give the name Tadguṇa to this Pūrvarūpa.*

302. O king! thy pearl (viz., the pearl in thy ear-ring) becomes ■ ruby ■ account of the lustre of thy nails reaching the proximity of thy ■■ ■ the course of thy pulling the bow-string on the battle-field. The ■■■ pearl shines bright again, I fancy, due to thy glory.

---

१. 'प्राज्यधनस्वामी'—आ. २. कुबेरश्च' इति नास्ति आ पुस्तके. ३. 'सोक्तो•' —आ. ४. 'अर्धद्वयेन'—आ.

■ सद्गुरूपदेशेन सच्छिष्यस्य ज्ञानोत्पत्तिवत् तद्गुणजन्यत्वेन सम्भावितस्य गुणान्तरस्योत्पत्तिः। तद्गुणे ■ 'गुण'शब्दो रूपरसगन्धादिपरः[1]। तत्रान्यदीयगुणग्रहणं रक्तस्फटिकादिन्यायेनान्यदीयगुणेनैव रञ्जनं विवक्षितम्। उदाहरणेऽपि च तथैव दर्शितम्। इत्यभिप्रेत्याह– 'उल्लासालङ्कारतः पृथक्' इति।

[2]केचिदालङ्कारिकाः, ■ पूर्वरूपं, तद्गुणमामनन्ति। तन्मते पूर्वरूपालङ्कारस्य विषयो मृग्य इति ज्ञेयम्।

## ७८. अतद्गुणः

मिलितस्य पदार्थस्य गुणानङ्गीकृतिस्तु[3] या।
अतद्गुणः स सम्प्रोक्तो गुणावज्ञाविलक्षणः ॥११०॥

यथा—

शुद्धो यद्यपि राजेन्द्र! त्वयि रक्तं मनो मम।
रक्ते मनसि नीतस्त्वं शुद्धोऽपि च न रज्यसि ॥३०३॥

नन्वन्यगुणेनान्यत्र गुणानुदयस्य गुणावज्ञायामपि दर्शनादवज्ञातोऽतद्गुणस्य को विशेषः[4]? इति चेत्, उच्यते–। अवज्ञायां 'गुण'शब्दो दोषप्रतिपक्षवाची[5] गुणानुदयोऽपि न तस्यैव गुणस्यासङ्क्रमः, किं तु सद्गुरूपदेशेनासच्छिष्यस्य ज्ञानानुत्पत्तिवत् तद्गुणजन्यत्वेन[6] सम्भावितस्य

---

***Kārika 110.*** *If there is the non-adoption by another thing of the quality of ■ thing coming ■ contact with it the figure is termed Atadguṇa which is distinct from the figure Avajñā relating to merits.*

303. O lord of kings! although thou art शुद्ध (1. white, i.e. bright; ■. pure), still in association with thee my heart has become रक्त (=1. tinged or red · 2. enamoured) Pure (i e. colourless) ■ thou art, thou, though placed in ■ रक्त (=1. tinged or red; 2 love smitten) heart, dost not become red or affected with passion.

---

१. 'रूपरसगन्धादिगुणवाची'—आ. २. 'केचिदालङ्कारिका.....इति ज्ञेयम्।' इति भागः केवलं अ पुस्तके दृश्यते, आ पुस्तके तु नैवोपलभ्यते. ३. '०कृतिस्तथा'—अ. ४. भेदः'—आ. ५. '०पक्षिवाची'—अ. ६. 'गुरुगुण०'—आ.

गुणान्तरस्यानुत्पत्तिः। अतद्गुणे तु 'गुण'शब्दो रूपादिपरः। अन्यदीय-गुणाग्रहणं ■ जपाकुसुमसंनिहितपाषाणन्यायेनान्यदीयगुणेनारञ्जनम्। इत्यभिप्रायेणोक्तं—'गुणावज्ञाविलक्षणः' इति।

नन्ववज्ञा तद्गुणश्चेति द्वावप्यलङ्कारौ 'सत्यां कारणसम्पत्तौ कार्यं ■■ न जायते' इति विशेषोक्तिसामान्यलक्षणाक्रान्तत्वाद् विशेषोक्ता-वन्तर्भवितुमर्हतः,—इति चेत्, सत्यम्; तथापि तयो रुल्लासतद्गुणप्रतिद्वन्द्विना विशेषरूपेण विशेषार्थावगतयेऽलङ्कारान्तरतया पृथङ् निर्देशः, इत्यवगन्तव्यम्।

## ७९. अनुगुणः

प्राक्सिद्धस्वगुणोत्कर्षः परसान्निध्येन वर्ण्यते।
आनुगुण्यादनुगुणं तमाहुः काव्यपाठिनः ॥१११॥

प्राक्सिद्धस्य स्वगुणस्य परसान्निध्येनोत्कर्षो यो वर्ण्यते, तमनुगुण-मलंकारमाहुः।

यथा—

रुद्रांशप्रभवः स्वयं विधिमुखैर्देवैर्वरैरर्चितः
सुग्रीवादिकपीश्वरैः प्रणयिभिर्नीतोऽतिगर्वं पुनः।

---

***Kārika 111.*** *If the already-established quality of a thing is described to rise high on account of its proximity to something else, the figure is termed Anuguṇa by persons conversant with poetry due to there being similarity in qualities.*

304. This Maruti (=Hanumān, refers to Peṣava Mūdhavarao I) is himself born of ■ portion of Rudra, is honoured by means of boons by gods led by the Creator and is further pu. to extreme exaltation by the chiefs of monkeys headed by Sugriva who are attached to him Ah how

---

१. 'इत्यभिप्रायेणैवोक्तं'—आ. २ '०प्रतिद्व०द्वं नाविशेषरूपेण'—अ. ३. 'विशेषा-र्थगतये'—अ. ४. 'काव्यभूषणम्'—आ. ५. 'वर्ण्यते यः'—अ. ६. 'तम्' इति पदं नास्ति अ पुस्तके. ७. 'तमनुगुणं काव्यालङ्कारगाहु'—आ.

भूपालार्चितपादपीठबलवच्छ्रीराघवक्ष्मापते-
र्माहात्म्येन दुरासदोऽस्य किमहो ब्रूमो बलं मारुतेः ॥३०४॥

'अयं मारुतिः' इति शेषः ।

श्रीमाधवनृपमुद्दिश्याप्रस्तुतप्रशंसारूपेयं कस्यचिदुक्तिः । अत्र रुद्रांशतया स्वत एव बलिनो ब्रह्मादिवरप्रदानशालिनः सुग्रीवादिकपीश्वरसहायवतः सार्वभौमश्रीरामचन्द्रप्रभावेण दुर्धर्षस्य मारुतेः प्रशंसया महावीरप्रभवस्य भक्तिदानसत्कारादितोषितदेवब्राह्मणदत्ताशिषो बलवत्तरमित्रसहायताशालिनो महाप्रभुराघवरायप्रभावातिशयदुर्धर्षस्य प्रकृतराज्ञो माधवरायस्य प्रशंसा व्यज्यते । स्वतःसिद्धस्य मारुतेर्बलस्य गुणस्य ब्रह्मादिवरदानसुग्रीवादिसाहाय्यश्रीराघवप्रभावातिशयानां संनिधाने सत्युत्कर्षो वर्णितः, इत्यनुगुणोऽलङ्कारः ।

यथा वा—

पद्मरागायते मुक्ताद्वन्द्वं नस्यधरत्विषा ।
तन्मध्ये पद्मरागेण परभागाद्विशिष्यते ॥३०५॥

रौद्रोऽवरोधेषु कस्याश्चित्काञ्चित्प्रत्युक्तिरियम् । तद्गुणानुगुणयोः सङ्करोऽयम् ।

---

shall we describe the strength of this Māruti who is unassailable on account of the majesty (i.e., awe) of the mighty divine king Rāghava (=Rāma refers to Peṣavā Raghunātharao) whose foot-stool is worshipped by other kings !

305. The two pearls on thy nose shine like rubies on account of the radiance of thy lower lip The ruby lying between the two pearls is individualised ▬ account of the excess of its lustre (or, excels the remaining portion of the ornament).

---

१. 'माधवराजानमुद्दिश्या०'—आ. २. '०वरदानशालिनः'—आ. ३. '०सहायतः'—आ. ४. 'श्रीरामचन्द्रप्रभावेन'—आ. ५. 'दानसत्कारतोषितदेवब्राह्मण०'—आ. ६. '०राघवराव०'—अं, आ. ७. 'माधवरावस्य' इति ▬ पुस्तके; ▬ पुस्तके तु नास्त्येवेदं पदम्. ८. '०श्रीरामचन्द्रप्रभाव०'—आ. ९. 'अत्र पूर्वार्धे तद्गुणः । उत्तरार्धे त्वनुगुणः । तयोरङ्गाङ्गिभावेन सङ्करः ।' इति वृत्तिपाठः ▬ पुस्तके.

## ८०. मीलितं, ८१. सामान्यं च

**मीलितं तत्र सादृश्याद्भेदो यत्र न भासते ।**
**सामान्यं यत्र सादृश्याद्विशेषो नोपलक्ष्यते ॥११२॥**

मीलितं, यथा—

**केतकीकुसुमरेणुपाण्डुरे**
**सुभ्रु ! ते वपुषि चन्दनद्रवः ।**
**लक्ष्यते न च तवारुणाधरे-**
**ऽलक्तकोऽप्यपरभागतां गतः ॥३०६॥**
**निसर्गारक्तपदयोर्लाक्षारागो न लक्षितः ।**
**अधुना तत्परिच्छिन्नं हृदयं मे पदाङ्कितम् ॥३०७॥**
**लोचने हरिणगर्वमोचने**
**कज्जलं तव पुरा न लक्षितम् ।**
**वीक्षितेऽत्र मुकुरे मयाधुना**
**लक्षितं[2] पुनरहो ममाधरे ॥३०८॥**

---

*Kārikā 112* *Milita occurs when the difference or distinction (between two objects) is not perceivable on account of extreme similarity.*

*Sāmānya occurs when the distinguishing element is not marked out on account of extreme resemblance (between two objects).*

306. O charming-browed damsel who art pale like the pollen of Ketaki flowers! the sandal-paste is not perceptible on thy body which is pale like the pollen of Ketaki flowers; so also the light (or faint) red dye on thy ruddy lower lip.

307. The lac-dye was not observed on thy feet that are red by nature Now it is surmised from my heart that bears the mark of thy feet.

308. O lady dispelling the vanity of ■ deer! the black collyrium was not formerly perceptible in thy eye Nevertheless ■ has been traced, strangely enough, on my lower lip now when this mirror ■ looked in.

---

१. अत्र आ पुस्तकस्था टिप्पणी—'अनुमितम्। तावतापि न भेदावगमः। अतोऽत्रोन्मीलिताशङ्का न कार्या।' इति. २. 'वीक्षित'—आ.

ताम्बिकाधरसुबिम्बयावकः
सायको हृदिभुवोऽसुहायकः ।
लक्षितो न मुकुरे मयाधुना
वीक्षितो नयनयोस्तु मे पुनः ॥३०९॥
कस्तूरीचन्द्रकं भाले मालां मारकतीं गले ।
नीलचीनांशुका ध्वान्ते यातेयं नैव लक्षिता ॥३१०॥
हीरकाञ्चितविभूषणोज्ज्वला-
स्तारहारमहसाधिकाश्रियः ।
क्षौमवीतवपुषोऽभिसारिका
यान्ति चन्द्रमहसाप्यलक्षिताः ॥३११॥
स्वभावान्मन्थरगतिर्वीक्षणे वाचि वक्रता ।
कान्तिर्मुखेऽपि सहजा लक्ष्यते न मदक्रमः ॥३१२॥
एवं क्रीडति लोकोऽयं पुण्यग्रामेऽतिनिर्भयः ।
श्रीमाधवे सार्वभौमे प्रजाः पालयति प्रभौ ॥३१३॥

---

309. The lac-dye on thy lower lip resembling a charming Bimba-fruit, which (viz. the lac-dye) is a fatal arrow of the Mind-born God (viz., Cupid), was not detected (previously) by me Nevertheless I now traced it out on my eyes through the mirror.

310. This damsel robed in dark silken garments bearing the musk-mark on her forehead and putting on an emerald-necklace on her neck, was not observed while she was walking in the dark.

311. अभिसारिकाs (= who either go to meet their lovers or keep an appointment made by them), flashing with ornaments inlaid with diamonds, with their beauty intensified due to the lustre of their radiant necklaces and with their bodies clad in white silken garments, roam about unobserved even in the moonlight

312. She is slow of pace by nature. The crookedness in her glances and speech, as also the loveliness of her face, is inborn. The course of her intoxication (or, of her lustful passion) is not to be marked.

313. Thus sport these people, extremely secure in the town of Poona (lit in the holy village), while revered Madhava, the paramount sovereign, guards his subjects

---

१. 'प्रिये'—आ. २. 'पुरे ग्रामेऽपि निर्भयः'—आ.

[illegible] सप्तस्वपि श्लोकेषु मीलितमलङ्कारः ।

तत्राद्ये 'केतकीकुसुमरेणुपाण्डुरे' 'सुभ्रु' इति च सम्बोधने । '—पाण्डुरे' इत्यन्तं वपुषो विशेषणं [illegible] । नास्ति परभागो गुणोत्कर्षो यस्येत्यपरभागः, [illegible] भावस्तथोक्ता, ताम् । परभागाभावमिति फलितोऽर्थः । गतः प्राप्तः । परभागं न गत इति तात्पर्यार्थः । अत्र नायिकावपुषश्चन्दनद्रवस्य च परस्परं पाण्डुरतागुणसाम्यात्, एवमधरालक्तकयोरुणिमसाम्याच्च, भेदानवभासः ।

द्वितीये चरणलाक्षारागयोरारुण्यगुणसाम्याद्भेदानवभासः ।

तृतीये 'हरिणगर्वमोचने' इति सम्बोधनम् । अत्र मृगदृशो नयनयोः [illegible] एव सुशोभितयोः कज्जलन्यासानवभासः ।

चतुर्थे, तावको योऽधरः, [illegible] एव सुबिम्बं सुष्ठु बिम्बफलं, तत्र यो यावकस्तथोक्तः । हृदिभुवो मनसिजस्य सायको बाणः । असूनां कामिप्राणानां, हायको नाशकः । न लक्षितो मया न ज्ञातः । इति यावकविशेषणानि । अधुना इदानीं । मुकुरे पुरोवर्तिभित्त्यादिगतादर्शे । तन्मध्ये, इत्यर्थः । मे नयनयोर्वीक्षितः । त्वत्कृतनयनचुम्बनादिति भावः । अनेन विपरीतरतं लक्ष्यते । अत्राधरबिम्बयावकयोरुणिमगुणसाम्याद्भेदानवभासः।

लाक्षारागादेर्हृदयादौ दर्शनेन वस्तुस्थितिज्ञानेऽपि भेदानवभासाच्छ्लोकत्रयेऽस्मिन्नुन्मीलितभ्रान्तिर्न कार्या । अस्तु वा श्लोकत्रये उत्तरार्धे वक्ष्यमाणमुन्मीलितमेव, न [illegible] पूर्वार्धेऽपि । नास्माकमाग्रहः ।

पञ्चमे दूत्या नायकं प्रत्युक्तिः । 'दधती' इति शेषः । अत्रान्धकारकृष्णाभिसारिकयोः कृष्णत्वगुणसाम्याद्भेदानध्यवसायः ।

षष्ठे चन्द्रज्योत्स्नाशुक्लाभिसारिकयोरुज्ज्वलत्वगुणसाम्याद्भेदानवभासः ।

---

१. अत उत्तरं 'इति' इत्यधिकं आ पुस्तके. २. 'सम्बोधनम्'—आ. ३. इदं वाक्यं नास्ति आ पुस्तके. ४. इदं वाक्यं नास्ति आ पुस्तके. ५. पदद्वयं नास्ति [illegible] पुस्तके. ६. 'एणीदृशो'—आ. ७. पदत्रयं नास्ति आ पुस्तके. ८. 'नयनयोर्मया वीक्षितः'—आ. ९. इदं वाक्यं आ पुस्तके न वर्त्तते. १०. 'लाक्षारागादीनां'—आ. ११. 'भेदानवभासाभावेन श्लोकत्रयेऽत्रोन्मीलितभ्रान्तिर्न कार्या ।'—आ. १२. 'अस्तु वा...नास्माकमाग्रहः' इति भागो नास्ति आ पुस्तके. १३. '०भेदानवभासः'—आ. १४. इदं वाक्यं [illegible] दृश्यते [illegible] पुस्तके.

[1]समभे गत्यादिमान्थर्यादेर्नारीसहजधर्मत्वान्मदोदयस्यापि तत्कारित्वादुभयोर्गुणसाम्याद्भेदानध्यवसायः ।

सामान्यं, यथा—

भित्तिस्फटिकसङ्क्रान्तप्रतिबिम्बनृपाकुला ।
प्रतिबिम्बं प्रति नटी [2]नृत्यतीत्यहसन्नृपः ॥३१४॥

मीलितालङ्कारे हि स्वाभाविकेनागन्तुकस्य भिन्नस्व[3]भावानवभासरूपं मीलनं क्रियते । सामान्यालङ्कारे [4] भिन्नस्वरूपावभासेऽपि व्यावर्तकविशेषो नोपलक्ष्यते तदेवोक्तं –'सामान्यं यत्र सादृश्याद्विशेषो नोपलक्ष्यते' इति । यत्र सादृश्याद्विशेषो व्यावर्तकविशेषो नोपलक्ष्यते स्वरूपभेदश्चावगम्यते तत्र सामान्यमलङ्[4]कारः, इत्यर्थः । मीलितोदाहरणेऽधरादौ वस्त्वन्तरत्वेनागन्तुकालक्तकारुण्यं न भासते । सामान्योदाहरणे च बिम्बस्य प्रतिबिम्बानां च व्यक्त्यन्तरतया भानमस्त्येव 'अयं [5]बिम्बोऽयं च प्रतिबिम्बः' इति विशेषः, परं नोपल[6]क्ष्यते । अत एव 'सामान्यम्' इति संज्ञाप्यन्वर्था । भेदतिरोधानाच्च 'मीलितम्' अप्यन्वर्थम्[7] ।

## ८२. उन्मीलितं, ८३. विशेषकश्च

**भेदवैशिष्ट्ययोः स्फूर्तिः केनचिद्धेतुना भवेत् ।**

---

314 The king burst into laughter [1] the dancing girl, who was confounded on account of the king's reflection passing through the crystals on the wall, was dancing in the direction of the reflection.

***Kārikā 113.*** *When the manifestation of the difference or distinction (between two similar objects) as also of the differentiating or*

---

१. इदमपि वाक्यं न दृश्यते [1] पुस्तके. २. 'नृत्यन्ती लज्जिताहसत्'—आ. ३. 'भिन्नस्वरूपानवभासरूपं'—आ. ४. 'सामान्यमलंकृतिरित्यर्थः'—आ. ५. अत उत्तरं 'स्फूर्तिः' इत्यधिकं [2] पुस्तके. ६. 'नोपलभ्यते'—आ. ७. अत उत्तरं 'केनचिद्बलीयसा तदन्यस्य स्वरूपतिरोधाने मीलितम्। यथा– उक्तोदाहरणे वपुर्गतेन बलीयसा पाण्डुरतागुणेन चन्दनद्रवस्वरूपतिरोधानम् स्वरूपप्रतीतावपि गुणसाम्याद्भेदतिरोधाने सामान्यमिति केचित्। तन्मते "हीरकाचितविभूषणोज्ज्वला—", "कस्तूरीचन्द्रकं भाले—" इत्यादौ सामान्यम्" इत्यतिरिक्तो भागः प्राक्सन्नप्यधुना निष्कासितो दृश्यते [3] पुस्तके.

## यत्र तत्र प्रगदितावुन्मीलितविशेषकौ ॥११३॥

यत्र मीलितन्यायेन भेदानवभासे प्रसक्ते केनचिद्धेतुना भेदस्फूर्तिर्भवति, तत्र मीलितप्रतिद्वन्द्युन्मीलितं भवेत्  एवं सामान्यन्यायेन विशेषानवगमे प्रसक्ते यत्र केनचिद्धेतुना विशेषस्फूर्तिर्भवेत्, तत्र सामान्यप्रतिद्वन्द्वी विशेषकोऽलङ्कारः[1]।

उन्मीलितं, यथा—

लक्ष्यन्ते कुहुशब्देन पिका द्विजमुखात्कुहुः
काकेति शब्दितात्काकास्तवार्यपयशस्यहो ॥३१५॥

'हे[3] नृप' इति शेषः। तवारीणामपयशसि  'लीनाः' इति शेषः। स्पष्टमन्यत्।

तँद्गुणालङ्कारन्यायेनाप्युन्मीलितं सम्भवति  यथा—

यशसा ते धवलिते श्रीराघव ! जगत्यहो।
लक्ष्यन्ते कुहुशब्देन पिका द्विजमुखात्कुहुः ॥३१६॥

विशेषकः, यथा—

राजंस्तवारिपत्नीनां नेत्राणि कुमुदानि च।
अमीलनामीलनतो लक्ष्यन्ते ह्युदिते रवौ ॥३१७॥

---

*distinguishing element (of the objects) takes place due to a certain cause, there respectively declared the figures Unmīlita and Viśeṣaka.*

315. Oh wonder! Merged in thy enemies infamy, the cuckoos are marked out on account of their note Ku-hu' which (as a rule) comes from the premier bird, and the crows are marked out on account of their crowing Kā-kā'

316. O revered Raghava the world having been rendered white by means of thy glory, the cuckoos are recognised on account of their note 'Ku-hu', since the note 'Ku-hu has its origin in the premier bird alone.

317. O king! the eyes of thy enemies' wives and the कुमुदs (=white water-lilies said to open at moon-rise) are differently marked out at sun-rise by their not-closing (i. e. remaining open) and closing respectively.

---

१. 'प्राप्ते'—आ.  २. 'विशेषकमलङ्कारः'—अ.  ३. इयं वृत्तिर्न दृश्यते अ पुस्तके.  ४. 'तद्गुणालङ्कार.....द्विजमुखात्कुहुः।' इति भागोऽपि नास्ति अ पुस्तके.

नेत्राणां निरञ्जनत्वद्योतनाय 'अरिपत्नीनाम्' इत्युक्तम् ।

यथा वा—

काचः स्वच्छो मणि. स्वच्छः को भेदो मणिकाचयोः ।
क्रयविक्रयवेलायां काचः काचो मणिर्मणिः ॥३१८॥

अत्रान्तिम'काच''मणि'शब्दावर्थान्तरसङ्क्रमितवाच्यौ । तथा च काचत्वेन ज्ञातो मणित्वेन ज्ञात इति चार्थः । राजानं प्रति कस्यचिदुक्तिरियम् ।

## ८४. गूढोत्तरम्

किञ्चिदाकूतसहितमुत्तरं यत्र बध्यते ।
तत्रालङ्कारिकवरैर्गूढोत्तरमुदाहृतम् ॥११४॥

यथा—

नात्र नौ सङ्गमः पान्थ ! यातोऽस्तं भानुमानयम् ।
■ यास्यसि जलैः पूर्णा यतः सुरतरङ्गिणी ॥३१९॥
श्रीमाधवे क्षितिपतौ नास्ति चौरभयं यतः ।
पयोधरोन्नतिं दृष्ट्वा वस पान्थ गवां गणे ॥३२०॥

---

318. The crystal is pellucid; the gem, (too,) is pellucid. What is the difference between the gem and the crystal? At the hour of purchase and sale, the crystal remains ■ crystal and the gem a gem.

***Kārikā 114.*** *When a reply is so composed as to convey some hidden meaning, the figure Gūḍhottara is declared by high rhetoricians.*

319. O traveller! we (i.e. thou and myself) would not unite here. Since the Sun has gone to the Western Mountain and the celestial river (viz, the Ganges?) is flooded with water, whither shalt thou go? *The hidden meaning is*— No more shall our meeting take place here. The lord of the house has left the place and I myself, who am ardently given up to sexual pleasures am surrounded by dull people, so that our secret intercourse (just now) would not be detected. Hence thou must not depart.

320. Since O traveller, there is no fear of thieves while revered Mādhava is ruling, thou, at the sight of high congregation of clouds,

---

१. इयं वृत्तिर्नास्ति आ पुस्तके. २. 'प्रासावसरस्य कस्यचिद्राजानं प्रत्युक्तिरियम्' —आ. ३. 'भानुमानपि'—आ. ४. 'पयोधरभरं'—आ. ५. 'पान्थ गोष्ठगृहे वस' इत्यपि पाठान्तरं आ पुस्तके.

[1]"इति पृच्छन्तमध्वानं काचिदाह ससूचनम् ॥"

—इति तृतीयः पाद उभयत्र पूरणीयः। अन्यथा भावध्वनिः स्यात्, न त्वलङ्कारः। ध्वनेः स्वोक्त्याविष्करणे सत्येव तस्यालङ्कारत्वमिति सिद्धान्तात्।

सुराणां तरङ्गिणी नदी जलैः पूर्णा। वर्षाकालत्वात्[2]। अत्र तरिर्न मिलति दिनं च नास्ति। यतोऽतः कारणात्। [3] यास्यसि। इति लौकिकोऽर्थः। यतः कारणादावयोः समागमः पुनर्न भविता, [4]अयं गृहाधीशो गतः, [5]सुरतस्य रङ्गिणी सुरतेच्छावत्यहम्, इति गम्योऽर्थः। [6]जडैर्मूर्खैः परिवृता। परिजनानामविदग्धत्वान्न कश्चनावगमिष्यतीत्यभिप्रायः।

द्वितीयपद्ये, पयोधरो मेघः, तस्याधिक्यं दृष्ट्वा भोः पान्थ! गवां गणे पशुसमूहे, गोष्ठे इत्यर्थः, वस, इति लौकिकोऽर्थः। स्तनोन्नतिं दृष्ट्वा रन्तुं मनश्चेद्गोष्ठे निवस। तत्र गोदोहनादिकैतवेन समागमसौकर्यमपीत्यभिप्रायः। यद्वा, पशुसमूहे वस। सर्वे पशुतुल्या मूर्खा भवन्तीति न कोऽप्यावयोश्चरित्रं ज्ञातेत्यभिप्रायः

---

mayst stay in the cowpen. *The hidden meaning is*— In revered Madhava's kingdom thieves, i e. illicit love-makers, are supposed to be non-existent and no officers are appointed to detect their crimes. Hence, in case thou desirest to enjoy [illegible] observing my highly-developed breasts, thou mayst stay in the cowpen, or among the local dull people, with a sense of security.

---

१. 'इति पृच्छन्तमध्वानं.....सिद्धान्तात्' इति भागस्त्वत्र नास्ति आ पुस्तके. २. इदं पदं नास्ति आ पुस्तके. ३. 'गृहाधीशोऽपि नास्ति'—आ. ४. पदद्वयं नास्ति [illegible] पुस्तके. ५. 'अहमिति गम्योऽर्थः' इति नास्ति आ पुस्तके. ६. 'जडैर्जनैः'—आ. ७. अतः पूर्वं 'पूर्णा' इत्यधिकं आ पुस्तके. ८. 'पयोधरो मेघः...लौकिकोऽर्थः' इति नास्ति [illegible] पुस्तके. ९. 'स्तनभरं'—आ. १०. 'यद्वा पशुसमूहे.....ज्ञातेत्यभिप्रायः' इत्यस्य स्थाने 'गवां गणे गोसमूहे गवामङ्गणे गोसम्बन्धिनि गृहाङ्गणे।' इत्येव आ पुस्तके. ११. [illegible] उत्तरं 'अत्र "इति पृच्छन्तमध्वानं काचिदाह ससूचनम् ॥" इति तृतीयार्धं पूरयित्वालङ्कारो योजनीयः अन्यथा ध्वनिभावत्वं स्यात्, न त्वलङ्कारत्वं, प्राचीनैर्भावध्वनेः .....(अक्षराणि नष्टानि) विष्करणे सति तस्यालङ्कारा.....(अक्षराणि नष्टानि) वतीत्युक्तत्वात्।' इति आ पुस्तके.

## ८५. चित्रम्

प्रश्नाभिन्नोत्तरं यत्तु तद्भिन्नोत्तरमेव वा ।
यत्र निबध्यते तत्र चित्रालङ्कार इष्यते ॥११५॥

यथा—

का कीदृक् शाठ्यपिशुना के कैका मधुरश्रुतिः ।
किं देवौकस्तमस्तेजः स्वर्भानुः सुखदोऽस्तु ते ॥३२१॥

शाठ्यं धैर्त्यं, तस्य पिशुना निवेदनकर्त्री का ? अथ च, शाठ्यपिशुना कीदृक् ? इति प्रश्नद्वयम् । तस्योत्तरमपि प्रश्नात्मकमेव । 'काक्याः काकस्त्रियाः, दृक् दृष्टिः' इत्येकमुत्तरम् । काक्या दृगिव दृग्यस्याः सा तथोक्ता । तथा च 'गोसदृशो गवयः' इतिवत् 'काकीदृक् शाठ्यपिशुना' इति द्वितीयमुत्तरम् । के जले, वर्षायामित्यर्थः, एका अद्वितीया मधुरश्रुतिः मनोहरश्रुतिः का ? इति प्रश्नः । उत्तरमपि तदात्मकमेव— 'वर्षायामेका केकाः मयूरवाक् मधुरश्रुतिः' इति

---

*Kārikā 115. When the reply is identical with the question or is noted differently from the question, there occurs the figure Citra.*

321. Q का कीदृक् शाठ्यपिशुना ? —1. What (object) is indicative of cunningness? and 2. Of what description is a woman betraying her cunningness? A. काकीदृक् शाठ्यपिशुना 1. The eye of a female crow is indicative of cunningness; and 2. A woman betraying her cunningness is endowed with eyes resembling those of a female crow. Q. के वैका मधुरश्रुतिः ? = Which is the only sweet tone during the rains? A केकैका मधुरश्रुतिः = During the rains the cry of a peacock is the only sweet tone Q किं देवौकः, तमः, तेजः ? = What is the abode of gods? What (object) is full of lustre? and What (object) is full of gloom? A. स्वर्भानुः सुखदोऽस्तु ते = The heaven, the Sun and Rāhu— who may confer happiness on thee!

---

१. 'शाठ्यपिशुना शाठ्यमाविष्कुर्वाणा का ? च...'—आ. २. 'वर्षाजले इत्यर्थः'—आ. ३. 'स्निग्धश्रवणा'—आ. ४. 'वर्षायाम्' इति पदं नास्ति आ पुस्तके. ५. 'मयूरवाक्' इति पदं नास्ति पुस्तके.

प्रश्नभिन्नमुत्तरं प्रदर्शयति—देवानामोकः स्थानं[2], तमः तमोमयं, तेजः तेजोमयं किं च ? इति प्रश्नत्रयम्। 'स्वर्भानुः' इत्युत्तरम्। स्वर्गः सूर्यो राहुश्च। क्रमो ■ विवक्षितः। 'सुखदः' इति त्रयाणामपि विशेषणम्।

यथा वा—

"कं बलवन्तं शीतं
न लगति मधुरश्रुतिर्हि के कैका।
सतां स्वच्छं हि किं किं
हंसौको मानसं रम्यम् ॥३२२॥

अत्र 'बल'पदं शीतपरीहारसाधनशक्तिपरम् शीतपरिहारसाधनानामनेकत्वात्तच्छक्तिमन्तोऽपि बहवः। तन्मध्ये शीतं कं न लगति ? इति प्रश्नः। 'कम्बलिनमूर्णावस्त्रवन्तम्' इति तदेवोत्तरम्। द्वितीयार्धे प्रश्नभिन्नमुत्तरं स्पष्टमेव।

एवमुदाहरणान्तराण्युन्नेयानि।

## ८६. सूक्ष्मम्

साकूतचेष्टया यत्र स्वाशयः सूच्यते यदा।

322. Q. कं बलवन्त शीतं न लगति ?=On what man possessing strength (i. e. requisite materials) has cold ■ effect? A. कम्बलवन्तं शीतं न लगति = Cold has no effect on a man putting on a woollen blanket. Q. मधुरश्रुतिर्हि के कैका ? — Which is indeed the only sweet tone during the rainy season? A. मधुरश्रुतिर्हि केकैका = The cry of ■ peacock is indeed the only sweet tone during the rainy season. Q. सतां स्वच्छं हि किं, हंसौकः किम् ? =What indeed is pure in the sages? and What is the abode of swans? A. रम्यं मानसम् = 1. The (sages) delightful heart and 2. The charming lake called Mānasa

***Kārika 116.*** *When a person conversant with the other person's*

---

१. 'आह'—आ. २. अत उत्तरं 'अथ च' इत्यधिकं आ पुस्तके. ३. 'अज- ■■■■ रोधकमित्यर्थः'—आ. ४. अतः पूर्वं 'अथ च' इत्यधिकं ■■ पुस्तके. ५. नास्ति ■■■ पुस्तके. ६. 'राहुश्चेति'—आ. ७. इदं वाक्यद्वयं नास्ति आ पुस्तके. ८. इदमुदाहरणं तद्वृत्तिश्च आ पुस्तके नास्ति. ९. अत आरभ्य ग्रन्थभागः साधारण्येन आ पुस्तकेऽप्युपलभ्यते.

पराशयविदा ▪ सूक्ष्मालङ्कार इष्यते ॥११६॥

यथा—

सङ्केतकालं जिज्ञासौ साकूतार्पितचक्षुषि ।
विस्तारिता चन्द्रकलाशाटी दोर्भ्यां विदग्धया ॥३२३॥

चन्द्रकलाशाटी दक्षिणदेशे प्रसिद्धा। चन्द्रकलाविस्तृतिकरणेन चन्द्रज्योत्स्नाविस्तृतौ सत्यां सङ्केतः, चन्द्रकलाशाट्याः श्यामत्वादन्धकारे विस्तृते वा सङ्केतः सूचितः। 'सङ्केतकालं जिज्ञासौ' इति स्वोत्तराविष्करणादलङ्कारतासम्पत्तिः।

यथा वा—

सरःपरिसरे काचिद् दृष्ट्वा जारं ससूचनम् ।
विकासयाञ्चकाराशु दोष्णा कैरवकोरकम् ॥३२४॥
जारं सङ्केतसोत्कण्ठं पश्यन्ती कापि सस्मिता ।
वस्त्राञ्चलेन मुकुरं छादयामास वर्तुलम् ॥३२५॥

---

*heart signifies his own intentions by means of significant gestures, there occurs the figure Sūkṣma.*

323. When he, desirous of knowing the time of appointment, significantly cast his eyes (upon her), she, shrewd ▪ she was, expanded her garment Candrakalā (=lit. a lunar digit; but in Marathi, proper name for ▪ particular dark garment popularly worn by women) with her hands.

324. A certain woman, observing her paramour making gestures on the borders of ▪ lake, quickly expanded a bud of Kairava (= the white lotus opening at moon-rise) with her hand.

325. A certain smiling woman, observing her paramour to be anxious for an appointment, veiled the round mirror with the skirt of her garment.

---

१. 'साकूतार्थितचक्षुषि'—अ. २. '०विसृति०'—अ. ३. '०विसृतौ'—अ. ४. अत उत्तरं 'इत्याकूतम्' इत्यधिकं ▪ पुस्तके. ५. 'श्यामत्वात्तद्विस्तृतिकरणादन्धकार-विस्तृतौ सत्यां सङ्केत इत्यप्याकूतम्।'—आ. ६. इदं वाक्यं न दृश्यते ▪ पुस्तके. ७. '—न मुकुर छादयामास वर्तुलम्' इत्यारभ्य ग्रन्थभागः साधारण्येन ▪ पुस्तके ऽप्युपलभ्यते.

एवं कामी जनो यत्र प्रक्रीडति मुदान्वितः ।
सा श्रीमाधवरायस्य पुरी विजयतेतराम् ॥३२६॥

[2]कैरवकोरकविकासनेन चन्द्रोदये सङ्केतः । अथ च, मुखप्रकाशकस्य वर्तुलस्य तेजस्विनो मुकुरस्याच्छादनेन सूर्यास्तसमये सङ्केतः । इत्युभयत्राकूतम् । 'ससूचनम्' इति क्रियाविशेषणम् । तेन सूचनीयस्य स्वोत्तराविष्करणम् । 'सङ्केतसोत्कण्ठम्' इत्यनेनापि सङ्केतत्वेन सूचनीयोऽर्थः स्वोत्तराविष्कृतः । फलं सूक्तमेव ।

## ८७. पिहितम्

परवृत्तान्तविदा यत्र चेष्टाकूतसमन्विता ।
क्रियते तत्र गदिता पिहितालङ्कृतिर्बुधैः ॥११७॥

यथा—

प्रातर्निरीक्ष्यैव हरिं समागतं
प्रस्वेदलिप्ताञ्जनकुङ्कुमाङ्कितम् ।
पुंस्त्वं सपत्न्या नु जगाद राधिका
सोष्णीषनार्याः स्वकरे विलेखतः ॥३२७॥

---

326. Supreme is the celebrated capital of revered Mādhavarāya in which gay and lustful people thus indulge in dalliance.

***Kārika 117.*** *If a person aware of another person's details makes significant gestures (with a view to displaying his knowledge of those details), there is declared the figure Pihita by the learned.*

327. No sooner did Rādhikā thoroughly view Hari, who joined her in the morning and was marked with saffron and collyrium polluted with excessive perspiration, than she proclaimed, as it were, the पुंस्त्व (=पुरुषायित —a mode of sexual enjoyment in which the woman plays the man) of her rival mistress by means of portraying on her own hand a woman putting on a turban.

---

१. 'माधवरावस्य'—अ, आ; 'राघवरावस्य'—इ. २. 'कैरवकोरक...अथ च' इति भागो न दृश्यते आ पुस्तके. ३. 'सूर्यास्तसमये'—इ. ४. 'इत्याकूतम्'—आ. ५. 'ससूचनमिति.....फलं सूक्तमेव' इति भागो न दृश्यते आ पुस्तके. ६. 'स्वोत्तराविष्करणम्'—इ. ७. 'स्वोक्त्याविष्कृतः'—इ.

प्रस्वेदादिनानुमितं पुरुषायितं सोष्णीषनारीलेखनेनाविष्कृतम् । 'सपत्न्याः पुंस्त्वं जगाद नु' इत्यनेन स्वोक्त्याविष्कृतिः ।

यथा वा—

पद्मालयामन्दिरतः समागतं
निरीक्ष्य कृष्णं हृदि लग्नयावकम् ।
सा सूचयन्तीव रतिश्रमं हरे-
श्चकार राधा व्यजनं विचक्षणा ॥३२८॥

अत्र पादक्षालनपानीयानयनताम्बूलाहरणाद्युपचारानतिक्रम्य झटिति व्यजनकरणं रतिश्रमे साकूतम् । 'सूचयन्तीव-' इत्यनेन सूचनीयोऽर्थः स्वोक्त्याविष्कृतः ।

यथा वा—

प्रातः समागतं कृष्णं कुङ्कुमालक्तकाञ्चितम् ।
उज्जागरं सूचयन्ती पद्मा तल्पमकल्पयत् ॥३२९॥
एवं क्रीडां प्रकुर्वाणः कृष्णो राधिकया सह ।
राज्ञो माधवरायस्य कुरुतामभयं सदा ॥३३०॥

---

328. Rādhā gazed at Kṛṣṇa, who had come from Lakṣmī's palace and had the lac-dye stuck to his bosom and clever ▬ she was, she, ▬ if hinting at his fatigue due to sexual indulgence, waved a fan over him.

329. Lakṣmī made ready a couch, thereby pointing out to Kṛṣṇa, who joined her in the morning and was anointed with saffron and lac-dye, the feet of his having kept awake during the night.

330. May Kṛṣṇa thus sporting with Rādhikā, grant eternal security to king Mādhavarāya !

---

१. 'ोनारीकिखनेना०'—अ, इ. २. इदं वाक्यं नास्ति अ आ पुस्तके. इ पुस्तकेऽपीदं शोधरूपेण पश्चादिखितं दृश्यते. ३. 'रतेः श्रमं'—अ. ४. 'अत्र' इति पदं नास्ति अ पुस्तके. ५. 'पादक्षालनताम्बूलाहरणाद्युपचारमतिक्रम्य'—आ. ६. ▬ वाक्यं नास्ति आ पुस्तके. ७. 'सूचयन्तीत्यनेन'—अ. ८. 'राधिकयापि च' इति पाठः 'अपिना चेन च पद्मया चेत्यर्थो लभ्यते' इति तद्गता टिप्पणी च आ पुस्तके. ९. 'माधवरायस्य'—अ; 'राघवरायस्य'—इ. १०. अत उत्तरं 'सूक्ष्मालङ्कारे पिहितालङ्कारे च अलङ्कारतासम्पादनाय "सङ्केतकालं जिज्ञासौ" इत्यादि "पुंस्त्वं सपत्न्या—" इत्यादि च स्वोक्त्याविष्करणं द्रष्टव्यम् ।' इति वृत्तिरधिका ▬ पुस्तके.

## ८८. व्याजोक्तिः

अन्यहेतूक्तिभिर्यत्र यदाकारस्य गोपनम् ।
क्रियते तत्र सा प्रोक्ता व्याजोक्तिरित्यलङ्कृतिः ॥११८॥

[1]यथा—

सव्यूर्ध्वपङ्क्तिगा दन्ता ममातिविषमा यतः ।
ओष्ठं लगन्ति किं कुर्वे दुर्दशो मेऽधरो व्रणैः ॥३३१॥

अत्र जारकृताधरक्षतगोपनम् ।

यथा वा—

पूर्वमुज्जागरादद्य निद्रिताहमधः सखि ! ।
तेनायं धूसरः पृष्ठो दष्टा गल्लेऽपि मूषकैः ॥३३२॥

अत्र चौर्येण कृतरतायाः कस्याश्चिद्भूपृष्ठलुण्ठनेन साङ्गलग्नधूलिजालस्य गल्लसंजातदन्तक्षतस्य च गोपनार्थं सखीं प्रत्युक्तिरियम् ।

यथा वा—

पत्युर्द्वेषो भवेदेव प्रियायाः सक्षते कुचे ।
वारितापि मयाकार्षीरोतुशावस्य खेलनम् ॥३३३॥

अत्र जारसम्भोगसंजातनखक्षतायाः कस्याश्चिन्नायिकायाः समीपमागतं पतिमपश्यन्त्येव सख्या नायिकायाः पुरो नखक्षते हेत्वन्तराप-

---

**Kārika 118.** *If concealment is made of the outward manifestation (of internal feelings etc..) by means of attributing it to some other (i. e. unreal) reasons, there occurs the figure termed Vyājokti.*

331. O female friend ! my teeth of the upper row are extremely troublesome since they cut my lip. What am I to do? My lower lip is in a hopeless condition on account of the scars.

332. O female friend ! on account of having kept awake previously I had slept today on the floor. Hence my back has become dusky-white and I was also bitten by rats on my cheeks.

333. The husband is unmistakably affected with repugnance when the wife's breast bears a scratch. Thou, though prevented by me, carried on thy play with the cat's cub (or Did thou, though prevented by me, play with the cat's cub ?).

---

१. 'यथा' इति पदं नास्ति अ पुस्तके. २. 'नायिकां प्रति नखक्षते'—आ.

देशेन तत्पतिं प्रति नायिकाया अपराधगोपनं कृतम् ।

यथा वा—

मय्यर्थं कज्जलं लाक्षारसं प्रकुर्वतो मम ।
हस्तस्पर्शो मुखे जातस्तेनेदं मुखमण्डनम् ॥
एवं खेलति लोकोऽयं राघवेणानुपालितः ॥३३४॥

"इदं मण्डनं मुखे कुतः सम्पादितम्?" इति नायिकया पृष्टे धूर्तस्य कस्यचिद् द्विजयूनः समाधानोक्तिः ।

छेकापह्नुतौ वचनस्यान्यथानयनेनापह्नवः, [illegible] त्वाकारस्य हेत्वन्तरप्रदर्शनेन गोपनम्, इति विशेषः ।

## ८९. गूढोक्तिः

अन्योद्देश्यं वचो यत्र तटस्थगोपनकृते ।
अन्यं प्रत्युच्यते तत्र गूढोक्तिरभिधीयते ॥११९॥

यथा—

शुद्धपक्षेऽपि वक्रो
मा [illegible] सुतरां बहुलविरोधी त्वम् ।

---

334 While I was preparing the lamp-black and the lac-dye with a view to making ink my hand touched my mouth (or face). Thence this mark (lit. decoration) [illegible] my mouth (or face).

—Thus daily these people guarded by Raghava.

***Kārika 119.*** *When words referring to one are addressed to someone else with a view to their concealment from a passive third person, the figure is termed Gūḍhokti.*

335. O द्विजराज (=1. leader of the twice-born people, i e. the person meant; 2. the moon, who is addressed only apparently)! बहुलविरोधिन् (=1. one having numerous adversaries; 2. hostile to the dark fortnight of a month) as thou art in [illegible] extreme degree, thou must not become [illegible] (=1. crooked; 2. curved) even [illegible] related with the शुक्लपक्ष (= 1. the party purely devoted to thee, i.e. thy own party; 2. the bright fortnight

१. 'एवं खेलति ते राजन्! पूनायां सुखितो जनः'—आ; 'एवं खेलति लोकोऽयं माधवेनानुपालितः'—ह. २ 'तत्समाधानोक्तिः'—आ. ३, 'हेत्वन्तरवर्णनेन'—आ, ह.

द्विजराज ! तेऽत्र बहुल-
प्राप्तौ कुत्र स्थितेः स्थानम् ॥३३५॥

अत्र पक्षपातिनोऽपि शुद्धमनस्कान्निजदुराचरणेन विमनस्कान्कुर्वाणं बहुभिर्मलिनैः सह विरोधभाजं कञ्चिद् ब्राह्मणवरमुपदेष्टुकामस्य कस्यँचित् तटस्था अन्ये मा जानन्त्वित्यतोऽन्यं चन्द्रँमपदिश्याक्षेपः । शुद्धपक्षे शुक्लपक्षे स्वँपक्षपातिसुजनेषु च । बहुलस्य कृष्णपक्षस्य विरोधी, तत्र क्षँयात्; बहुला बहवो विरोधिनो यस्येति तथोक्तः

यँत्राप्रस्तुतार्थः प्रकृतार्थान्वयित्वेन न विवक्षितः, अथ चेतरोपनार्थमेव तँस्य निर्देशः, तत्र विच्छित्तिविशेषशालितया गूढोक्तिः; अन्यथा श्लेषः; इति विवेकः ।

## ९०. विवृतोक्तिः

श्लिष्टगुप्तं कविर्यत्र स्वोक्त्याप्याविष्करोति चेत् ।
तदा तत्र परिज्ञेया विवृतोक्तिरलङ्कृतिः ॥१२०॥

यथा—

शुद्धपक्षेऽपि वक्रो मा भव सुतरां बहुलविरोधी त्वम् ।

---

of a month). Where shall remain the place of shelter for thee when there shall be बहुलप्राप्ति (=1. the gain or success of the numerous adversaries; 2. the advent of the dark fortnight)?

***Karika 120.*** *When the poet by his own expression lays bare what involves a pun and is therefore of a secret character, there is to be recognised the figure Vivrtokti.*

336. "O द्विजराज (= 1. the moon; 2. a leading Brahmaṇa) बहुलविरोधिन् (=1. hostile to the dark fortnight of a month; 2. having numerous enemies) as thou art in an extreme degree, thou must not become वक्र (=1. curved; 2. crooked by nature) even as related with the शुद्धपक्ष

---

१. 'सुजनान्निज०'—आ. २. 'कस्यचित्' इति पदं नास्ति ■ पुस्तके. ३. 'चन्द्रं मत्याक्षेपः' — आ. ४. 'सुजने पक्षपातिनि च' — आ. ५. 'क्षयगामित्वात्' — आ. ६. 'यत्राप्रकृतार्थः'—आ. ७. 'तस्य' इति पद नास्ति आ पुस्तके. ८. 'यथा वा'—आ, इ.

द्विजराजैवं काश्चिच्चन्द्रं प्रति ससूचनं वक्ति ॥३३६॥

९१. युक्तिः

यदा परातिसन्धानं क्रियते मर्मगुप्तये ।
युक्त्याख्यालङ्कृतिः प्रोक्ता व्याजोक्तेस्तु विलक्षणा ॥१२१॥

यथा—

अनुरक्ता युवतयो लिखन्त्यो राघवं नृपम् ।
[2]लिखन्ति मारुतिं तत्र दुर्जनोक्तिविशङ्कया ॥३३७॥

व्याजोक्तावाकारगोपनं, युक्त्यलङ्कारे ■ तदन्यगोपनम्, इति तयोर्वैलक्षण्यम् इत्यभिप्रेत्याह–"व्याजोक्तेस्तु विलक्षणा" इति ।

९२. लोकोक्तिः, [3]९३. छेकोक्तिश्च

[4]लोकप्रवादानुकृतिं लोकोक्तिं विबुधा विदुः ।
सार्थान्तरगर्भिता चेच्छेकोक्तिरिति कथ्यते ॥१२२॥

सा लोकप्रवादानुकृतिः ।

---

(= 1. the bright fortnight of a month; 2. the party faithfully devoted to thee)".— thus somebody addresses the moon with gesticulations (or, suggestively).

**Kārikā 121.** *When one tricks the other for the sake of guarding the secret, there is declared the figure called Yukti which, in fact, is different from the figure Vyājokti*

337. Young women affected with love while intending to portray king Raghava indeed portray Mārutī on the leaf for fear of the calumny of the wicked.

***Kārika 122.*** *The learned regard the adaptation of a popular saying ■ figure Lokokti.*

*If the Lokokti is pregnant with other senses, it is termed Chekokti.*

---

१. 'माधवं'—अ. २. अतः पूर्वं 'तथापि' इत्यधिकं ■ पुस्तके. ३. अत आरभ्य वक्रोक्त्यलङ्कारव्याख्यारम्भं यावद्भागः केवलं ■ पुस्तके विद्यते, ■■■ ह पुस्तकयोस्तु नोपलभ्यते.

तत्र लोकोक्तिः, यथा—

मर्माण्यावेद्य दुष्टेऽस्मिन्ननुतापमुपेयुषा ।
हस्तेनोदरमामर्द्य शूलमुत्पादितं त्वया ॥३३८॥

छेकोक्तिः, यथा—

कुलीनोऽयमहोरात्रं ■ गच्छति न दृश्यते ।
अहेः पादानहिर्वेत्ति किं जानीमो वयं सखे ॥३३९॥

अत्र, अयमहोरात्रं ■ गच्छतीत्यनङ्गव्यापाररूपं कस्यचिद्वृत्तान्तं केनचित्पृष्टस्य समीपस्थं निर्दिश्य 'अयमेव तस्य वृत्तान्तं जानाति' इति वक्तुमभिलषतः कस्यचित्तं प्रति प्रश्नोत्तररूपोऽयम् 'अहेः पादानहिर्वेत्ति' इति लोकप्रवादानुवादः । तथा च 'स चायं चोभावपि धनार्जनादिव्यापारे सहचारिणौ' इत्येकविषयत्वात्, 'अयमेव तदीयं वृत्तान्तं जानाति' इति प्रतिपादितम् । तेन च, 'अनङ्गव्यापारेऽपि तस्यायं सहचरः, इति तदप्ययमेव जानाति' इत्यर्थान्तरमपि गर्भीकृतम्

यथा वा—

पटीरमारुतैर्गतं विकासिमालतीसखै-
स्तडिल्लतासिधारासिशालिमेघगर्जनैर्गतम् ।

---

338. Thou, who art subjected to remorse on having disclosed thy secrets to this cruel man, hast caused the colic by pressing thy belly with thy (own) hands.

339. It is not known as to which place this high-born gentleman frequents day and night. A serpent (alone) is aware of ■ serpent's feet. What do we know (about it), O friend?

340. The Southern Winds (lit. the winds blowing from the place, viz., the Malaya mountain, abounding in sandal-trees), which are associates of blooming jasmine flowers, have disappeared. The thunders of clouds flashing with swords in the guise of forked lightning have faded. What harm would accrue to him (viz., to my husband who is out to earn riches for a very long time, regardless of my feelings and passions), if this autumnal ■■■■ (also) wishes to carry him away (i e. to keep him back)? धनञ्जय (= l. Arjuna who recovered king Virāṭa's cows captured by Duryodhana and his party, i e. an excep-

यदीन्दुरेष शारदो निनीषतीत्यमुं नु का
क्षतिर्गवां निवर्तकः स एव मे धनञ्जयः ॥३४०॥

धनोपार्जनार्थं प्रोषितपतिकाया उक्तिरियम्। अत्र प्रोषितस्य पशुप्रायत्वं धनेन दूरमाकृष्टस्य प्रत्याकर्षणं धनञ्जयस्यैव घटते इत्यर्थान्तरगर्भीकृतम्

## ९४. वक्रोक्तिः

श्लेषेण काक्वा वा यत्र त्वर्थान्तरं प्रकल्प्यते ।
वक्रोक्तिस्तत्र विज्ञेया गूढोक्तेर्हि विलक्षणा ॥१२३॥

यथा—

धन्यासि साध्वि पद्मे त्वं पतिरेवोपसेव्यते
नारायणं नराधीशं हातुं नेच्छसि सुव्रते ॥३४१॥

हे पद्मे लक्ष्मीः। साध्वि सुव्रते। त्वं धन्यासि। पतिरेव निजस्याम्येवोपसेव्यते तदेवाह। यतो नराधीशं नरश्रेष्ठं, नारायणं विष्णुं, हातुं नेच्छसि। इत्यूह्यार्थः। त्वयोपपतिर्जारः एव सेव्यते, यतो नारायणाख्यं जनाधीशं राजानं हातुं नेच्छसि। इति वक्रोऽर्थः। अस्मि-

---

tionally strong person or cause; 2. Acquisition of wealth) alone bring back my kine (which include my husband who is insensible to the charms of lust and beauty).

***Kārikā* 123.** *When a different sense is devised either through a pun or through an affected change of tone, there is to be recognised the figure Vakrokti which is different from the figure Gūḍhokti.*

341. (*i*) O Goddess Lakṣmī who art a chaste and virtuous wife! blessed art thou since thou art attached to thy husband alone. Thou dost not wish to desert Nārāyaṇa (= God Viṣṇu) who is the lord of people.

Or, (*ii*) O Goddess Lakṣmī who art a chaste and virtuous wife (i.e. in an ironical sense)! blessed art thou since thou art attached to thy paramour alone. Thou hast no intention to leave king Nārayaṇa.

---

१. अतः आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि अ आ ब पुस्तकेषूपलभ्यते. २. 'यथा' इति पद न दृश्यते त्रिष्वपि अ आ ब पुस्तकेषु. ३. नास्ति आ पुस्तके. ४. 'पतिर्निज०'—आ. ५. 'जनाधीशं'—आ, इ. ६. नास्ति आ इ पुस्तकयोः. ७. 'जार एव' इति पदद्वय नास्ति ब पुस्तके. ८. नास्ति ब पुस्तके.

न्पक्षे 'हे साध्वि हे सुव्रते' इति सम्बोधनमपि वक्रोक्तिरूपमेव ।

[1]यदि च क्रियासङ्गतस्योपेयस्य पतिनान्वयो ■ सम्भवतीति विभाव्यते, तथापि काकुना वक्रोक्तिः सम्भवत्येव । उत्तरार्धे ■ श्लेष-प्रयुक्तापि सास्त्येवेति विभावनीयम् ।

यथा वा —

धन्यासि त्वं सखि ! यतः पतिरेवोपसेव्यते ।
गोपालं माधवं साध्वि न जहासि कथञ्चन ॥३४२ ।

[2]लक्ष्मीं प्रति तत्सख्या उक्तिरियम् । हे सखि साध्वि . त्वं धन्यासि, यतः पतिरेवोपसेव्यते । [3]गोपालं माधवं विष्णुं कदाचन न जहासि । इत्यूह्यवर्थः । माधवाख्यं भूपालं कदाचन न जहासि यतः, अतस्त्वयोप-पतिरेव सेव्यते । इति वक्रोक्तिः यद्वा, काञ्चित्प्रति कस्याश्चिदुक्तिरियम् । पूर्वार्धस्योक्त एवार्थः । मा माया, कपटमित्यर्थः । तद्युक्तमधवं पतिभिन्नं, गोपालं कंचिद्गोपं, कदाचन न जहासि । इति वक्रोक्तिः

---

342. (*i*) O (female) friend (viz., Goddess Lakṣmi) who art ■ chaste wife blessed art thou since thou art attached to thy husband alone. Under no circumstances dost thou desert Madhava ( God Viṣṇu) the protector of cows

Or, (*ii*) O (female) friend (viz., Goddess Lakṣmī) who art ■ chaste wife (i. e, in an ironical sense) ! blessed art thou. Since thou never quittest Madhava (=Peṣava Mādhavarao I), the protector of the earth (or of cows), thou enjoyest a paramour alone.

Or, (*iii*) O (female) friend who art ■ chaste wife (i.e. in an ironical sense) ! blessed art thou since thou enjoyest thy paramour alone. Thou never quittest the cowherd who is somebody else than thy husband and is ■ fraudulent man.

---

१. 'यदि च क्रिय.....विभावनीयम् इति वाक्यद्वयात्मके भागे न दृश्यते आ पुस्तके. इदं पुस्तकेऽप्ययं शोधरूपेण पश्चाद्विहितो दृश्यते २. 'हातुं नेच्छसि सुव्रते'—आ. ३. 'हे सखि साध्वि इति लक्ष्मीं प्रति तत्सख्या उक्तिः अर्थस्तूक्तप्रायः गोपालं माधवं कृष्णं माधवाख्यं भूपाल च । यद्वा काञ्चित्प्रति कस्याश्चिदुक्तिः । पूर्वार्धस्योक्त एवार्थः । मा माया कपटपर्यवसन्ना । तद्युक्तमधवं पतिभिन्नं गोपाल कञ्चिद्गोपं हातुं नेच्छसीत्यर्थः ' इति वृत्तिपाठः आ पुस्तके. ४. अतः पूर्वं 'यतो' इत्यधिकं ■ पुस्तके.

यथा वा—

स्थाणुना निर्मितं सर्वं जगदेतच्चराचरम् ।
चरं हि चेतनं दृष्टं न [redacted] स्तम्भमयं क्वचित् ॥३४३॥

स्थाणुना शिवेन कर्त्रा, एतच्चराचरं सर्वं जगन्निर्मितम् । अत्र 'स्थाणुना स्तम्भेन कृत्वैतत्सर्वं जगन्निर्मितम्' इत्यर्थं विधायाह—'चरं हि—' इति ।

विकृतश्लेषवक्रोक्तिः, यथा—

अलक्ष्मीरशुभं वास्तु तवाभद्रं तथा भयम् ।
नञ्जो लोपं विधायैव पठ दुष्टात्परं भयम् ॥३४४॥

नञ्जोऽकारस्य, लोपं कृत्वा । 'अस्तु' इत्यकारो न नञ्जः । आत्, परमग्रे, भयम् । अभयमित्यर्थः ।

काकौ, यथा—

योग्यो न कोपस्तेजस्विंस्त्वयि मित्रसमे सति ।

---

343. 'This entire world, moveable and immoveable, has been created by स्थाणु (=1. by God S'iva as meant by the speaker, 2. by [redacted] of pillars, as understood by the hearer)'

—"The moveable world is perceived to be sentient and nowhere to be made up of pillars."

344. "May अलक्ष्मी (= distress or poverty), अशुभ (= calamity or misfortune), अभद्र (=evil) as well as भय (=terror) befall thee!

—Read this only after omitting the negative particle (compounded with the words अलक्ष्मी, अशुभ and अभद्र, i.e after changing their forms to लक्ष्मी, शुभ and भद्र), and after prefixing the word भय with [redacted] (i. e. after making its form as अभय), O wicked man!

*N. B.* "दुष्टात्परं भयम्" at first appearance means, "There is extreme danger from the wicked".

345. 'O brilliant hero! in thee, who art a sage and [redacted] parallel of the sun, fury is not proper". (*Understood by the person addressed as*—

१. एतदाद्युदाहरणद्वयं तद्वृत्तिश्च केवलं [redacted] पुस्तके विद्यते, आ [redacted] पुस्तकयोस्तु नोपलभ्यते, २. 'तवाभद्रे' इति पाठ आधारभूते [redacted] पुस्तके. ३. 'नञ्जोऽकारलोपं' इति पाठ आधारभूते अ पुस्तके. ४. 'अभयम्' इति पाठ आधारभूते [redacted] पुस्तके. ५. अत आरभ्य ग्रन्थभागः साधारण्येन त्रिष्वपि अ आ [redacted] पुस्तकेषूपलभ्यते.

इत्युक्तो नृपतिः साक्षाद्दध्ले चपेटिकां ददौ ॥३४५॥

अत्र 'मित्रसमे तेजस्विनि सत्पुरुषे त्वयि कोपो न योग्यः' इत्यस्य स्वरविकारेण काका यथोचितमर्थान्तरं विपरीतलक्षणया कल्पनीयम् ।

९५. स्वभावोक्तिः

जात्यादीनां स्वभावो यद्वर्ण्यते हृदयङ्गमः ।
अलङ्कृतिं स्वभावोक्तिं विदुरतां तान्त्रिकोत्तमाः ॥१२४॥

यथा—

श्रीराघवस्योरुचमूनिनादं
श्रुत्वा मृगाः स्तब्धितकर्णयुग्मम् ।
उद्ग्रीवका दृष्टचमूध्वकुन्ताः
प्रदुद्रुवुः खे बहुलं भुवीषत् ॥३४६॥

९६. भाविकम्

भूतभव्यार्थयोर्यत्र साक्षात्कारः प्रवर्ण्यते ।
भाविकं तत्र गदितालङ्कृतिः काव्यवित्तमैः ॥१२५॥

---

"O brilliant hero! is fury not proper in thee when thou art a parallel of the Sun?")

—The king who was thus addressed actually gave a blow with his open hand on (the speaker's) cheek.

***Karikā 124.*** *If striking peculiar dispositions of a species etc. are described the figure is termed Svabhāvokti by the best scientists (i. e. rhetoricians).*

346. The deer on hearing with their pairs of ears steady, the roar of revered Rāghava's great army, uplifted their necks and, having observed the high lances of the army, galloped more in the sky and less on the earth.

***Kārikā 125.*** *When past or future objects are represented being apprehended visibly, there is declared the figure Bhāvika by highest rhetoricians.*

---

१. 'इत्युक्त्वा'—आ, इ. २. 'अत्र' इति पदं नास्ति आ पुस्तके. ३ 'सत्यवादिनि'—आ. ४. 'प्रकृतोचित०'—आ, इ. ५. इदं पदं नास्ति आ पुस्तके. ६. 'श्रीमाधवस्योरु०'—अ. ७. '०चमूनिदान'—अ, आ. ८. 'उद्ग्रीवाका'—अ। 'उद्ग्रीविका'—आ, इ. ९. 'भूतभाव्यर्थ०'—आ, इ.

यथा—

सुरासुरा यथा पूर्वं युध्यन्ते स्म तथाधुना ।
म्लेच्छैर्विश्वासरायोऽत्र पश्याम्यद्यापि युध्यते ॥३४७॥

स्थानभीषणतोद्भावनमिदम् ।

भव्यार्थसाक्षात्कारः, यथा—

आलोकयेऽधुना सर्वं कल्कीभूयात्र माधवः ।
हनिष्यति रणे म्लेच्छानिति वक्ति मुनीश्वरः ॥३४८॥

'नाविष्णुः पृथिवीपतिः—' इति शास्त्रात्प्रकृतराज्ञो विष्णोश्चाभेद-मङ्गीकृत्येयमुक्तिः । अत्र पृथिव्याम् । 'माधव'पदेन यदि कृष्णः, तर्हि यथाश्रुतमेव ।

## ९७. उदात्तम्

समृद्धेश्चरितं यत्र श्लाघ्यं चरितमेव वा ।
वर्ण्यतेऽन्याङ्गतापन्नं तत्रोदात्तमुदाहृतम् ॥१२६॥

'अन्याङ्गतापन्नम्' इति श्लाघ्यचरितस्य विशेषणम् । समृद्धेश्चरितं

---

347. Just as the gods and the demons fought (with each other) in remote ages so in this age I observe even now, is Viśvasarāya fighting with the Mlecchas (i.e. the Mohamadens) at this place (viz., Sindkhed, Udgir or Panipat).

348. I am now actually perceiving in entirety what the great sage says viz, that Mādhava (=God Viṣṇu here also identified with Peṣavā Madhavarao I) having assumed the form of Kalki on this earth, would slay the Mlecchas in battles.

***Kārikā 126.*** *The figure Udātta is declared when there is description of (extraordinary) affluence or when there is description of commendable deeds (of the great) which are represented as subordinate or collateral to something else (viz., to the subject in hand).*

---

१. '०विश्वस्रावोऽत्र' इति पाठस्त्रिष्वपि [illegible] आ इ पुस्तकेषु. २. 'स्थान-भीषणत्वोद्भावनमिदम्'—आ. ३. 'भाव्यर्थ०'—आ, इ. ४. '०मङ्गीकृत्यैवमुक्तिः'—अ. ५. 'अत्र पृथिव्याम्' इति नास्ति अ पुस्तके. ६. इदं वाक्यं केवलं [illegible] पुस्तके दृश्यते, [illegible] पुस्तकयोस्तु नोपलभ्यते. ७. 'तदोदात्त०'—अ. ८. अत उत्तरं 'न तु समृद्धे-श्चरितस्य' इत्यधिकं आ पुस्तके, [illegible] पुस्तके त्वयं भागः प्राक्तनपि पश्चान्निष्कासितो दृश्यते.

यत्र वर्ण्यते तत्रोदात्तम्, श्लाघ्यं चरितमन्याङ्गतया यत्र वर्ण्यते तत्रोप्युदात्तम्, इत्यर्थः ।

समृद्धेश्चरितं, यथा—

भित्तिरत्नेषु सङ्क्रान्तप्रतिबिम्बशताकुला ।
जानीते स्म नटी यत्नाद्बिम्बं राघवभूपतेः ॥३४९॥

अत्र समृद्धेरत्युक्तिरूप उदात्तोऽलङ्कारः । अत एव वदन्ति—"सम्पदत्युक्तावुदात्तोऽलङ्कारः, शौर्यादित्युक्तौ त्वत्युक्तिरेवालङ्कारः ." इति ।

अन्याङ्गतया श्लाघ्यं चरितं, यथा -

हस्तिनापुरमेतत्तथस्य प्रान्ते महत्तरम् ।
अभूद्रणं तद्विश्वासरायम्लेच्छाधिपोभयोः ॥३५०॥

## ९८. अत्युक्तिः

अतथ्यैरद्भुतैर्यत्र शौर्यौदार्यादि वर्ण्यते ।
अत्युक्तिस्तत्र गदितातिशयोक्तिविलक्षणा ॥१२७॥

---

349. With great effort did the dancing girl recognise king Raghava's person, confounded as she was on account of his hundreds of reflections passing through the wall jewels.

350. This is the same Hastināpura — the extreme skirts whereof there took place the celebrated great combat between the two (heroes), viz., Viśvāsarāya and the Mlecchа (i e. Mohamaden) king

***Karikā 127.*** *The figure Atyukti which is distinct from the figure Atis'ayokti, is declared when one's heroism, liberality, etc. are narrated by means of unreal and marvellous details.*

---

१. 'ोमन्याङ्गतापन्न यत्र.....'—आ. २. 'तत्रोभयत्राप्युदात्तमित्यर्थः'—आ. ३. आ पुस्तके 'अन्याङ्गतया श्लाघ्यं चरित' पूर्वमुदाहृतं, 'समृद्धेश्चरितं' इति ततः पश्चदुदाहृतम्. ४. 'समृद्धेश्चरितस्य यथा'—अ. ५. 'भित्तिस्फटिकसङ्क्रान्त०'—आ. ६. 'द्रुच्छाद्बिम्बं'—आ. ७. 'माधवेभूपतेः'—अ, आ. ८. 'समृद्धेरित्युक्तिरूप'—अ. ९. 'शौर्यादित्युक्तौ'—अ. १०. 'त्वत्युक्तिरलङ्कार एवेति'—अ. ११. 'अन्याङ्गत्वे'—आ, इ. १२. 'अभवद्रणं'—अ. १३. 'तद्विश्वासरावम्लेच्छा०'—अ, आ, इ. १४. 'शौर्यौदार्यादिवर्णनम्'—आ, इ. १५. 'ोतिशयोक्तेर्विलक्षणा'—इ.

यत्रासदुक्तिः[1], तत्रातिशयोक्तिः। यत्र त्वत्यन्तासदुक्तिः, तत्रात्युक्तिः। तदेवोक्तम्—'अद्भुतैः' इति अद्भुतत्वमत्यन्ततथ्यत्वरूपं[2] द्रष्टव्यम्। अत एव "असदुक्तितारतम्येनातिशयोक्तेरत्युक्तेश्च[3] भेदः" इति दीक्षिताः।

यथा पूर्वोक्तातिशयोक्त्युदाहरणे—

"श्रीपेपवः सूक्तिरसैर्वितृप्ताः
पीयूषधारा अपि नाद्रियन्ते।
तद्दानतुष्टा विदुषां समाजा
न चाद्रियन्ते धनदामरद्रू॥"

—इत्यादावसदुक्तिमात्रं, न त्वत्यन्तासदुक्तिः।

अत्युक्तिः, यथा—

अमान्तं भुवने राजन्! प्रतापं ते यशोऽपि च।
ज्ञात्वानुशेते द्रुहिणो भुवनाल्पत्वनिर्मितिम्॥३५१॥

यथा वा[4]—

राजंस्तव प्रतापेनाऽध्वयः सप्तापि शोषिताः।
पुनः प्रपूरिता दानसङ्कल्पव्ययितैर्जलैः॥३५२॥

## ९९. निरुक्तिः

**अर्थान्तरं प्रकल्प्यैव संज्ञाशब्दस्य योगतः।**
**यत्किञ्चिद्वर्ण्यते तत्र निरुक्तिः स्यादलङ्कृतिः॥१२८॥**

---

351. O king! the Creator, on realising that thy majesty (or valour) and glory do not find space in this world, repents his action in having given smallness of form to this world

352. O king! all the seven oceans had been dried up by thy excessive radiance but were filled up again with the waters spent in thy ceremonious declarations of charities

*Kārikā 128. When a description is made after allotting a different meaning etymologically to a word that is a proper name, there occurs the figure Nirukti.*

---

१. 'यत्रासदुक्तिमात्रं'—आ. २. '०तथ्यरूपत्वं'—आ. ३. '०तिशयोक्त्यत्युक्त्योर्भेदः'—आ. ४. 'यथा वा' इति पदद्वयं नास्ति आ पुस्तके.

तथा—

लक्ष्मीस्त्वां सेवते राजन् । प्रजापालनतत्परम् ।
माया लक्ष्म्या धवश्चेति सत्यं त्वं माधवोऽर्थतः ॥३५३॥

अत्र नृपतिविशेषे रूढस्य 'माधव' इति संज्ञाशब्दस्य योगेनार्थान्तरकल्पनाभिरुक्तिरलङ्कारः ।

यथा वा पूर्वोक्तमेव पद्यं—

श्रीयुतो बहु चकार यो द्विषां पेषणं युधि समुद्यतखड्गः ।
याति पेषमिति पेशलमर्थं 'पेषवा'पदमुपैति वदत्तम् ॥३५४॥

'पेषवा' इति संज्ञाशब्दस्य योगेनार्थान्तरकल्पनाभिरुक्तिः ।

## १००. प्रतिषेधः

निषेधः सुप्रसिद्धो हि मुखेनाप्यनुकीर्तितः ।
प्रतिषेधः पृथग्भूतो बाधितभ्रांतिषेधतः ॥१२९॥

---

353. O king! Lakṣmi (—the Goddess of Wealth) waits upon thee who art exclusively devoted to the protection of thy subjects. Truly thou art 'Mādhava' with reference to the meaning (of thy name) "मायाः लक्ष्म्याः धवः = husband of Ma, i. e. of Lakṣmī".

354. The word 'Peṣavā,' denoting him who, endowed with wealth (or dignity) and with his sword raised, immensely carried on the crushing of his enemies, has attained a charming meaning, viz., one who carries on the crushing of one's enemies.

**Kārikā 129.** *A well-known negation, when proclaimed by one's mouth, makes up the figure Pratiṣedha which is different from the denial involving inconsistency or contradiction (=possibly, the second variety of Ākṣepa defined in Kārikā 50).*

---

१. अतः प्राक् 'निष्कलङ्केन यशसा पेषवाराधवप्रभोः व्यक्तोऽयोगिसंहर्ता सत्यं दोषाकरो भवान् ।' इत्युदाहरणं, 'कस्याश्चिद्विरहिण्या उक्तिरियम् ।' इति तद्वृत्तिश्चाधिकत्वेन दृश्यते ■ पुस्तक एव. २. 'प्रतापानलतत्परम्'—अ. ३. 'अत्र' इति पदं नास्ति आ पुस्तके. ■ पुस्तकेऽपीदं पदं शोधरूपेण पश्चाद्विहितं दृश्यते. ४. 'नृपविशेषे'—आ, इ. ५. 'नाम्नो'—आ. ६. 'पूर्वोक्तमेव पद्यं' इति पदानि न सन्ति आ पुस्तके. ग्रन्थकर्तृपोद्घातगतं षष्ठं पद्यमिदम्. ७. 'पेषण रिपुगणस्य महाजौ यश्चकार बहुधोद्यतखड्गः ।' इति पाठः पद्यपूर्वार्धस्य ■■ पुस्तके. ■ पुस्तकेऽपि पाठ आदौ आ पुस्तकानुसार्यासीद्यः पश्चात्संशोध्य ■■ पुस्तकानुसारी विहितो दृश्यते. ८. 'योगेनार्थान्तरकल्पना०'—आ, इ. ९. 'प्रतिषेधपृथग्भूतो'—अ; पाठान्तरत्वेन आ पुस्तकेऽपि. १०. 'बाधितः प्रतिषेधतः'—अ.

यथा—

कन्दुकक्रीडनं नैतन्नैतत्पृथुकखेलनम् ।
असिधारासमं राज्ञो माधवस्य निषेवणम् ॥३५५॥

विज्ञातो निषेधो ह्यर्थान्तरं गर्भीकुर्वंश्चारुतामावहतीति 'प्रतिषेध'-नामालङ्कारः ।

राजसेवासक्तं दुर्विनयं कंचित्प्रति कस्यचिदुक्तिः 'कन्दुक-' इति । अत्र राजसेवायां कन्दुकक्रीडनत्वाद्यभावो लोकप्रसिद्ध एव मुखतोऽनुकीर्तितः सन् 'तत्रैव तव प्रागल्भ्यं, न राजसेवायां व्युत्पत्तिरस्ति-' इति परिहासं गर्भीकरोति। 'मूर्ख' इति सम्बोधनमध्याहार्यम् । तेन स्वोक्त्या व्यङ्ग्यार्थस्याविष्करणान्न ध्वनित्वव्यपदेशः[11] ।

यथा वा—

सद्भिरेव कृताः सन्तो न शैलेन महत्तमाः ।
चेतांसि तेषां चेतोभिर्न पुष्पैः कोमलान्यति ॥३५६॥

अत्र सतां शैलनिर्मितत्वाभावः प्रसिद्ध एव मुखतोऽनुकीर्त्यमानस्तेषां शैलादप्युच्चैस्तरत्वमनुलङ्घनीयत्वरूपं व्यक्तीकरोति । एवं सत्पुरुषचेतसां पुष्पनिर्मितत्वाभावः प्रसिद्ध एव मुखतोऽनुकीर्तितः संस्तच्चेतसां पुष्पेभ्योऽप्यतिमृदुत्वं व्यनक्ति अत्र व्यङ्ग्योऽर्थः 'महत्तमाः' इति 'अतिकोमलानि'

---

355. This is not the game with a ball; this is not playing with children. The task of waiting upon king Madhava is just like (dealing with) the edge of a sword.

356. Great (lit. the greatest) sages are made by sages alone; they are not made up of a mountain. Their extremely tender hearts are made by their hearts (alone); they are not made up of flowers.

---

१. 'वाटिकाक्रीडनं'—आ. २. 'राघवस्य'—आ इ. ३. 'राजसेवां प्रकुर्वन्तं'—आ. ४. 'वाटिकेत्यादि'—आ. ५. 'वाटिकाक्रीडनत्वाभावो'—आ. ६. 'विज्ञात एव'—आ. ७. 'मुखेनानुकीर्तितः'—आ. ८. 'उपहासं'—आ, इ. ९. 'हे मूर्ख'—आ. १०. स्वोक्त्यैव'—आ. ११. अत उत्तरं 'व्यङ्ग्यस्य स्वोक्त्याविष्करणेऽलङ्कारत्वमिति प्रागेवोक्तत्वात् ।' इत्यधिकं आ पुस्तके. ■ पुस्तके स्वयमतिरिक्तो भागः प्राक्तनपि पश्चाद्विष्कासितो दृश्यते. १२. 'कोमलान्यपि'—अ, इ. १३. 'अनुल्लङ्घनीयत्वरूपं' इति पदं नास्ति आ पुस्तके. इ पुस्तकेऽपीदं शोधरूपेण पश्चादिहित दृश्यते. १४. 'मुखतः कीर्त्यमानस्तच्चेतसां'—आ; 'मुखतोऽनुकीर्त्यमानस्तच्चेतसां'—इ. १५. 'इति' इति पदमत्र न दृश्यते ■ पुस्तके.

इति विशेषणाभ्यामाविष्कृतः, इति ध्वनित्वव्यपदेशः

ननु प्रतिषेधालङ्कारः प्रागुदाहृत एवेत्यत आह—"बाधितप्रतिषेधतः पृथग्भूतः" इति। तथा च, बाधसत्त्वे 'आक्षेप'भेदत्वेन पूर्वमुक्तात्प्रतिषेधात् प्रसिद्धिसत्त्वेऽपि तत्प्रतिद्वन्द्व्ययं प्रतिषेधः पृथगेवेत्यर्थः

## १०१. विधिः

विधीयते सिद्धमेव वस्तु तत्र विधिर्मतः ।
बाधिताद्विध्यलङ्कारात्पृथक् सत्प्रतिपक्षितः ॥१३०।

यत्र प्रसिद्धं सर्वविदितमेव वस्तु विधीयते, तत्र 'विधि'र्नामालङ्कारो मतः। पूर्वोक्ताद्बाधिताद्विध्यलङ्कारात्तत्प्रतिद्वन्द्वी प्रसिद्धिसत्त्वेऽपि विधीयमानोऽयं पृथगित्यर्थः।

यथा—

राज्ञो राघवरायस्य गुणज्ञस्य सभागृहे ।
सभाप्रसङ्गसमये पण्डितः पण्डितो भवेत् ॥३५७॥

अत्र पण्डितस्य पण्डितत्वविधानमुपयोगरहितं सत्प्रकृतराज्ञः सभासदां च गुणज्ञत्वं पाण्डित्यविशेषं च व्यनक्ति। एतच्च 'गुणज्ञस्य राज्ञः सभागृहे सभाप्रसङ्गे सति—' इत्युक्त्याविष्कृतम्, इति न ध्वनित्वव्यपदेशः।

---

***Karikā 130.*** *When a thing already well-known (or established) is stated forth (or, is established), there occurs the figure Vidhi which is different from another figure called Vidhi (=possibly the third variety of Ākṣepa enunciated in Kārikā 51.) wherein contradiction occurs due to the existence of a contradictory premiss.*

357. A Paṇḍita can become a (real) Paṇḍita in the occasion of a meeting in the council-chamber of king Raghavarāya who knows how to appreciate merits.

---

१. 'विधिरलङ्कारो'—आ. २. 'माधवरावस्य'—अ; 'राघवरावस्य'—आ, इ. ३. 'च' इति पदं नास्ति आ पुस्तके. ४. 'प्रकृतर शो गृहे'—आ. ५. '०विष्कृतमतो न'—आ.

१०२. हेतुः (प्रथमः, द्वितीयश्च)

हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते ।
हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ॥१३१॥

आद्यः, यथा—

गृह्णाति खड्गं राजेन्द्रः पेषवा माधवः स्वयम्
निःसपत्नं जगत्कर्तुं रामार्जुनसमद्युतिः ॥३५८॥

द्वितीयः, यथा—

गजेन्द्रैर्बृंहितं द्वारि वाजीनां हेषितानि च ।
श्रीविलासाः पण्डितानां कटाक्षा राघवप्रभोः ॥३५९॥

## III. प्रमाणालङ्कारविवेचनम्

प्रमा तज्जनकं यत्र कविभिः संनिबध्यते ।
प्रमाणालङ्कृतिस्तत्र चतुर्धा सा प्रकीर्तिता ॥१३२॥

प्रमा प्रत्यक्षमनुमितिरुपमितिः शाब्दं च । एतेषां निबन्धश्च

---

***Karikā 131.*** *The description of the cause along with the effect is termed (the figure) Hetu Some (rhetoricians) give the name Hetu to the identity of the [illegible] and the effect.*

358. Peşava Mādhava the lord of kings who is an equal of Rāma and Arjuna in majesty himself wields the sword for rendering the world devoid of enemies [illegible] rivals.

359. There is the trumpeting of lordly elephants and the neighing of horses at the gate. King Rāghava's glances are the graceful movements of Fortune for Paṇḍitas.

***Kārikā 132.*** *If correct logical notion or proof (viz., 1. Pratyakṣa i.e. Ocular Proof; 2. Anumāna i.e. Inference by Syllogism; 3. Upamāna i.e. Analogy, and 4. Śabda i.e. Verbal Evidence) leading thereto [illegible] drawn up by poets, there occurs the figure Pramāṇa which is said to be of four kinds, viz., 1. the figure Pratyakṣa; 2. the figure Anumāna; 3. the figure Upamāna; and 4. the figure Śabda.*

१. 'राघवः'—आ, इ. २. 'रामार्जुनसमप्रभः'—आ, इ. ३. 'गजेन्द्रोल्लसनं' —आ. ४. 'क्रीडनानि'—आ. ५. 'माधवप्रभोः'—अ. ६. 'सम्प्रकीर्तिता'—अ. ७. 'एतेषां निबन्धश्च...तत्र प्रमाणालङ्कारः' इत्यस्य स्थाने 'तज्जनकं प्रमाणं तत्सहकारि च यत्र निबध्यते तत्र प्रमाणालङ्कारः ।' इति आ पुस्तके.

प्रत्यक्षत्वादिनेति नियमः, किं तु येन केनापि रूपेणानुभवत्वज्ञानत्वादिनापि। तज्जनकं प्रमाजनकं प्रमाता विषयो लिङ्गादि सादृश्यविशिष्टे पदप्रतिपाद्यत्वं श्रुतिः स्मृतिर्लौकिकशब्दोऽपि चेत्यादि यत्र निबध्यते, [illegible] प्रमाणालङ्कारः। स च प्रत्यक्षानुमानोपमानशब्दभेदाच्चतुर्धा। सम्भवचेष्टयोरनुमानेन, ऐतिह्यस्य शब्देन, अनुपलब्धेश्च प्रत्यक्षेण, गतार्थत्वादित्यभिप्रायः।

## १०३. प्रत्यक्षम्

प्रत्यक्षं, यथा—

मुखं चन्द्रस्फीतं ह्यमृतलहरी सूक्तिसरणि-
र्मुखामोदोऽत्युच्चैर्वपुरपि शिरीषप्रतिभटः।
धरेऽपूर्वं द्राक्षारस इह युवा कोऽपि सुकृती
युवत्याः सम्भोगे त्वनुभवति सर्वेन्द्रियसुखम् ॥३६०॥

प्रातावसरस्य कस्यचिद्राजानं प्रत्युक्तिरियम्।

यथा वा—

सुगन्धिनि सुखस्पर्शे मधुरेऽथ मनोहरे।
राजन्! पञ्चेलिमे चूते निर्वृवारेन्द्रियव्रजः ॥३६१॥

---

360. The young damsel's face is bright like the moon, the continuous line of her sweet words is a wave of the nectar; the fragrance of her mouth is extremely intense; her body, too, vies with the Śirīṣa flower (in the matter of delicacy); and there is grape-juice (or wine) on her lower lip. A certain lucky youth [illegible] the course of his carnal enjoyment with the young damsel indeed directly experiences all the sensual pleasures on this earth.

361. O king! the multitude of the organs of sense [illegible] highly delighted with the mango that was sweet-smelling, agreeable to the touch, sweet, charming and naturally ripening.

---

१. '०शाब्दभेदा०'—अ. २. 'युवत्या'—अ ३. 'मुखस्पर्शे'—अ. ४. 'प्रञ्चेलिमे चूते' इति पाठस्त्रिष्वपि [illegible] पुस्तकेषु.

## १०४. अनुमानम्

अनुमानं, यथा—

अनुमितोऽपि चमूत्थितरेणुभि-
र्नगगतैररिभिः परिशङ्कितैः ।
व्यभिचचार न राघवसंज्ञिको
ज्वलितशत्रुतृणो ज्वलनोऽपरः ॥३६२॥

रूपकसङ्कीर्णोऽयमनुमानालङ्कारः ।

शुद्धं, यथा—

सरोजानां श्रिकसनैः पतङ्गोदितशब्दितैः ।
लतालीनालिसङ्क्षोभैर्ज्ञायते ह्युदितो रविः ॥३६३॥

दुर्दिने, अस्तोदितसूर्यग्रहणे सति वा, कस्यचिदुक्तिरियम् ।

## १०५. उपमानम्

उपमानं, यथा—

चापाकारे भ्रुवौ यस्मान्मुखं चन्द्रेण संनिभम् ।
पुण्डरीके इव दृशौ तेदयं माधवप्रभुः ॥३६४॥

---

362. The king named Raghava, who is another fire and had burnt the straw in the form of his enemies did not act wrongly (or, did not belie his character, i e did not shrink), although, on account of the dust raised by his forces, he was inferred (i e guessed to be present) by the frightened enemies taking shelter on the mountain.

363. From the blooming of the lotuses from the cries uttered by the birds and from the commotion caused among the bees lurking within the creepers, it is learnt with certainty that the Sun has risen.

364. This person is decidedly king Mādhava, since his eye-brows are bow-shaped, since his face resembles the moon and since his eyes are like lotuses.

---

१. 'चमूत्थितरेणुभि०'—अ; 'चमूत्थितधूलिभि०'—आ. २. 'प्रविशङ्कितैः'—आ. ३. 'माधवसंज्ञिको'—अ; 'राघवतापकृत्'—आ. ४. '०तृणोज्ज्वलनोऽपरः'—इ. ५. 'तादूप्यरूपकसङ्कीर्णो०'—आ. ६. शुद्धानुमानस्योदाहरणं तद्वृत्तिश्च न दृश्यते आ पुस्तके. ७. शुद्धो'—अ. ८. 'यस्य मुखं'—आ. ९. 'तं विजानीहि राघवम्'—आ; 'तदयं राघवप्रभुः'—इ.

यस्मात्कारणात् । चापाकारे भ्रुवौ, मुखं चन्द्रेण संनिभं, पुण्डरीके ■■ दृशौ । तत्तस्माद्धेतोः । अयं 'माधव'पदप्रतिपाद्यः प्रभुः ।

एतादृशोपमितैः प्रयोजकीभूतमतिदेशवाक्यं तु—

"चापाकारे भ्रुवौ यस्य मुखं चन्द्रेण संनिभम् ।
पुण्डरीके इव दृशौ तं विजानीहि माधवम् ॥३६५॥"

—इत्येवंरूपमूह्यम् ।

### १०६. शब्दः

(अ, आ) स्मृतिः, श्रुतिश्च

शब्दः, यथा—

"नाघाय मृगया राज्ञामिति जानन्नपि स्वयम् ।
जहौ तां माधवो वीरो न हिंस्यादिति भावयन् ॥३६६॥

पूर्वपादे स्मृतिः प्रमाणम्; उत्तरपादे च श्रुतिः ।

(इ) लौकिकशब्दः

लौकिकशब्दः, यथा—

इन्द्रप्रस्थं प्रति बली बलिष्ठैरभिवन्दितः ।
यातीति प्रस्तुतं लोकास्पेषवा राघवप्रभुः ॥३६७॥

---

365. Thou shouldst recognise ■■ Mādhava the person whose eyebrows are bow-shaped, whose face resembles the moon and whose eyes ■■ like lotuses.

366. Although himself aware of the Smrti that hunting does not conduce to ■ sin in the case of kings, heroic Mādhava gave it up, (with a view to) establishing the S'ruti that one must not kill (other beings).

367. It is the current topic among the people that king Rāghava, ■■ mighty Peṣavā who is adored even by the mightiest, is setting out for Indraprastha.

---

१. इयं वृत्तिर्न दृश्यते ■■ ■ पुस्तकयोः. २. 'एतादृशोपमितैः...इत्येवंरूपमूह्यम्' इत्यपि ■ दृश्यते आ ■ पुस्तकयोः. ३. त'—अ. ४. 'राघवो'—आ, इ. ५. 'प्रमाणम्' इति पदं नास्ति आ पुस्तके. ६. 'लौकिकशब्दो' इति पदं न दृश्यते ■■ ■ पुस्तकयोः. ७. 'यथा वा'—आ. ८. 'oरपि वन्दितः'—अ, आ. ९. 'विश्रुतं'—आ, इ. १०. 'माधवप्रभुः'—अ; 'राघवः प्रभुः'—इ.

यथा वा—

श्रीराघवः श्रीपतिमाधवो वा
नारायणो वा नरदेववन्द्यः
मयार्चितोऽलङ्कृतिपद्यपुष्पैः
श्लेषाच्च वेदात्पुरुषः पुराणः ॥३६८॥

अत्र प्रकृतराज्ञो वर्णने कृते पुराणपुरुषस्य भगवतो वर्णनप्रमितौ वेदो 'नाविष्णुः पृथिवीपतिः-' इतिस्मृतिमूलीभूता श्रुतिः, नानार्थलौकिकशब्दोऽपि च, प्रमाणत्वेनोपन्यस्तैः ।

## IV. ध्वनिरूपरसवदाद्यलङ्कारविवेचनम्

G. अथान्यानपि सप्तालङ्कारानामनन्ति । ते च ध्वनिरूपा अप्यलङ्कारत्वेन परिगणिताः ।

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः ॥

368 By means of flowers in the form of verses embodying poetic figures (or rhetorical ornaments) I have adored revered Raghava (1. Peṣavā Raghunāthrao, 2. God Rāma) or Madhava (— 1. Peṣava Mādhavrao I. 2. God Viṣṇu) the lord of S'ri (Wealth or Lakṣmī, referring possibly to Ramabai Peṣava), or Nārāyaṇa (— 1. Peṣava Nārayanrao; 2. Supreme God Viṣṇu) adorable by men and gods (or by Brahmaṇas or by God Nara the celebrated associate of God Nārāyaṇa) each of whom is the Primeval Being (i.e. Supreme God) on account of the pun (on their names) and on account of (the evidence of) the Veda

G. (No *Kārikā*) *Hereafter the authorities lay down seven more figures. Although these bear the nature of Dhvani (— suggested sense in poetry), still they have been counted as Alaṁkāras.*

*Śṛṅgāra, Hāsya, Karuṇa, Raudra, Vīra, Bhayānaka, Bībhatsa, Adbhuta and S'ānta, these are held to be the nine Rasas (=developed sentiments) in Drama and also in Poetry.*

१. 'मायार्चितो०'—अ. २. 'नाविष्णुः पृथिवीपतिरितिस्मृतिमूलीभूता श्रुतिः' इति नास्ति आ पुस्तके ३. अत उत्तरं 'इत्यलङ्कारप्रपञ्चः समाप्तः' इत्यधिकं आ पुस्तके. 'निरूपणीयत्वेन मनीषितानामलङ्काराणां प्रपञ्चः समाप्तः' इति वाक्यं तत्रैव स्थले प्राक् सदपि पश्चान्निष्कासितं दृश्यते इ पुस्तके. ४. 'अथ' इति पदं नास्ति आ पुस्तके.

काव्येऽपि च ।

ते पुना रसा यत्रापराङ्गतया निबध्यन्ते, तत्र रसवदलङ्कार इत्येकः ।

विभावानुभावाभ्यामभिव्यक्तीकृताश्चयस्त्रिंशद् भावाः, देवतागुरुनृपादावभिव्यक्तिं नीता रतिश्च भावो यत्रापराङ्गतया[1] निबध्यते, तत्र प्रेयोऽलङ्कारो द्वितीयः[2] ।

अनौचित्येन प्रवृत्तो रसो भावश्च रसाभासो भावाभासश्च यत्रापराङ्गतया[3] निबध्यते, तत्रोर्जस्व्यलङ्कारस्तृतीयः ।

विनश्यदवस्थो भावो भावशान्तिः । सा यत्रापराङ्गतया निबध्यते, तत्र समाहितमलङ्कारश्चतुर्थः[4] ।

---

*And when any one of these Rasas is made subordinate to another Rasa in a literary composition, there occurs the first figure, viz. Rasavat*

*The second figure viz. Preyas, occurs when any of the thirty-three (Vyabhicarin) Bhavas (=transitory feelings), manifested by means of a Vibhāva (=any condition which develops a particular state of mind) and an Anubhāva (=an external manifestation of a feeling by appropriate symptoms), is made subordinate to something else or when Bhāva (=incomplete sentiment or emotion) i. e. Rati (=Love) shown to a deity, a guru, a king etc., is made subordinate to something else in a literary composition.*

*The third figure, viz. Ūrjasvin, occurs when Rasābhāsa (= the semblance of Rasa) and Bhavābhāsa (=the semblance of Bhāva), which result respectively when Rasa and Bhāva proceed with impropriety, are made subordinate to something else in a literary composition.*

*Bhāvasanti (=the quelling of an emotion) means Bhava in a passing stage. When this Bhāvasanti is made subordinate to something else in a literary composition, there occurs the fourth figure, viz. Samāhita.*

---

१. 'यत्र पराङ्गतया' — आ. २. 'स'—ह. ३. 'यत्र पराङ्गतया'—ह. ४. 'समाहितं चतुर्थः'—आ; 'समाहितालङ्कारश्चतुर्थ'—ह.

उत्पत्स्यमानो भावो भावोदयः । द्वयोर्विरुद्धयोर्भावयोः परस्परस्पर्धा भावसन्धिः । बहूनां भावानां पूर्वपूर्वोपमर्देनोत्पत्तिर्भावशबलता । एते त्रयो यत्रापराङ्गतया[1] निबध्यन्ते, तत्र भावोदयो भावसन्धिर्भावशबलतेति त्रयोऽलङ्काराः[2] ।

### १०७. रसवत्, १०८. प्रेयश्च

तत्र रसवदलङ्कारः, यथा—

उरस्तवेतद्बलमौक्तिकस्रजां
दोलायितानां हि गतागताङ्गणम् ।
एतौ करौ तौ कुचभारतोलन-
क्षमौ कथं नाथ ! न भाषसेऽधुना ॥३६९॥

सोऽयं कर पत्रविशेषके कृती
नीव्यूरुसंस्पर्शनलालसोऽपि यैः ।

---

*Bhāvodaya (=excitement of an emotion) means an emotion about to rise. Bhāvasandhi (=conjunction of emotions) means the mutual rivalry of two contrary emotions. Bhāvs'abalatā (=commixture of emotions) means the rise of several emotions through the suppression of each preceding emotion. When these three (viz, Bhāvodaya, Bhāvasandhi and Bhāvas'abalatā) are made subordinate to something else in a literary composition, there respectively occur the three figures, viz. Bhāvodaya, Bhāvasandhi and Bhāvas'abalatā.*

369. This is the very bosom that formed a court-yard for the coming and going of the swinging pearl-necklaces of (my) neck. These are the very two hands that were competent enough to lift the burden of (my) breasts. Whence, O lord, dost thou not speak now?

370. The very hand, that was skilled in पत्रविशेषक (=drawing decorative lines of painting on one's face and person with fragrant and coloured substances) and also used to take pleasure in stroking gently

---

१. 'यत्र पराङ्गतया'—आ, इ. २. [illegible] उत्तरं केवलं [illegible] पुस्तके 'एतेषां समानामप्युदाहरणानि पराङ्गतया रसभावनिरूपणप्रस्थाने काव्यप्रकाशादौ द्रष्टव्यानि ।' इत्यतिरिक्तो भागः प्राक्सत्रपि पश्चान्निष्कासितो दृश्यते. ३. 'तत्र' इति पदं नास्ति [illegible] पुस्तके. ४. 'वलत्करौ'—आ. ५. 'सन्'—आ.

गतोऽधुना योगविदः कराकृतिं
प्रसीद भो नाथ! सहस्व दुर्नयम् ।३७०॥
विश्वासरैराथो रणभूमिदुर्मदो
हतारिपत्नीपरिदेवनान्यरम् ।
शृण्वन् कपोलाञ्चितवारिमौक्तिको
जघान भूयो विशिखैर्भटौघान् ।३७१॥
इमानि चास्मत्कृतविश्वासराययुद्धवर्णनपद्यानि ।

तत्राद्ययोः शृङ्गाररसः करुणरसाङ्गतया निबद्धः, इति रसवदलङ्कारः । तृतीयपद्ये च कपोलगतस्वेदबिन्दुप्रतीयमानः श्रमाख्यो भावो वीररसाङ्गतया निबद्धः, इति प्रेयोऽलङ्कारः ।

## १०९. ऊर्जस्वि

ऊर्जस्वि, यथा—

राजंस्तवारिवनिताः पलायन्त्योऽतिविह्वलाः ।
सुखद्विर्नाविकैर्धूर्तैः क्रोडे कृत्वा तरिं नीताः ।३७२॥

---

the knot of (my) waist-garment and (my) thigh, has now attained the appearance of a Yogin's hand Be pleased, O lord, and bear (this) impropriety.

371. Viśvāsarāya, ferocious on the battlefield heard repeatedly the lamentations of the wives of the slain enemies and, with pearl-drops (i e. drops of perspiration) manifested on his cheeks, again killed the groups of warriors with his shower of arrows.

372. O king! thy enemies' women extremely perturbed while escaping, were clasped to the bosom and carried to a boat by the infatuated roguish sailors.

---

१. 'दुर्नयम्'—आ. २. '०विश्वासरावो'—अ, आ, इ. ३. '०विश्वासराव०' —अ, आ, इ. ४. 'शृङ्गारो रसः'—आ, इ. ५. 'तृतीये च'—आ. ६. 'श्रमो वीर-रसाङ्ग०'—आ, [illegible] ७. अत उत्तरं 'यथा वा—"गन्तव्यमस्या दिशि चेति राजन् ! त्वयोदिते [illegible] नु ते द्विषां गणैः पलायितं त्यक्तकुटुम्बिनीप्रियैस्तदोर्गलत्कङ्कणपालमूर्वकम् ।" [illegible] भयं नृपविषयकविप्रीत्यात्मकरतिभावस्याङ्गतया निबद्धमिति प्रेयोऽलङ्कारः ।" इत्यधिकं क्वा पुस्तके. अयमतिरिक्तो भागः प्राक् सन्नपि पश्चान्निष्कासितो दृश्यते [illegible] पुस्तके.

[1]यथा वा—

राजंस्तवारिहरिणीनयनापाङ्गसौष्ठवम् ।
दृष्ट्वा मृगा मृगीष्वेव नन्दन्त्यन्तर्भवाकुलाः ॥३७३॥

[2]अन्तर्भवश्चेतोभवः ।

[3]अत्रोभयत्र शृङ्गाररसाभासो नृपविषयकैकविरतेरङ्गतया निबद्धः, इत्यूर्जस्व्यलङ्कारः ।

यथा—

त्वयि प्रचलिते राजन् ! योद्धुं प्रत्यर्थिभिः सह
ते पुनर्वैरमुत्सृज्य नमन्ति प्रस्तुवन्ति च ॥३७४॥

[4]अत्र नृपविषयकैकविरत्यङ्गतया विनयेन प्रतीता [5]भावाभासरूपा [6]नृपविषयकशत्रुरतिर्निबद्धा, इत्यूर्जस्व्यलङ्कारः ।

## ११०. समाहितम्

समाहितं, यथा—

[7]केलिस्थानचिरागतः प्रियतमो गोत्रस्खलद्वीक्षतः
संजातप्ररुषाहतः प्रवचसा निःशङ्कया मुग्धया ।

---

373. O king! the (male) deer, filled with passion on observing the superior beauty of the outer corner of the eyes of the fawn-eyed women of thy enemies, dally with their does themselves.

374. O king! when thou settest out to fight with thy adversaries they on their part, having given up their enmity make obeisances and offer immense praise (to thee).

375. The lover who came to the pleasure-house after a long time and whose tongue blundered in calling her with her name, was beaten by the charming young damsel who had grown extremely angry, was

---

१. 'यथा वा' इति पदद्वयं न दृश्यते ■ पुस्तके. २. 'नदन्त्यन्त०'—अ. ३. 'अत्र' इति पदं नास्ति आ पुस्तके. ४. 'नृपविषयकरते०' — आ, इ. ५. 'नृपविषयकरत्यङ्गतया'—अ; 'नृपविषयकप्रीत्यङ्गतया'—आ. ६. नास्ति आ पुस्तके. ७. 'राजविषयकशत्रुरतिर्निबद्धा' — आ. ८. 'इत्यूर्जस्व्यलङ्कारः' इति नास्ति ■■ पुस्तके. ९. 'केलिस्थानमुपागतोऽथ स चिर गोत्रस्खलद्वीर्मया संजातप्ररुषाहतः प्रवचसा चाटूनि कुर्वन्नपि । सख्यः ■ प्रवदामि तत्क्षणकथां प्रक्षिप्य मां वेगतो गाढं नेत्रविचुम्बनं प्रकृतवान्, बाष्पो निगीर्णस्ततः ॥' इति पद्यपाठः ■■ पुस्तके.

कामाविर्भवनप्रजातपुलकः प्रश्लिष्य तां वेगतो
गाढं नेत्रविचुम्बनं प्रकृतवान् बाष्पो विमुक्तस्तया ॥३७५॥

अत्र भावशान्तिः शृङ्गाररसाङ्गतया[1] निबद्धा, इति समाहितमलङ्कारैः[2]।

यथा वा—

चिरागतं केलिगृहे पतिं प्रिया
विलोकयामास न सोऽपि तां शठः[3]।
पत्युर्दृगन्ते पतिते प्रसङ्गतः
सबाष्पयालिङ्गित एव मुग्धया ॥३७६॥

मुग्धया सुन्दर्या[4][5]।
अत्रापि समाहितमलङ्कारः[6]।

## १११. भावोदयः

भावोदयः, यथा—

अम्बराम्बरधरां विकुचत्रां
प्रोल्लसत्कुचभरां नतमध्याम्[7]

---

speaking loudly and was fearless. He, with profuse horripilation caused due to the rise of passion, rashly embraced her and impetuously kissed her eyes, whereupon she shed tears.

376. The wife did not look at the husband who had come to the private apartment after long; he, too, a crafty lover ■ he was, did not look at her. The moment the husband's side-long glance fell incidentally (on her), the innocent charming woman, with tears (in her eyes), did embrace him.

377. The lucky youth had the hair of his body erect on gazing at the damsel who was putting on the garment in the form of the sky (i.e. was stark naked), who had her bodice (lit. the breasts-preserver)

---

१. 'शृङ्गाराङ्गतया'—आ, इ. २. अत उत्तरं 'ततो नेत्राद् बाष्पो निर्गीर्णो, न तु मुक्तः। अनेन सखीनां पुरो मानो ध्वन्यते' इत्यधिकं आ पुस्तके. अयमतिरिक्तो भागः प्राक्सन्नपि पश्चान्निष्कासितो दृश्यते ■ पुस्तके. ३. 'पुनः'—आ. ४. अतः पूर्वं 'उभयत्र' इति पदमधिकं आ पुस्तके. आ पुस्तके तु वृत्तिरेव न दृश्यते. ५ 'सुन्दरया'—इ. ६. इदमपि वृत्तिवाक्यं न दृश्यते आ पुस्तके. ७. 'नतमध्यम्'—अ.

वीक्ष्य जातपुलको युवधन्यो
वीक्षितश्चतुरयापि सहासम् ॥३७७॥

[redacted] नायकगतसात्त्विकभावस्य नायिकागतचित्तप्रसादरूपहर्षस्य चोदयः शृङ्गाररसाङ्गतया निबद्धः, इति भावोदयोऽलङ्कारः ।

"एवं क्रीडति लोकोऽयं माधवेन सुरक्षितः ॥"

—इत्यनुष्टुबर्धं पठित्वा पूर्वोक्तपद्यत्रयस्य प्रकृतनृपवर्णनपरता कल्पनीया ।

## ११२. भावसन्धिः

भावसन्धिः, यथा—

दीर्घकालविरहव्यथाकुलां
जानकीं रणधुरं च चिन्तयन् ।
स्विन्नकण्टकितगल्लभासुरो
जानकीपतिरसौ पुनातु वः ॥३७८॥

स्विन्नश्च कण्टकितश्च तौ चौ तौ गल्लौ च, ताभ्यां भासुरः । अत्र जानक्यां रती रणौत्सुक्यं च। तयोः सन्धौ रामचन्द्रविषयक-रतिपूर्वकराजरत्यङ्गतया निबद्धः । एतत्पद्यस्य नृपाशीर्वादात्मकत्वात् ।

---

